न्याय कुसुमाञ्जलिकारिका

१२६१

पत्राणि ८०

१२७ रघुदेवभट्टाचार्य्यकृत कुसुमाञ्जलि पत्र २० २६०

न्याय कुसुमाञ्जलौ कारिकाव्याख्यानमेतत्

५

ार्थं दत्तकीलाल मकरंदमनोरम॥ प्रणमामि सदानंदनंदनांघ्रिसरोरुहम्॥ आचार्य्यकृतसद्ग्रंथ
व्याख्यायंते विचारैश्चैरघुदेवेन यत्नतः॥ शप्रारिप्सितग्रंथसमाप्तिप्रतिबंधकीभूतविघ्नविघाताय शिष्टशि
नेबध्नन्प्रेक्षावत्प्रवृत्तयेप्रयोजनाभिधेयसंबंधं ग्रंथनामाभ्याह॥ सत्पक्षप्रसरः सतांपरिमलप्रोद्बो
नविमर्द्दने भृतरसप्रस्यंदमाध्वीकभूः ईशस्यैष निवेशितः पदयुगे भृंगायमानं भ्रमच्चेतो मे रमयत्व
सूनांजलिः एषोऽनघन्यायप्रसूनांजलिरविघ्नं यथास्यात्तथा मे चेतो रमयत्वित्यन्वयः॥ अत्रानघशब्द
मर्थः न्यायप्रसूनांजलिरित्यस्य न्यायपदस्य प्रतिज्ञादिवाक्यपंचकसमुदायार्थकतया प्रतिज्ञादिवाक्यपं
सुमांजलिरित्यर्थः। केचित्तु न्यायप्रसूनांजलिरित्यत्र न्यायः प्रसूनांजलिरिव इत्युपमितसमासमाश्रयंति
दिभिः समान्याप्रयोगे इत्यनुशासनात् सामान्यधर्माप्रयोग एवोपमितसमासस्य विहितत्वात्प्रकृतेऽनुचित
रित्यत्रांजलेः कुसुममितिसमासो राजदंतादिवत्· अन्यथा कुसुमस्येव चेतोरमकत्वेन युतकरात्मकांजले

स्प.त.२

राम

१

रतादृशत्वात्तस्य चेतोरमकत्वकथनस्यासंगतत्वापत्तेः। अत्र कुसुमांजलिरित्यनेन ग्रंथनाम... रूपकस्य ... कोमय साधा
धर्मात्मकविशेषणप्रदर्शनस्योचिततयातथैवाह ईशस्येत्यादिग्रंथपद्ये कुसुमांजलिः किंभूतः ईशस्य पदयुगे निवेशितः अत्र पद्य
ते अनेनेति व्युत्पत्त्या पदं पदं प्रमाणं तत्कौमयपरं तथाच ईश्वरव्यवस्थापकं यत्प्रमाणं तत्कौमयं तत्र निवेशितः तत्फलतात्पर्येण प्र
युक्त इत्यर्थः। कुसुमांजलिपक्षे ईशस्य यत्पदयुगं चरणद्वयं तत्र निवेशितः स्थापित इत्यर्थः। ईशस्येत्यादिना मंगलं सूचितम्। अभि
धेयतत्संबंधावपि दर्शितौ। किंभूतं भृंगायमाणं भृंगतुल्यं नियोजितेष्टफलत्वात् भ्रमणशीलत्वाच्च। पुनः किंभूतं भ्रमत इष्टफला
य कुसुमांजलिमनुसरत् अनवेत्यनेन स्वग्रंथे शब्ददोषाभावमुक्त्वा अर्थदोषाभावमाह सत्पक्षेत्यादि कुसुमांजलिः पुनः किंभू
तः सत्पक्षप्रसरः अत्र ग्रंथपक्षे सतिपक्षतावच्छेदकावच्छिन्नेपक्षे सिषाधयिषितसाध्यके प्रकृष्टप्रमात्ववेत प्रसरः साध्यहेत्वोर्ज्ञा
नं यस्मात्तादृश इत्यर्थः। एतेनाश्रयासिद्धिसिद्धसाधनस्वरूपासिद्धिसाध्याप्रसिद्धि स्वरूपासिद्धयो व्युदस्ताः
कुसुमांजलिपक्षे सन्नसमीचीनः पक्षपरिग्रहो दलविकाशो यस्य तादृश इत्यर्थः। पुनः किंभूतः सतीपरिमलप्रोद्भेदो...

पुस्तक: १

कौ० टी० र० एतेन व्याप्यव्याप्तिसिद्धिसव्यभिचारविरोधनिरासः कृतः कुसुमांजलिपक्षे स तां विदग्धानां परिमलस्पोद्बोधनेन बद्धः उत्सवः

वः। अत्र ग्रंथपक्षे सतामीश्वरमननार्थिनां परिः सर्वतः मलः संबंधः व्याप्तिस्वरूपः तस्य प्रोद्बोधेन निश्चयेन बद्धः उत्सवः कृतः उद्देश्य

साध्यसिद्ध्यात्मानंदो येन तादृश इत्यर्थः। उभयपक्षे षष्ठीबहुवचनांतस्य तत्समगायित्वं बोध्यम्। पुनः किंभूतः विमर्दनेन विम्लानः

अत्र ग्रंथपक्षे विमर्दने प्रतिहेतुपरामर्शे सति न विम्लानः स्वकार्यकारीन इत्यर्थः तेनासत्प्रतिपक्षत्वं सूचितम्। कुसुमां

जलिपक्षे विमर्दने प्रतिहेतुपरामर्शे सति न विम्लानः तदन्य इत्यर्थः। अर्थदोषाभावमुक्त्वा ग्रंथस्य प्रयोजनमाह॥ अमृत

रसेत्यादि पुनः किंभूतः अमृतरसप्रस्यंदमाध्वीकभूः। अत्र ग्रंथपक्षे अमृतं मोक्षः रसः इष्यमाणः प्रस्यंदः प्रस्यंदमानः तथा

च मोक्षात्मकेष्यमाणस्वरूपं यत्प्रस्यंदमानमाध्वीकं तस्य भूः उत्पत्तिर्यस्मात् तादृश इत्यर्थः। कुसुमांजलिपक्षे अमृततुल्यो

रसो यस्य एतादृशं यत्प्रस्यंदमानमाध्वीकं तस्य भूः उत्पत्तिर्यत्र तादृश इत्यर्थः। ननु जीवात्मा न मु [illegible] यो ज्ञायाः आत्मा

वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादिश्रुतेः जीवात्मसाक्षात्कारस्यैव मोक्षहेतुत्वं प्रतिपादितम्। अत्र तदुपयुक्त

तन्मननमेव मोक्षप्रयोजकं न त्वीश्वरमननं तथा च ईश्वरप्रमाणतर्कोभयफलतात्पर्यप्रयुक्तग्रंथस्य न मुक्त्यनुपयोग इति

2

उपसर्गेण हि धात्वर्थो बलादन्यत्र नीयत इति न्यायादुपासनेन ... संभवात्

एतद्ग्रंथकरणं निरर्थकमेवेत्यत आह स्वर्गापवर्गयोर्मार्गमाममनंति मनीषिणः यदुपास्तिं ... परमात्मानं रूप्यते मनी

षिणः पंडिताः यदुपास्तिं यस्य उपासनं मननापरपर्यायं स्वर्गापवर्गयोः स्वर्गपरममुक्त्योर्मार्गं पापनाशद्वारा प्रयोजकमाहुस्त

त्र अस्मिन् ग्रंथे असौ परमात्मा ईश्वरस्वरूपः निरूप्यते प्रमाणतर्काभ्यां व्यवस्थाप्यत इति संपूर्णकारिकार्थः तथा च ईश्वर

मननस्यापि पापनाशद्वारा मुक्तिप्रयोजकत्वात् तथाविधमनने फलतात्पर्यं प्रयुक्तग्रंथस्यापि परंपरया मुक्तिप्रयोजकत्वेन

निरर्थकत्वमिति भावः यत्तु आसधातोरुत्तरं ल्युडो विशेषानुशासनबलात् क्तिप्रत्ययासंभवेन उपपूर्वासधातोरुपास्तिपदसम

र्थनं न संभवतीति कथमुपास्तिमित्युपादानमिति तन्न उक्तयुक्त्या आसधातोस्तादृशरूपासमर्थनेपि अस्सुधातोरेवतथारूपं

समर्थयितुं शक्यत इति तदुपादानस्यानिर्दुष्टत्वात् केचित्तु उक्तयुक्त्या उपपूर्वासधातोरुत्तरं त्वासंभवात् क्तिप्रत्ययात् तथा प्रत्य

यात् तथाप्रत्ययेन तथाप्रत्ययासमर्थनेपि दुत्तरकृते सति पातथासमर्थनं निर्दुष्टमिति तदुपादानेन न दोषः न च ... तिपो धातुस्वरू

पे इत्यनेन सति पो धातुस्वरूपार्थकतया त्व ... प्रतिपादने न ... तथाप्रकृते अर्सगतिरिति वाच्यमायजतिषु येषु

कु॰ का॰ टी॰

ज्ञामहं करोति नानुयाजेष्वित्यत्र यजिपदस्य स्वपरतया सति पोषानुत्वविशिष्टार्थकतया प्रयाजिधात्वर्थ इति प्रथमबोधः तदुत्तरं
यजिपदनिरूपितशक्तिज्ञानात् यागस्यैव बोधवत् प्रकृतेऽप्युपासनारूपार्थबोधसंभवेनानुपपत्त्यभावादिति वदंति ॥ ननु संदि
ग्धार्थस्यैव मननीयतया ईश्वरे कस्यचित्संदेहाभावेन तन्मननमेव न संभवतीति कथं तत्र ग्रंथस्य प्रयोजनमुक्तमित्याह ॥ इह
3 यद्यपि यं कमपि पुरुषार्थमर्थयमानाः शुद्धबुद्धस्वभाव इत्यौपनिषदाः ॥ आदिविद्वान् सिद्ध इति कापिलाः ॥ क्लेशकर्मविपाकाश
यैरपरामृष्टो निर्माणकायमधिष्ठाय संप्रदायप्रद्योतकोऽनुग्राहकश्चेति पातंजलाः ॥ लोकविरुद्धैरपि निर्लेपः स्वतंत्रश्चेति
महापाशुपताः ॥ शिव इति शैवाः ॥ पुरुषोत्तम इति वैष्णवाः ॥ पितामह इति पौराणिकाः ॥ यज्ञपुरुष इति याज्ञिकाः ॥ सर्वज्ञ इति सौगताः राम
॰निरावरण इति दिगंबराः ॥ उपास्यत्वेन देशित इति मीमांसकाः ॥ लोकव्यवहारसिद्ध इति चार्वाकाः ॥ उक्तेषु यावदुपपन्नं तद्युक्तमिति
नैयायिकाः ॥ किं बहुना कारवोऽपि यं विश्वकर्मेत्युपासते तस्मिन् जातिगोत्रप्रवरशाखाकुलधर्मादिवदासंसारप्रसिद्धानुभव
भगवति भवे संशय एव नास्ति किं निरूपणीयं समाधत्ते तथापि न्यायचर्चेयमीशस्य मननव्यपदेशभाक् उपासनैव क्रिय ३

तेश्रवणानंतरागता॰ मननव्यपदेशभाक् मननशब्दवाच्या इयं न्यायचर्चा इयमीश्वरानुमितिर्या क्रियते सिषाधयिषया सं
पाद्यते सापि तु पासनैव मुक्तिप्रयोजिकैव यतः श्रवणानंतरागतो श्रवणानंतरमपि पापनाशार्थं तस्या आवश्यकतेत्यर्थः तथा च
सर्वेषामीश्वरनिर्णयस्य चेपि सिषाधयिषया ईश्वरमननानंतरसंभवः सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षतासत्वात् संदे
हेपक्षतात्वस्य निरस्तत्वात् तथा च नोक्तानुपपत्तिरिति भावः केचित्तु॰ श्रवणानंतरागतेत्यस्य यतः श्रोतव्यो मंतव्य इत्यादिश्रुत्या श्र
वणानंतरकर्तव्यत्वेन वेदबोधितेत्यर्थः न च जीवात्मानमुपक्रम्योक्ताया आत्मा श्रोतव्यो मंतव्य इत्यादिश्रुतेः श्रवणानंतरकर्तव्यत्वे
न ईश्वरमननप्रतिपादकत्वासंभवेन श्रवणानंतरेत्यादेरुक्तार्थोऽसंगत इति वाच्यम् ईश्वरात्मसाक्षात्कारस्यैव मुक्तिहेतुत्वे
न व्यवस्थापनेन तदुपयुक्तेश्वरमननस्यैव प्रकृते श्रुत्या श्रवणानंतरकर्तव्यत्वप्रतिपादनेनानुपपत्त्यभावात्॰ अन्यथानुप
पत्त्या क्वचिदुपक्रमस्याप्यनादरणीयत्वात् अन्यथोपक्रमानुरोधेन अत्रात्मपदस्य जीवात्मपरत्वमुपेत्य श्रुतेर्जीवात्ममनन
प्रतिपादकत्वाभ्युपगमे आत्मा द्रष्टव्य इत्याशयस्यापि जीवात्मसाक्षात्कारप्रतिपादकतया तादृशश्रुतेर्मुक्तिसाधनात्मसा

ज्ञात्कारप्रतिपादकत्वानुपपत्तेः ईश्वरात्मसाक्षात्कारस्यैव मुक्तिसाधनत्वाभ्युपगमादित्याहुः तन्न संनिकर्षविरहेण ईश्वरात्मसाक्षा
त्कारस्यैवासंभवेन तस्य मुक्तिहेतुत्वस्यासंभवदुक्तिकतया उपदर्शितप्रकारस्यासंभवदुक्तिकत्वादिति। यत्तु सिषाधयिषयाम-
ननसंभवेपि अस्मिन्ग्रंथे मननोपयोगिन्यायप्रदर्शनमसंगतं तत्पूर्वांगसंशयाभावात्० ईश्वरस्य सर्ववादिसिद्धत्वादिति तन्न ई
श्वरे येन रूपेण वादिप्रतिवाद्युभयसिद्धत्वं तदन्यरूपेण तत्र मननोपयोगिन्यायपूर्वांगसंशयस्यापि संभवात् तादृशरूपं चादृष्टा
धिष्ठानत्वम्० तथाहि अचेतनस्य चेतनाधिष्ठानेन कार्यजनकत्वनियमात् अचेतनादृष्टेन कार्यजनने चेतनाधिष्ठानम
वश्यमपेक्षितं चेतनाधिष्ठानं च चेतनवृत्तिप्रत्यक्षसहकारित्वं तथा चादृष्टाधिष्ठानत्वमदृष्टसहकारिप्रत्यक्षवत्त्वं तेन रूपेण ईश्व
रे अवश्यं संशयः संभवति अदृष्टस्य संदेहात् विशेषणसंदेहस्य विशिष्टरूपेण संशये अंगत्वात्। केचित्तु परार्थानुमानस्थले राम
साध्यनिर्णयसत्त्वेपि सिषाधयिषायां विद्यमानायां न्यायपूर्वांगस्याहार्यसंशयस्योभयवादिसिद्धपदार्थे संभवेनानुपपत्त्यभावादि
ति वदंति। तत्रादृष्टाधिष्ठानत्वेन ईश्वरं साधयितुं प्रथमं तोऽदृष्टं साधयति सापेक्षत्वादनादित्वात् वैचित्र्यात् विश्ववृत्तितः प्रत्या ६

(४)

त्मनित्य मात मुक्ते रस्ति हेतुरलौकिकः। अत्र परलोक इति शेषः। तथा च परलोके हेतुरस्तीत्यन्वयः। अत्र हेतुमाह सापेक्षत्वादिति
तथा च परलोको हेतुमान् सापेक्षत्वादित्यनुमानेन परलोकहेतुसिद्धिरिति भावः। एतेन परलोकस्य नित्यत्वेन अहेतुकत्वं तदात्वहेतुतया अदृष्टसि
द्धिरिति तद्वदेव न परलोकस्यानादित्वादित्याशंका निरस्ता। ननु सापेक्षत्वमत्र किंचित्कालावृत्तित्वं तथा च प्रागभावे व्यभिचार
इति चेन्न किंचित्कालावृत्तित्वे सति सत्ववत्त्वस्यैव सापेक्षत्वपदार्थत्वात् प्रागभावे च सत्ताया अभावेन तद्वृत्तिहेत्वभावेन व्य
कृतानुमाने व्यभिचाराभावादिति। ननु परलोकहेतोरनादित्वे परलोकस्याप्यनादित्वापत्त्या तस्य कादाचित्कत्वमवश्यं वाच्यम्। एवं त
द्धेतोरपीत्यनवस्थेत्यत आह अनादित्वादिति। अनवस्थायाइत्यादिः। तथा चानाद्यनवस्थाया अदुष्टत्वेन प्रकृते दोषाभाव इति भा
वः। ननु एतादृशानुमानात् परलोकहेतुसिद्धावपि न विचित्रहेतुसिद्धिः कालादिरूपसाधारणहेतुकत्वमादाया सिद्धांतरसंभवादित्यत
आह वैचित्र्यादिति स्वर्गनरकादिरूपकार्याणां परस्परं वैलक्षण्यादित्यर्थः। तथा च स्वर्गरूपपरलोकः विचित्रहेतुकः नरकाद्यपेक्ष
या विलक्षणकार्यत्वादित्याद्यनुमानात् स्वर्गादिरूपपरलोके विचित्रहेतुकत्वं सिद्धमिति भावः। ननु एतादृशानुमानात् परलोके वि

कुमारीर·

क

चित्रहेतुकत्वासिद्धावपि नादृष्टरूपविचित्रहेतुकत्वसिद्धिः यागदानादिरूपादृष्टविचित्रहेतुकत्वमादायार्थांतरसंभवादित्यत
आह विश्वेति। विश्वेषां परलोकार्थिनां प्रवृत्तितः यागादौ प्रवृत्तितः [redacted]ः तथा च यागदानादिप्रवृत्तिः स्वर्गादिरूपपर
5 लोकजनकव्यापारजनकत्वरूपस्वर्गादिरूपपरलोकजनकत्वज्ञानसाध्या तादृशप्रवृत्तेरित्याद्यनुमानात्तत्साधितव्यापारसि
द्धौ तद्द्वारव्यापारविषयादृष्टसिद्धिसंभवः व्यापारांतरस्य तद्घटकत्वासंभवेनार्थांतरसंभवादिति भावः। ननु आयाबनेनानुमा
नेनादृष्टं तस्य च भोक्तृनिष्ठत्वे मानाभाव इत्यत आह प्रत्यात्मेत्यादि भुक्तेर्भोगस्य सुखादेः प्रत्यात्मनियमात् प्रतिनियतात्म
वृत्तित्वात् भोक्तृनिष्ठमेव तदिति भावः। यद्यप्यदृष्टस्यात्मावृत्तित्वेपि तदधिष्ठानत्वेन ईश्वरसिद्धेरप्रत्यूहः तथापि प्रकृते तत्र स्यात्तदू
त्तित्वव्यवस्थापनमयुक्तं तथापि प्रसंगादिदमभिहितमिति ध्येयम्। तथा च स्वर्गनरकाद्यात्मकपरलोकस्य निरपेक्षत्वे परलो राम
कः कदाचिद्भवति कदाचिन्नेति नियमो न स्यादित्यदृष्टहेतुकत्वमवश्यं स्वीकर्तव्यम् अनया युक्त्या परलोकहेतुत्वेन अदृष्टे सिद्धे तस्य
च चेतनाधिष्ठानं विना उक्तनियमबलात् कार्यजनकत्वानुपपत्त्या अदृष्टाधिष्ठानमवश्यं स्वीकार्यं स च ईश्वर एवेति सर्गादौ ईश्वरा ५

तिरिक्तचेतनाभावेनादृष्टेन संसर्गेऽजननीये अन्यचेतनस्य सहकारित्वकल्पनासंभवादिति भावः। ननु परलोकः अकस्मा
देव कदाचिद्भवतीति वक्तव्यं तथा च लोकनियमानुपपत्तिरित्यत आह हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च। स्वभाव
वर्णनानैवमवचेन्नियत[illegible] मतत्वतः। अकस्माद्भवतीत्यस्य निषेधार्थकाकारस्याभावपरतया किंशब्दस्य हेतुपरतया भू
धातोरुत्पत्तिपरतया तेन सहाभावस्यान्वये हेतुतउत्पत्तेरभाववान् परलोक इत्यर्थे दोषमाह हेतुभूतिनिषेध इति परलो
के हेतुप्रयोज्याया उत्पत्तेस्तस्या निषेधः कर्तुं न शक्यत इत्यर्थः। यदि च किंशब्दस्य स्वभिन्नपरतया नञोऽन्योन्याभावपर
तया स्वभिन्नभिन्नं यत्स्वं तत्प्रयोज्योत्पत्त्याश्रयः परलोक इत्यर्थः। अथवा तादृशवाकस्य किंशब्दस्यालोकभिन्नपरतया
नञोऽन्योन्याभावपरतया अलोकभिन्नभिन्नं यदलोकं तत्प्रयोज्याया उत्पत्तेस्तदाश्रयः परलोक इत्यर्थस्तदुभयत्र दोष
माह स्वानुपाख्यविधिर्न चेति स्वं स्व स्वरूपमनुपाख्यं यदलोकं त[illegible]
धिः सोऽपि नेत्यर्थः। स्वप्रयोज्योत्पत्त्याश्रयः परलोक इत्यपि न अलोकप्रयोज्योत्पत्त्याश्रयः परलोक इत्यपि नेति यावत्। य

कुका टी०

दिव्यपरलोकः अकस्माद्भवतीत्यस्य परलोकः स्वभावतो भवतीत्यर्थः तत्राह स्वभाववर्णनान्नैवेति स्वभावतः परलोकस्य
उत्पत्तिरपि नेत्यर्थः एवकारेणार्थे सर्वत्र हेतुमाह अवधेरित्यादि कार्यस्यानियतावधिकत्वनियमादित्यर्थः न चैतादृशनियम
भे मानाभाव इति वाच्यम् कार्यस्यानियतावधिकत्वे निरवधिकत्वे वा कादाचित्कत्वाभावप्रसंगात् कादाचित्के देव सहे
तुकत्वस्यावश्यकत्वादिति। ननु अत्र कादाचित्कत्वं कचिद्देशे वृत्तित्वं तस्य च घटत्वादाविव परलोकेऽपि हेतुं विनाप्युपपत्ति
संभव इति चेन्न नित्ये घटत्वादौ यत्किंचिद्देशवृत्तित्वरूपकादाचित्कत्वस्य स्वभावनियम्यत्वेपि तथा कादाचित्कत्वस्य का
रणनियम्यत्वस्वीकारस्यावश्यकत्वात् अन्यथा घटपटादावपि कादाचित्कत्वस्य स्वभावत एवोपपत्तौ घटत्वादिकं [illegible]
दंडत्वादिनापि हेतुताया विलोपप्रसंगात् न चैतत्कश्चिदभ्युपैति यद्वा दंडाद्यन्वयव्यतिरेकानुविधायित्वरूपस्य दंडादौ राम
तत्कारणत्वग्राहकस्य अनुभवसिद्धत्वेन तथा वक्तुमशक्यत्वादिति। केचित्तु अन्वयव्यतिरेकानुविधायित्वज्ञानस्य कारणताग्रा
हजनकत्वे धूमे रासभाद्यन्वयव्यतिरेकानुविधायित्वज्ञानस्यापि संभवेन रासभेपि धूमविशेषजनकत्वग्रहप्रसंगादिति ६

वदंतीति तन्न अनन्यथासिद्धधूमनियतपूर्ववर्त्तित्वरूपस्य धूमकारणत्वस्य रासभादौ अभावेन तत्र तथाप्रत्ययापादनस्यासंभवा
त्· बाधावतारदशायां तथाप्रत्ययेपि तस्य भ्रमत्वेन न तस्माद्रासभादौ धूमकारणत्वसिद्धिः· भ्रमाद्वस्तुसिद्धौ सर्वत्र स[illegible]सि
द्धिप्रसंगात्· अतएवाह नहि भ्रमाद्वस्तुसिद्धिरिति। यत्तु· सर्वमिदं संभवति· यदि अन्वयव्यतिरेकानुविधायित्वज्ञानं कारणताग्रा
कं तदेव न प्रमाणाभावादिति तन्न तथासति कारणताग्रहस्यापि स्वभावत एवोत्पत्तिस्वीकारप्रसंगात्। अत्र स्वभावपदार्थनिर्वच
नासंभवेनेष्टापत्तेरयोगादित्यास्तां विस्तरेण। ननु तृणत्वादिरूपकार्य्यस्यावधिस्वीकारे तदवधेरपि अवधिस्वीकार[illegible]
कः अन्यथा तदवधेरनादित्वे तृणत्वादेरप्यनादित्वापत्तेः· तथा चैवं क्रमेणावधिपरंपरास्वीकारेऽनवस्था। एवं यादृशव्यक्ते
यादृशव्यक्तेरवधित्वं तादृशं व्यक्तिं प्रति तादृशव्यक्तेरेव हेतुत्वमस्तु न तज्जातीये तज्जातीय[redacted]स्य न चैवं सति कार्य्यस्य
नियतज्जातीयत्वं कथमुपपद्येतेति वाच्यं। कार्य्यनियतजातीयत्वस्य तज्जातीयानुकूलशक्तिप्रयोज्यत्वा[illegible]
शंकाद्वयोपरिदूषणमाह प्रवाहो नादिमानेष न विजात्यैकशक्तिमान् [illegible] तत्त्वे यान्वतामाव्य[illegible]अन्वयव्यतिरेकवो[illegible]। एत[illegible]

कुका टीर

अवध्यवधितदवध्यादिरूपकार्य्यप्रवाहः न आदिमान किंत्वनादिरित्यर्थः। तथा च बीजांकुरादिवदनाद्यनवस्थायामप्रदोषत्वेन तत्तद्
वध्यवधिरूपपरंपरास्वीकारेऽक्षतिरिति भावः। द्वितीयशंकोत्तरमाह नविजात्येकशक्तिमानिति विजातीयेषु या एका शक्तिस्तद्
वधिप्रवाहः अवधिसामान्ये कार्य्यसामान्यानुकूलामेकां शक्तिं स्वीकृत्य तस्या एव कार्य्यत्वावच्छिन्नं प्रति हेतुत्वं कल्पनीयं ननु
कर्तृत्वेन इत्यपिनेति यावत् तादृशातिरिक्तशक्तिकल्पने गौरवात् लाघवेन कर्तृत्वेनैव कार्य्यत्वावच्छिन्नं प्रति हेतुत्वकल्पन
स्योचितत्वादिति भावः। इदं तु प्रसंगाद्व्यवस्थापितं वस्तुगत्या तत्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुत्वेपि तत्तद्क्रियात्वं
प्रति तत्तदृष्टस्य हेतुत्वावश्यकतया तत्तद्व्यक्तिसहकारिप्रत्यक्षाश्रयत्वेनेश्वरसिद्धिरप्रत्यूहैवेति ध्येयम्। नन्वेवमतिरिक्तश
क्त्यनंगीकारे वह्नित्वावच्छिन्नं प्रति तृणारणिमणीनामेकशक्तिमत्त्वेन हेतुत्वस्य विलोपापत्तिरित्यत आह तत्त्वे इति तत्त्वे
तृणादौ वह्न्यादिहेतुत्वेन निर्वाह्य इति शेषः। यत्नवत्ताभाव्ये यत्नः कार्य्य इत्यर्थः। तथा च तत्तत्कारणाऽन्यतात्वेन कतया पर
स्थावृत्तजातिविशेषानस्वीकृत्य तत्तज्जात्यवच्छिन्नं प्रति तत्तद्रूपेण तृणादीनां हेतुत्वकल्पनेऽनन्तकार्य्यकारणभावकल्पनोप
[illegible] नेनैवोपपत्तेः किमतिरिक्तशक्तिकल्पनयेति भावः

त्याल्लाघवेन वह्नित्वावच्छिन्नं प्रति एकशक्तिमत्त्वेन हेतुत्वकल्पनमेवोचितमिति चेन्न वह्नित्वावच्छिन्नं प्रति तेषामेकशक्तिम
त्त्वेन हेतुत्वकल्पने मण्यादेः फूत्कारादिसहकारेणापि वह्निजनकत्वापत्तेः फूत्कारसहकृततृणान्तर्वह्न्युत्पत्त्यनुरोधेन शक्तिमत्त्वा
वच्छिन्नेन वह्निरूपे फले जननीये तृणत्वावच्छिन्नेन तत्सहकारित्वकल्पनाया आवश्यकत्वात्। न च फूत्कारादिसंयोगविशेषे श
क्तिविशेषं स्वीकृत्य वह्नित्वावच्छिन्नं प्रति विलक्षणशक्तिमत्त्वेन तथाविधसंयोगानामेव हेतुत्वमस्तु किं तत्तज्जातिविशेषाव
च्छिन्नं प्रति तृणत्वादिनेति वाच्यम्। एवं सति वह्नित्वावच्छिन्नजनकतावच्छेदकीभूतशक्तिविशेषस्तृणफूत्कारसंयोगादौ क
ल्प्यते उत तत्कालीनवायुसंयोगादौ विनिगमकाभावेन सर्वत्र तत्कल्पनेऽतिगौरवप्रसंगात्। लाघवेन तत्तज्जातिविशेषान्
स्वीकृत्य तत्तज्जातिविशेषावच्छिन्नं प्रति तृणत्वादिना हेतुत्वकल्पनस्यैवोचितत्वात्। न च उपदर्शितरीत्या विनिगमनाविरहे
ण वायुसंयोगादीनामपि हेतुत्वापत्तिः तथा सति तृणाद्यसत्त्वे काले वायुसंयोगादिसत्त्वकालेऽपि वह्नित्वावच्छिन्नापत्तेरुक्त
त्वादित्यलमतिशयविस्तरेण। ननु एकमेव ब्रह्म कार्यजातमुत्पादयति। अत्र वाक्य प्रकृतिजन्यत्वेन सजातीय

रूपभेदे भिन्नं यद्बुद्धितत्त्वं संख्याभ्युपगतं तद्धेतुरस्त्वनादृष्टं तथा च यत् तत्सहकारित्वेन प्रत्ययत्वादिभेदोऽस्मत्सिद्धिरिति
तत्राह। एकस्य न क्रमः क्वापि वैचित्र्यं समस्य न। शक्तिभेदेन चाभिन्नः स्वभावो दुरतिक्रमः। एकस्य कारणस्य [illegible]
कार्याणां क्रमः अत्र नियम्य इत्यस्य [redacted] अध्याहारः समस्य एकजातीयस्यैव कारणस्य प्रयोज्यं चेन्न कार्याणां वैचित्र्यं
वैजात्यम् अत्र प्रयोज्यम् इत्यस्य कार्याणाम् इत्यस्य चाध्याहारः तथा च क्रमोत्पन्नानां विजातीयानां च कार्याणां निर्वाहाय म
दृष्टरूपकारणस्य हेतुत्वम् आवश्यकम् इति भावः। ननु कारणस्यैकत्वे एकजातीयत्वे वा शक्तिभेदादेव कार्यस्य क्रमो वैजात्यं वा
उपपद्यते इत्यत आह शक्तीति चो हेतौ तथा च यतोऽभिन्नः एकं कारणमेकजातीयं च कारणमतः शक्तिभेदो न संभवतीत्यर्थः। यद्य
पि कारणस्यैकत्वेऽपि कारणतावच्छेदकस्य नानात्वसंभवे बाधकाभावेन कारणतावच्छेदकत्वेन नाना शक्तिकल्पने न विरुद्धं तथा
विध नाना शक्तीः कल्पयित्वा तत्तद्रूपेण हेतुत्वकल्पनेऽपि विनिगमनाविरहेण अदृष्टसिद्धेरप्रत्यूहत्वादिति। ननु एकस्मा राम
त् एकजातीयाद्वा कारणात् स्वभावविशेषादेव कार्याणां क्रमो वैजात्यं वा स्यादत्राह स्वभाव इति दुरतिक्रमः दुस्त्याज्यः ८

नानास्वभावस्वीकेवि नियमनाक्षिरहेणादृष्टसिद्धेरप्रवृत्तौ देवैति भावः ३

यत्स्वभावावच्छिन्नस्य पूर्वकार्यजनकत्वं तत्स्वभावावच्छिन्नस्यैवोत्तरकार्यजनकत्वे पूर्वकाल उत्तरकार्योत्पादापत्ति
त्तिः उत्तरकार्यकाले च पूर्वकार्योत्पादापत्तिः एवं स्वभावावच्छिन्नस्य नानाजातीयकार्यनियामकत्वे सर्वकार्यं सर्वजाती
यमेकजातीयं वा स्यात्। ननु यागादेश्चेत्स्वर्गादिकं फलं तदा यागादिगोचरप्रवृत्तौ स्वर्गसाधनताज्ञानस्य हेतुतया तत्का
नुमानात् अदृष्टसिद्धिस्तदेव नेत्यत आह विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा दृष्टलाभफला नापि विप्रलंभोपि
नेदृशः। विश्वेषां प्रेक्षावतां यागादौ प्रवृत्तिर्न विफला अत्र प्रेक्षावत्प्रवृत्तित्वादिति हेतुः पूरणीयः। एवं न वा दुःखैकफला अ
त्रापि पूर्वोक्त एव हेतुः। ननु अस्तु तथापि प्रवृत्तिः सफला तथापि तस्याः स्वर्गफलकत्वे प्रमाणाभावः पूजाख्यात्यादिदृष्ट
फलकत्वेनाप्युपपत्तेरित्यत आह दृष्टेति दृष्टो यो लाभादिस्तत्फलापि नेत्यर्थः। दृष्टेतरफलासत्त्वे यागादिकर्तुर्लाभासं
भवः दृष्टेतरफलोद्देशेनैव तेभ्योऽन्यैर्धनादिदानादिति भावः। ननु केनचित्प्रतारकेन स्वर्गादिफलकतया यागादिकं प्रख्या
प्यानुष्ठाय च वंचितो लोकः प्रेक्षावानपि प्रवर्तत इत्यत आह विप्रलंभ इति एतादृशप्रतारणापि न संभवतीत्यर्थः। कएता

दृशोयः परधं घननिबधनं नानाविधक्लेशसाधनैरूपवासादिभिर्यावज्जीवमात्मानमवसादयेदिति भावः ननु अस्तु या
गादेः स्वर्गादिफलकत्वं तथाप्यदृष्टस्वीकारो निरर्थकः अदृष्टं विनापि तस्मात्तादृशफलोत्पत्तिसंभवादित्यत आह चिरध्व
स्तं फलायालं न कर्मातिशयं विना संभोगो निर्विशेषाणां न भूतैः संस्कृतैरपि चिरध्वस्तं पूर्वं विनष्टं यागादिकर्म अति
शयं व्यापारं विना न फलाय समर्थं निरध्वस्तेऽनुभवादौ संस्काररूपव्यापारं विना फलाजनकत्वदर्शनेनाचिरध्वस्तानि
ष्टफलजनकत्वं व्यापारद्वारैवेति सामान्यतो नियमस्य तत्रैवावधारणेन यागादिनापि स्वर्गादिफलजनने व्यापार
कल्पनमावश्यकमिति भावः ननु आयात्वनया युक्त्या अदृष्टं तथापि तस्य भोक्तृनिष्ठत्वे प्रमाणाभावः भोग्यनि
ष्ठतयापि उपपत्तेरित्यत आह संभोग इति संभोगः सम्यक् भोगः प्रत्यात्मनियतो भोग इति यावत् निर्विशेषाणां मदृष्टरूप
विशेषशून्यानां संस्कृतैरदृष्टरूपसंस्कारैर्द्विरपि भूतैः स्वक्चंदनादिभिर्न निर्वहति नोत्पत्तुमर्हतीत्यर्थः तथाच
भोग्यस्वक्चंदनादौ अदृष्टस्वीकारे कुत्रचिदात्मनि भोगः क्वचिन्नेति नियमनिर्वाहो न स्यात् व्यधिकरणादृष्टस्यता

राम ८

द्दष्टाभोगनियामकत्वानिर्वाहासंभवादित्यदृष्टस्यभोक्तृनिष्ठत्वमावश्यकमितिभावः अत्रविवदंतेबहवः तिष्ठतुचिरध्व
स्तनिष्ठफलजनकत्वव्यापारद्वारैवेतिनियमस्तत्राप्यदृष्टासिद्धिः यागध्वंसस्यव्यापारत्वस्वीकारेणैवतदुपपत्तेः न
चैवंसतियागस्यप्रतिबंधकत्वापत्तिः कारणीभूताभावप्रतियोगित्वरूपप्रतिबंधकत्वस्यतत्रसत्त्वादितिवाच्यम् प्र
तिबंधकत्वलक्षणेऽभावत्वादिनाकारणत्वस्यनिवेशात् प्रकृतेतुध्वंसत्वेनहेतुतयाउक्तानुपपत्तेरभावादिति। अत्रेदंस
मादधिरे अस्तुएवंरीत्याअदृष्टासिद्धिः तथापिअचेतनेनफलजननेचेतनस्यसहकारित्वानियमेनईश्वरसिद्धि
रप्रत्यूहैवेति। वस्तुतस्तुअदृष्टस्वीकारआवश्यकः अन्यथायागादिध्वंसस्यव्यापारत्वमभ्युपेत्यस्वर्गत्वावच्छि
न्नंयागध्वंसत्वेनहेतुत्वकल्पनेविशेष्यविशेषणभावविनिगमनाविरहेणध्वंसत्वविशिष्टयागत्वावच्छिन्नप्रतियोगि
ताकत्वेनापितत्रहेतुत्वस्यासंभवदुक्तिकतयागौरवप्रसंगात् अदृष्टस्वीकारेतुनैवंतत्रकारणतावच्छेदककोटौविशेष्यतां
तराप्रवेशेनविनिगमनाविरहासंभवात्। यदिचस्वर्गादिरूपकार्यंप्रतिप्रतियोगितासंबंधेनयागवत्त्वेनैवहेतु

कु.का.टी.

त्वे ममुक्तपेयते ननु ध्वंसत्वस्यापि तत्र निवेशोपीति न यागध्वंसस्य व्यापारत्वे उपदर्शितरीत्या विनिगमनाविरहेण कार्य्यका

रणभाववृद्धिसंभव इति विभाव्यते तथाप्यदृष्टस्वीकारस्यावश्यकः अन्यथा कर्म्मनाशाजलस्पर्शादिनाश्यतावच्छेदका

नुपपत्तिः तथाहि कर्म्मनाशादिनाश्यतावच्छेदके न यागध्वंसत्वं ध्वंसस्य नाशानंगीकारात् प्रकारांतरस्य तन्नाश्यताव

10 च्छेदकस्यादृष्टास्वीकारेऽसंभवः अदृष्टस्वीकारे तु धर्म्मत्वादेरेव तथात्वसंभव इति यत्तु अदृष्टास्वीकारे कर्म्मनाशास्प

र्शादिनाश्यतावच्छेदकानिर्वचनेपि क्षतिविरहः स्वर्गादिकार्यं प्रति कर्म्मनाशास्पर्शादिध्वंसस्य प्रतिबंधकत्वांगीकारेण

कृतकर्म्मनाशाजलस्पर्शादिमतः स्वर्गादिरूपकार्य्यानुत्पादसंभवात् न चैवं रीत्या कर्म्मनाशास्पर्शादिस्थले फलानुत्प

त्तिनिर्वाहेपि प्रायश्चित्तादिनाश्यतावच्छेदकानिर्वचनानुरोधेनादृष्टस्वीकार आवश्यक इति अत्र चिंतामणिकारमतदूष राम

णोपायस्य मुक्तिवादे प्रदर्शितत्वादिति वाच्यम् तत्रापि विजातीयदुःखत्वावच्छिन्नं प्रति तत्तत्कर्म्मोद्देश्यकप्रायश्चित्तादिध्वं

सस्य प्रतिबंधकत्वकल्पनेनैवोपपत्त्या अदृष्टस्वीकारस्यानावश्यकत्वादिति तन्न एवं सति कृतज्योतिष्टोमादेः कीर्त्तनानं १०

तरं ज्योतिष्टोमाद्यंतरकरणेऽपि स्वर्गादिरूपकार्यानुत्पादापत्तेः ज्योतिष्टोमकीर्तनध्वंसात्मकप्रतिबंधकस्य तत्पूर्वकाले स-
त्त्वात् [illegible] सस्यानंत्यात्. नन्वत्र तज्ज्योतिष्टोमादिजन्यस्वर्गत्वावच्छिन्नं प्रति तत्तज्ज्योतिष्टोमादिकीर्तननाशत्वेन प्रतिबंधकत्वा-
भ्युपगमे न दोष इति वाच्यम्। विजातीयस्वर्गत्वावच्छिन्नं प्रति ज्योतिष्टोमादेः सामान्यतो हेतुत्वस्य कल्पनावश्यकत्वात् कीर्तन-
विषयीभूतज्योतिष्टोमस्याप्यग्रिमज्योतिष्टोमजं स्वर्गं हेतुतया तस्यापि तज्जन्यत्वाद्यतत्त्वेनोक्तानुपपत्तितादवस्थ्यात् तत्त-
द्व्यक्तित्वावच्छिन्नं प्रति तथाविधप्रतिबंधकत्वकल्पनं तु न युक्तिसिद्धं गौरवात्. अदृष्टस्वीकारे तु विजातीयादृष्टनाशत्वावच्छिन्नं प्र-
ति ज्योतिष्टोमादिविषयककीर्तनत्वेन जनकत्वाभ्युपगमान्न कीर्तनादिस्थले फलोपपत्तिः। न वा प्रथमज्योतिष्टोमकीर्तनानं-
तरं ज्योतिष्टोमांतरकरणेऽपि फलानुपपत्तिः कीर्तनस्य शब्दप्रयोगरूपतया द्वित्रिक्षणमात्रावस्थायित्वेनाग्रिमज्योतिष्टोमजन्यादृ-
ष्टोत्पत्तिकाले तस्यासत्त्वेन तज्जन्यादृष्टनाशासंभवेन तस्मात् फलोत्पत्तौ बाधकाभावात्। एवं प्रायश्चित्तादिस्थलेऽपि बोद्धव्यम्। अ- रतिब २
ज्ञातिनवीनाः कीर्तनादिनाश्यतावच्छेदकनिर्वचनानुरोधेनापि नादृष्टसिद्धिः। अदृष्टास्वीकर्तॄणां तथाऽकल्पनात्. नन्वेवं सति के-

तज्ज्योतिष्टोमादिकीर्त्तिमतः पुरुषस्यापि रूपफलापत्तिः स्वर्गादिव्यक्तीनां देशनियमायत्तत्तत्स्वर्गत्वावच्छिन्नं प्रतितत्तद्यागध्वंसादेस्त
त्तद्व्यक्तित्वेन हेतुत्वकल्पनस्यावश्यकतया ज्योतिष्टोमत्वादिरूपसामान्यधर्मावच्छिन्नेन विजातीयस्वर्गत्वाद्यवच्छिन्नसहकृतज्यो
तिष्टोमध्वंसादेरभावात् कीर्त्तनविषयीभूतज्योतिष्टोमध्वंसस्य तत्तत्स्वर्गत्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुत्वकल्पनस्य निष्फल
तया तथा हेतुत्वाकल्पने न प्रयोजनविरहेण च विजातीयस्वर्गत्वावच्छिन्नोत्पादकसामग्रीव्यावृत्तेस्तस्यानिवेशात्. न च सामान्यधर्मा
११ वच्छिन्नेन कार्य्यजननीये तत्तद्व्यक्तित्वावच्छिन्नस्य सहकारित्वाभ्युपगमे सामान्यकार्य्यकारणभावलोपापत्तिरिति वाच्यम् तथा
सत्यपि तत्क्षत्यभावात्। वस्तुतस्तु विशेषकार्य्यकारणभावकल्पनेऽपि सामान्यकार्य्यकारणभावकल्पनावश्यकत्वस्यानुमि
तिपरामर्शविचारे व्यवस्थापितत्वादिति प्राहुः. ननु भोग्यनिष्ठमेवातीन्द्रियादृष्टं तिष्ठतु न चैवं भोगस्य प्रत्यात्मनियमा राम
नुपपत्तिस्तत्तदात्मीयभोगं प्रति भोग्यनिष्ठादृष्टविशेषाणां करतलादिनिष्ठदाहानुकूलवह्निनिष्ठशक्तिविशेषाणामिव
वे हेतुत्वाभ्युपगमेनानुपपत्त्यभावात्. न च दृष्टान्तासिद्धिस्तथाविधशक्तिविशेषे प्रमाणाभावादिति वाच्यं तथाविधशक्तौ

नंगीकारे मणिसत्त्वेपि दाहापत्तेः। न च मणेस्तत्र प्रतिबंधकत्वान्न तादृशापत्तिरिति वाच्यम् कारणत्वस्य भावत्वव्या
प्यतया मण्यभावादेर्हेतुत्वासंभवेन मणेस्तत्र प्रतिबंधक[redacted]तया असंभवदु
क्तिकत्वात्· भवतु वा तत्र तत्प्रतिबंधकं तथापि शक्तिस्वीकार आवश्यकः शक्तिनाशकत्वेनैव तस्य तत्र प्रतिबंधकत्वांगी
कारात् प्रतिबंधकत्वस्य कारणाभावसंपादकत्वरूपत्वादित्यत आह भावो यथा भावः कारणं कार्य्यवन्मतः· प्रतिबंधो विसाम
ग्रीतद्धेतुः प्रतिबंधकः· भावो वह्न्यादिर्यथा कारणं तथा मण्यभावोपि तद्ग्राहकान्वयव्यतिरेकानुविधायित्वस्य तत्र सत्त्वात् का
रणत्वस्य भावत्वव्याप्यत्वे दूषणमाह· कार्य्यवदिति यथा ध्वंसरूपाभावः कार्य्यः तथा प्रकृतेपीत्यर्थः। अन्यथा कार्य्यत्वस्या
पि भावत्वमुपेत्य ध्वंसस्यापि कार्य्यत्वांगीकारस्याचितत्वादिति भावः। मण्यादेः शक्त्यादिनाशकत्वेनैवोक्तप्रतिबंधकत्वमि
त्यत्र दूषणमाह· प्रतिबंध इत्यादि विसामग्री कारणाभावः प्रकृते मण्यादि तद्धेतुस्तत्प्रयोक्ता तथा च प्रकृते मणिप्रयोक्ता
पुरुषो विनिरुक्तः प्रतिबंधकः· मण्यादौ प्रतिबंधकत्वं तु कारणीभूताभावप्रतियोगित्वं पूर्वोक्तं वदेत् तस्यापि प्रतिबंधकत्वपदा

थत्वात्. तथा च मण्यादेः प्रतिबंधकत्वेन शक्तिसिद्धिरावश्यकीति भावः। न च वह्नित्वावच्छिन्नं प्रति मणित्वादिना नानाप्रतिबं
धकत्वकल्पने गौरवेण लाघवादकुंठितवह्न्यादिनिष्ठशक्तिविशेषमंगीकृत्य तस्यैव तत्र हेतुत्वकल्पनमुचितमिति
१२ वाच्यम्। मणिसत्त्वे उत्तेजकौषधादिसत्त्वेपि दाहोत्पत्त्यापत्तेः। तत्र शक्तेस्तत्कुंठितहेतुमण्यादिसत्त्वेनाकुंठित
त्वाभाववत्तया अकुंठितत्वरूपकारणतावच्छेदकावच्छिन्नशक्तिरूपकारणस्याभावात्। न च तत्रोत्तेजकानां कुंठन
नाशकत्वांगीकारान्न दोष इति वाच्यं तथापि तावत्कल्पने गौरवेण लाघवान्मण्यभावत्वेनैव हेतुत्वकल्पनस्योचितत्वा
दित्यलमावेशेन। ननु व्रीहिप्रोक्षणादेः कालांतरभाव्यपूर्वजनकत्वं व्यापारं विनाऽनुपपन्नमिति तत्र शक्तिवि
घ२ शेषरूपव्यापारो व्रीहावेव कल्प्यते यो यज्जन्यफलार्थितया क्रियते स तज्जन्यातिशयजनक इति नियमात्। न चैतादृशनि राम
यमस्याप्रयोजकत्वात् तत्रात्मनिष्ठादृष्टविशेषरूपव्यापारकल्पनमुचितमिति वाच्यम्. तथा सति तस्य स्वावघातं प्रति स्वाश्र
यसंयोगित्वरूपपरंपरासंबंधेन हेतुतया अप्रोक्षितव्रीहावपि तेन संबंधेन तस्य सत्त्वेन तत्रावघातापत्तेर्दुर्वारत्वात्। एवं १२

च प्रकृतेपि यागादितः शक्तिविशेषरूपव्यापार एव भोग्यस्रक्‌चंदनादौ स्वीक्रियतां न त्वदृष्टविशेष आत्मनीत्यत्राह संस्का
रः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः स्व गुणाः परमाणूनां विशेषाः पाकजादयः प्रोक्षणाभ्युक्षणादिभिः संस्कारः अदृष्ट
विशेषरूपः पुंस एवेष्टः पुरुष एवोत्पद्यते इति पूर्वदलार्थः हेतुस्तु सः सर्वथा तत्र शक्तिरूपव्यापारविशेषस्य ब्रीहिनिष्ठत्वे
न कल्पने अनंतब्रीहिषु तत्कल्पनाप्रयुक्तगौरवस्य दुष्परिहरत्वात् न चैवं सति अववघातं प्रति तादृशव्यापारविशेषस्य
स्वाश्रयसंयोगित्वरूपपरंपरासंबंधेनैव हेतुतया अप्रोक्षिते ब्रीहावपि तदापत्तिरिति वाच्यम् स्वाश्रयनिरूपितविजाती
यसंयोगस्यैव तत्र कारणतावच्छेदकसंबंधत्वांगीकारादिति। केचित्तु ब्रीहिषु शक्तिविशेषरूपव्यापारस्वीकारे एकब्रीहिना
शे तन्नाशापत्तिरित्यात्मनि तादृशव्यापारस्वीकारे युक्तिमाहुस्तन्न सम्यक् तादृशशक्तिनाशं प्रति यावद्ब्रीहिनाशत्वे
हेतुत्वे नैकल्पने तादृशदोषस्य परीहारसंभवादिति। ननु अत्र लाघववबलात् व्यापार आत्मन्येव स्वीक्रियते न तु ब्रीहौ तत्
दा नानापुरुषोद्देश्यक गयाश्राद्धादिस्थलेपि अदृष्टविशेषस्य तत्तत्कर्तरि स्वीकारप्रसंगस्तत्रापि एकत्र तत्स्वीकारे लाघ

वसंभवात् तथा च तत्र फलजनकादृष्टस्यापि त्तादावेव स्वीकार इति सिद्धांतो व्याहन्येत। न च तत्र फलवैयधिकरण्याददृष्टस्य न तथा
13 त्वमिति वाच्यं तादृशबाधकस्य श्रीश्राद्धादिस्थलेपि तुल्यत्वादिति चेन्नैवम्। अदृष्टस्य फलसामानाधिकरण्येपि नानापुत्रकृतएक
पित्रुद्देश्यकगयाश्राद्धादिस्थले एकस्मिन् पितरि अदृष्टस्वीकारे लाघवसंभवात्। न चैवं सत्यदृष्टस्य कर्तृसामानाधिकरण्यं
फलसामानाधिकरण्यं वेत्यत्र विनिगमनाविरह इति वाच्यम्। अदृष्टस्य कृतिसामानाधिकरण्यनियमे फलं प्रति तस्य स्वाश्र
यविजातीयसंयोगित्वादिरूपपरंपरासंबंधेन हेतुत्वकल्पने गौरवापत्तेर्विनु तस्य फलसामानाधिकरण्यनियमाभ्युपगमा
त्। ननु अदृष्टस्य फलसामानाधिकरण्यनियमेपि अदृष्टं प्रति गयाश्राद्धादेः परंपरासंबंधेन हेतुत्वकल्पनेन गौरवात् तुल्यो यमनुयोग इ
ति वाच्यम्। इष्टात्मकत्यागविशेषरूपश्राद्धस्यातिरिक्तमुद्देश्यत्वाख्यविषयताविशेषं स्वीकृत्य तेन संबंधेन तत्र हेतुत्वकल्पने गौ राम
रवाभावात्। न च तत्रोद्देश्यतारूपविषयताविशेषे प्रमाणाभावः लाघववाद्विषयतासिद्धिस्तु प्रतिबंदिसहस्रकवलितत्वान्नि
रस्तेति वाच्यम्। तत्रोद्देश्यताख्यविषयताविशेषानंगीकारे श्राद्धसमानाकारकालांतरेणेच्छायामपि श्राद्धव्यवहारापत्तेरिति १२

समासः। ननु प्रोक्षणादिना चेदात्मनिष्ठमदृष्टमुत्पाद्यते न तु व्रीह्यादौ शक्तिस्तदा व्रीहीन् प्रोक्षतीत्यादौ कर्मत्वानुपपत्तिः
तस्य क्रियाजन्यफलशालित्वरूपत्वादिति चेन्न शकुनप्रोक्षतीत्यत्रेवात्रापि प्रोक्षणजन्यजलसंयोगरूपफलशालित्वात्
व्रीहेस्तद्रूपकर्मत्वोपपत्तेरिति। ननु प्रोक्षणादिना व्रीहौ शक्त्यनंगीकारेपि व्रीह्यारंभकपरमाणौ अवश्यं व्रीहिप्रयोजकशक्ति
विशेषः स्वीकरणीयः। अन्यथा व्रीहिवापे व्रीहीनां परमाण्वंतं भंगे तदारंभकपरमाणुभिर्व्रीहय एवोत्पाद्यंते न यव इत्यनिया
मकाभावः संभवः अनियतारंभवादिमते तैरपि कदाचिद्यवारंभादित्यत आह स्वगुणा इति। परमाणूनां ये पाकजादयः स्वगुणास्त
एव विशेषाः व्रीह्यादिविशेषोत्पादका इत्यर्थः। तथा च विलक्षणरूपरसादिविशिष्टाः परमाणव एव व्रीह्यारंभका इत्यभ्युपगमे नैव स
र्वसामंजस्ये तत्र तत्प्रयोजकविलक्षणशक्तिस्वीकारो निर्युक्तिक इति भावः। ननु यत्र पाकजगुणा न संभवंति एतादृशजलवाय्वा
दौ कुचिद्दृष्ट्वा तस्य स्पर्शादिकमुत्पद्यते कश्चिन्नेत्यत्र नियामकांतरासंभवेन तदनुकूलाशक्तिस्तत्रावश्यं स्वीकार्या। एवं देवताप्रति
मादौ प्रतिष्ठादिना अवश्यं चंडालादिस्पर्शनाश्यः शक्तिविशेषः स्वीकर्तव्यः। न च तत्रापि प्रतिष्ठाकर्तुरात्मन्येव प्रतिष्ठातः अदृ

ध्यवृशेषोस्त्वकिंतथाविधातिरिक्तादृष्टस्वीकारेणेतिवाच्यं तथासतिदेवताप्रतिमादौ चंडालादिस्पर्शेपितत्पूजातःफलोत्पत्त्यापत्तेः
अतिरिक्तशक्तिस्वीकारे तु चंडालादिस्पर्शेन तस्यानाशाभ्युपगमात्तदापूजाफलासंभवात् तत्पूजाजन्यफलं प्रति[illegible]दृशशक्तेर्हेतु
१५ त्वांगीकारात् न चादृष्टस्वीकारेपि तथासंभवइतिवाच्यं तादृशादृष्टस्य चंडालादिस्पर्शव्यधिकरणतया तेन तन्नाशासंभवेनोक्तानुपपत्तिता
दवस्थ्यादित्यत आह० निमित्तभेदसंसर्गादुद्भवानुद्भवादयः० देवतासन्निधानेन प्रत्यभिज्ञानतोपि वा० निमित्तभेदसंसर्गादुद्भूतानु
द्भूतरूपादितः उद्भवानुद्भवादयः उद्भूतानुद्भूतरूपादयः उत्पद्यंत इतिशेषः तथाचोद्भूतरूपत्वाद्यवच्छिन्नं प्रत्युद्भूतरूपत्वादिना हेतु
ताकल्पनेनैव उद्भूतानुद्भूतरूपाद्युत्पत्तिनियमनिर्वाहः न चोद्भूतरूपादिमज्जन्यारंभकपरमाणवं तएवानुद्भूतरूपादिमज्जन्याद्यारंभा
ततश्चावक्तुमशक्यमितिवाच्यमनियतारंभवादिमतेपि तथाकल्पने प्रमाणाभावात्। ननूद्भूतरूपत्वादिना तदा तथा हेतुत्वं वक्तुं श राम
क्यते० यदि उद्भूतत्वनिर्वचनं संभवति तदेव नास्ति तथा हि उद्भूतत्वं न जातिः शुक्लत्वादिना संकरप्रसंगात् शुक्लत्वाभाववति उद्भूतत्वमुद्भू
तनीले उद्भूतत्वाभाववति शुक्लत्वमनुद्भूतशुक्ले तदुभयं तिष्ठतीति परस्परव्यभिचारित्वाद्विशिष्टसामानाधिकरण्यरूपसांकर्यं १५

स्य संभवात्। शुक्लत्वादिव्याप्यविरुद्धभेदेनोद्भूतत्वस्य नानात्वांगीकारे तु बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रत्युद्भूतरूप हेतुतायां व्यभि-
चारप्रसंगात् तत्रोद्भूतत्वस्याननुगतत्वेनाननुगतकारणतावच्छेदकासंभवादिति चेन्नैवम्। अनुद्भूतत्वाभावकूटत्वेन स्वरूपतो उद्भूतत्वरूपत्वेन
अनुगमस्य भावात्। न चैवं सत्यप्यनुद्भूतत्वस्य दुर्वचतया तथा कार्यकारणभावकल्पनाया असंभव इति वाच्यमनुद्भूतत्वस्य जातिरूप-
त्वात्। न च तस्यापि शुक्लत्वादिना सांकर्यान्नैवमिति वाच्यम्। शुक्लत्वादिव्याप्यविरुद्धभेदेनानुद्भूतत्वस्य नानात्वात् तथा सति चनोक्तस्थले
न कारणतावच्छेदकाननुगमः। तत्तदनुद्भूतत्वकूटाभाववत्त्वविशिष्टरूपत्वस्यैव दुर्वचतया तथा कार्यकारणभावकल्पनाया असंभव इ-
ति वाच्यमनुद्भूतत्वस्य जातिरूपत्वात्। न च तस्यापि शुक्लत्वादिना सांकर्यान्नैवमिति वाच्यम् शुक्लत्वादिव्याप्यविरुद्धभेदेनानुद्भूतत्वस्य
नानात्वात् तथा सति चनोक्तस्थलेन कारणतावच्छेदकाननुगमः तत्तदनुद्भूतत्वकूटाभाववत्त्वविशिष्टरूपत्वस्यैव तत्रानुगतकारणताव-
च्छेदकत्वसंभवादित्यास्तां विस्तरेण। एवं चेत्याद्युक्तद्वितीयकल्पे दूषणमाह· देवताइत्यादि अत्र देवता इत्यनन्तरं पूजाफलदायिन्य इति पूरणी-
यं तथा च संनिधानेन प्रतिष्ठाजन्यदेवताऽभेदादिज्ञानजन्यादृष्टेन देवताः पूजाफलदायिन्य इत्यर्थः। न चैवं प्रतिमायां चंडालस्पर्शे

कुका १२

सत्यपि पूजातस्तत्फलापत्तिः चंडालादिस्पर्शे तददृष्टनाशकत्वाभ्युपगमेन तदा अदृष्टरूपकारणाभावान्न फलापत्तिः। न च चंडालस्य स्पर्शे
तददृष्टव्यधिकरणतया न तथाविधनाश्यनाशकभावसंभव इति वाच्यं तददृष्टनाशं प्रति चंडालादिस्पर्शस्य तत्संयोगादिरूपस्य स्वाश्र-
यनिरूपितविजातीयसंयोगसंबंधेन हेतुत्वस्य कल्पनान्नानुपपत्तिरित्यादि बहुतरं स्वयमूहनीयम॥ प्रतिष्ठातस्तत्कर्तारं अ-
दृष्टमनभ्युपगम्य आह प्रतिज्ञात इति इयं देवताप्रतिष्ठिता इति यथार्थज्ञानादित्यर्थः। तथा च स्वाश्रयनिरूपितचंडालादिस्प-
15 र्शाभावविशिष्टं तादृशज्ञानं पूजाफलहेतुः अतो न तत्र चंडालादिपूजाफलापत्तिरिति भावः। यत्तु तुलापरीक्षादिविधिना तुलादौ
शक्तिर्जन्यते तया च नमनोन्नमनादिकमिति तन्मतं दूषयितुमाह जयेतरनिमित्तस्य वृत्तिलाभाय केवलं परीक्ष्यसमवेतस्य परीक्षावि-
षयो मतः जयस्तदितरः पराजयस्तन्निमित्तस्यादृष्टस्य परीक्ष्यपुरुषसमवेतस्य वृत्तिलाभाय अनेन विधिना तुलामारूढोऽहं पापवान्नि- राम
ष्पापो वा इति ज्ञानरूपसहकारिलाभाय परीक्षाविषयो मतः स्वीकृता इति कारिकार्थः। तथा च पराजयं प्रति अनेन विधिना तुलामारूढोऽ-
हं पापवानिति ज्ञानसहकृतादृष्टस्यानियामकत्वं मे। एवं जयं प्रति अनेन विधिना तुलामारूढोऽहं निष्पाप इति ज्ञानसहकृतादृष्टस्य १५

नियामकत्वं परीक्षाविषयस्य स्वज्ञानद्वारा तादृशज्ञानप्रयोजका न तु अदृष्टोत्पादका इति भाव इति बहवस्तन्न वस्तुगत्याऽदृष्ट
स्य तथाविधनिष्पापत्वादिज्ञाने सत्यपि जयादर्शनादिति। केचित्तु जयस्तादितरः पराजयस्तन्निमित्तस्यादृष्टविशेषस्य वृत्तिलाभाय
उत्पत्तिलाभायेत्यर्थः तथा च परीक्षाविधिभिः जयपराजयान्यतरजनकादृष्टविशेष उत्पाद्यते तेन च तथाविधान्यतरानिर्वाह इति प्राहुः तन्न
चात्र विनिगमनाविरहात् तुलायामेव शक्तिः कथं न स्वीक्रियत इति वाच्यं परस्परसंयुक्तानेककाष्ठसूत्रादेस्तुलापदार्थत्वेन तेषु त
त्स्वीकारे गौरवात् लाघवेनादृष्टविशेषस्वीकारस्यैव तत्र समुचितत्वादिति। सांख्यास्तु बुद्धितत्त्वस्य धर्माः अदृष्टादिकं बुद्धितत्त्वं
च प्रकृतेः परिणामविशेषः प्रकृतिश्च तेषां मतेऽतिरिक्ताऽचेतना नित्या आदिकारणं चेतनस्तु पुरुषः स न वा कार्यं न वा कारण
मित्याहुस्तन्मतं दूषयितुमाह। कर्त्तुर्धर्म्मा नियंतारश्चेतिता च स एव नः। अन्यथानापवर्गः स्यादसंसारोऽथवा ध्रुवः। नियंतारः
कृति समानाधिकरणभोगनियामका अदृष्टादयः कर्त्तुर्धर्म्माः कृत्याश्रयस्यैव धर्म्माः नियामकस्य नियम्यसमानाधिक
रणत्वनियमादिति भावः। स एव कर्तैव चेतिता चैतन्याश्रयः नोऽस्माकं नैयायिकानामिति यावत्। अन्यथाकृतेः स्वसमा

(2)

नाधिकरणत्वानसाध्यत्वानुपपत्तिः चेतनोऽहं करोमीति बुद्धेर्भ्रमत्वापत्तिश्चेति भावः। एतेनाचेतनबुद्धितत्त्वधर्मत्वं धर्म्माधर्म्मा
दीनिरस्तम्। धर्म्माधर्म्मादीनां बुद्धितत्त्वधर्मत्वे दूषणांतरमप्याह॰ अन्यथेति। बुद्धितत्त्वे धर्म्माधर्म्मादिस्वीकारे इत्यर्थः। अनिर्मो
16 क्षप्रसंगादिति मुक्तिविलोपप्रसंगादित्यर्थः। नित्यबुद्धितत्त्वगतधर्म्माधर्म्मजन्यभोगावच्छेदकस्य सर्वात्मनः सर्वदा सत्त्वादि
ति भावः। इदं च बुद्धितत्त्वस्य नित्यत्वांगीकारपक्षे बोध्यम्· तस्यानित्यत्वाभ्युपगमे दोषमाह॰ असंसारोऽथवा ध्रुवः इति संसारस्यै
ववाउच्छेदप्रसंग इत्यर्थः। यदि बुद्धितत्त्वस्यानित्यत्वं तदा तज्जन्यमवश्यं वाच्यम्। अनित्यभावस्य जन्यत्वनियमात्। एवं च बुद्धि
तत्त्वोत्पत्तिपूर्वकाले बुद्धितत्त्वाभावेन तदाश्रितधर्म्माधर्म्मादेरप्यभावात्॰ बुद्धितत्त्वोत्पादस्यैवासंभवः· तदनुत्पत्तौ तु तत्कार्य्यश
रीरेंद्रियादेरभावेन संसारस्य उच्छेदप्रसंग इति भावः। ननु भवेतु धर्म्माधर्म्मादयश्चेतनधर्म्माः चेतनस्तु न नित्यो विभुः किंतु शरी राम
रमेव गौरोऽहं जानामीत्यादिप्रतीत्या चैतन्ये गौरत्वसमानाधिकरणत्वस्य सिद्धेरिति चार्वाकमतोपरिदूषणमाह॰ नान्यदृष्टंस्म
रत्यन्यो नैकभूतमपक्रमात्· वासनासंक्रमो नास्ति न च गत्यंतरं स्थिरे॰ नान्यदृष्टमित्यादि शरीरस्य चैतन्यस्वीकारे बालत्वशा १६

(1)

रीरेऽनुभूतस्य यौवनशरीरे स्मरणं न स्यादित्यर्थः। कारणस्य कार्यव्यधिकरणत्वादिति भावः। ननु बालयौवनशरीरमेकमे
वेत्यतो न दोष इत्यत आह। नैकं भूतमिति बालयौवनशरीरं नैकमित्यर्थः। तत्र हेतुमाह। अपक्रमादिति पूर्वशरीरनाशात्परिमाणनाशं
प्रति आश्रयनाशस्य हेतुतया यौवने बालशरीरनाशानभ्युपगमे तु तद्धेतुत्वस्य त्वपरिमाणस्यापि अनाशोऽभ्युपेयः। आ
श्रयनाशं विना परिमाणनाशासंभवात् तत्र तस्य हेतुत्वात् तथा च यौवनदशायां तदुपलंभप्रसंगः। दीर्घत्वरूपपरिमाणानुपलं
भप्रसंगश्च एकपरिमाणवति परिमाणांतरानुत्पत्तिनियमेन एकत्रैककालावच्छेदेन परिमाणद्वयस्य विरुद्धत्वादिति भावः।
ननु स्मरणं प्रति स्वाश्रयजन्यत्वरूपपरंपरासंबंधेनानुभवजन्यसंस्काररूपवासनाया अपि हेतुत्वं कल्पनीयं तथा च बाल
शरीरानुभूतस्य तदारंभकयत्किंचिदवयवानुभूतत्वनियमेन तेन संबंधेन बालशरीरानुभवजन्यसंस्काररूपवास
नाया यौवनशरीरेपि सत्त्वान्नानुपपत्तिरिति अत आह। वासनासंक्रमो नास्तीति। उक्तपरंपरासंबंधेन हेतुत्वमनसंभवती
त्यर्थः। तथा सति मात्रानुभूते गर्भस्थबालकस्य स्मरणापत्तिरिति भावः। ननूक्तपरंपरासंबंधेनोपादानगतवासनाया हेतु

त्वाभ्युपगमान्न दोष इत्यत आह। न च गत्यंतरं स्थिरइति स्थिरपक्षेपुंजात् पुंजोत्पत्तेरभावात् करादिकमेव शरीरोपादानं वा
च्यं तथा च छिन्नेकरादौ तेनानुभूतस्य खंडशरीरे स्मरणं न स्यात् खंडशरीरे करादेरुपादानत्वाभावेन तत्र तेन संबंधेन कारण
त्वासनाया अभावादिति भावः। न च करेण यदनुभूतं तत् खंडशरीरारंभकावयवेनाप्यनुभूतमित्यभ्युपगमान्नानुपपत्तिरिति
वाच्यम्। यत्र करेऽनुभवानंतरं यत्खंडशरीरे घातादिना विलक्षणरूपादिकं जायते तत्र तत्खंडशरीरारंभकद्व्यणुकादौ न तादृशा
नुभवः संभवति तदा तस्याभावात् किं तु तदारंभकपरमाणावेव स्वीकार्यस्तथैव च परंपरासंबंधेन हेतुत्वमुपेयं तथा च
करेणानुभूतस्य छिन्नकरखंडशरीरे स्मरणोत्पत्त्येकिकाले शरीरांतरेपि स्मरणोत्पत्तिप्रसंगात् तत्खंडशरीरारंभकपरमाणोरपरशरी
रस्यापि आरंभकत्वसंभवादित्यलमसदृहेण। ननु शरीरस्य चेतनत्वे बाल्यशरीरेणानुभूतस्य यौवनशरीरे स्मरणानुपपत्तिरुभ
वितासा च न संभवति क्षणभंगवादिनामस्माकं मते पूर्वपूर्वपरमाणुपुंजेभ्य उत्तरोत्तरपरमाणुपुंजोत्पत्त्यंगीकारेण उत्तरप राम
रमाणुपुंजस्यैव यौवनशरीरतया उत्तरपरमाणुपुंजरूपयौवनशरीरादेव तादृशस्मृतेः संभवात् तादृशस्मृतिजनकतावा

ना० न० (1) म० वा ५

केदकीभूतकुर्वद्रूपत्वजातेस्तत्रैवाभ्युपगमेन शरीरांतरात्तदनुत्पादप्रसंगात् तथा च शरीरस्य चैतन्येन कापि क्षतिरिति
बौद्धमतं दूषयितुमाह न वै जात्यं विना तत्स्यान्न तस्मिन्ननुमा भवेत विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना वै जात्यं कुर्वद्रू
पत्वं विना न तत्स्यात् न क्षणिकत्वं स्यात् क्षणिकत्वं न सिद्ध्येदिति यावत् अयं भावः क्षणिकत्वं तदैव सिद्ध्येत् यदि कुर्वद्रूपत्वजा
तिरस्ति अन्यथांऽकुरत्वावच्छिन्नं प्रति बीजत्वेनैव हेतुत्वं कल्पनीयं तच्च न संभवति कुसूलस्थबीजादपि अंकुरोत्पत्त्या
यतः सहकार्यंतरकल्पने च गतं क्षणिकत्वेन स्थिरपक्षेऽपि बाधकाभावादिति क्षणिकत्वादिना कुर्वद्रूपत्वजातिरवश्यं
स्वीकार्या इति। ननु अस्तु कुर्वद्रूपत्वं जातिः तथा सति का क्षतिरित्यत आह तस्मिन्नित्यादि तस्मिन् कुर्वद्रूपत्वे सति अ
नुमानं भवेत धूमादिवह्न्यादिरनुमानं भवेत वह्निधूमयोर्व्याप्तिग्रहो न वे[illegible]दित्यर्थः अयं भावः उपस्थितवह्नित्वादिकं वि
हाय वह्नित्वेन हेतुत्ववक्तुमुपस्थितधूमत्वादिकं विहाय विजातीयधूमत्वेनैव कार्यतावाच्यात तथा च धूमत्वावच्छेदेन वह्निका
र्यत्वाग्रहे अनुकूलतर्काभावेन वह्निधूमयोर्व्याप्तिग्रहासंभव इति। ननु अनुमानस्याप्रमाणत्वानंगीकर्तॄणाम् अस्माकं तथापि
विजातीय

धव्याप्यग्रहे तत्यभाव इत्यत आह विनाते नेति तेन विनाऽनुमानेन विना न तत्सिद्धिः न क्षणिकत्वसिद्धिः तथा चानुमानस्य
अप्रमाणत्वे भवन्मते क्षणिकत्वासिद्धिर्न संभवति तेनैव तत्सिद्धिरिति भावः। ननु प्रत्यक्षादेव क्षणिकत्वसिद्धिर्भविष्यती
त्यत आह नाध्यक्षमित्यादि निश्चयं विना क्षणिकत्वस्य सविकल्पात्मके निश्चये विना नाध्यक्षं न क्षणिकत्वस्य निर्विकल्प
१८ के संभवतीत्यर्थः। अयं भावः। तन्मते निर्विकल्पकस्यैव प्रमात्वेन क्षणिकत्वनिर्विकल्पकादेव तत्सिद्धिरुररीकरणीया तत्तु न सं
भवति प्रमाणाभावेन क्षणिकत्वसविकल्पकोत्पत्तिकनिश्चयाभावात् ग्राहकाभावे प्रमाणाभावेन ग्राह्यस्याप्यभावादिति। केचित्तु
कुर्वद्रूपत्वं न जातिः शालित्वादिना जातिसंकरात् शालित्वाभाववति यवे कुर्वद्रूपत्वं कुर्वद्रूपत्वाभाववति कुसूलस्थशालौ शालित्वं
कुर्वद्रूपशालौ च तदुभयोः समावेशात् न च सांकर्यस्य जातिबाधकत्वे घटत्वमपि जातिर्न स्यात् मृत्त्वादिना जातिसांक
र्यादिति वाच्यम् मृत्त्वादिव्याप्यविरुद्धभेदेन नानाघटत्वाङ्गीकारात्। न चैवं सति घटो घट इत्याकारकानुगतप्रतीत्यनुप राम
पत्तिः तस्यानुगतसंस्थानवत्त्वविषयकत्वेनानुगतत्वोपपत्तेः। अथवा घटवृत्तिविजातीयैकत्वमेव घटत्वं तत्र च १२

नानुपपत्तिलेशोपीति। न चैवं कुर्वद्रूपत्वादिकमपि शालित्वव्याप्यविरुद्धभेदेन नानास्त्विति वाच्यम्। एतादृशाप्रामाणिकानंतजा
तिकल्पनगौरवेण क्षणिकपक्षस्य निरस्तत्वादित्याहुः। ननु तथापि न चैतन्न्यभूतावृत्तित्वानिश्चयः क्षणिकत्वसंदेहसत्त्वात्
न च क्षणिकत्वस्याप्रसिद्ध्या तथासंशयासंभवान्न तथाविधनिश्चये किं विद्बाधकमिति वाच्यम्। तथापि स्थैर्यसंशयस्य
विद्यमानतया तथानिश्चयासंभवादित्यत आह। स्थैर्यदृष्ट्योर्न संदेहो न प्रामाण्ये विरोधतः। एकतानिश्चयो येन क्षणे तेन स्थि
रे मतः॥ स्थैर्ये न संदेहः स एवायं घट इत्यादि तत्कालीनतत्कालीनघटयोरभेदावगाहिप्रत्यभिज्ञातस्तत्सिद्धेः। नापि तथावि
धप्रत्यभिज्ञारूपदृष्टौ संदेहोऽनुव्यवसायेन तन्निश्चयात्। नापि ज्ञानप्रामाण्यमात्रे तत्संदेहः विरोधात् संदेहे ज्ञानप्रामा
ण्यस्यापि संदेहे संदेहासिद्धिप्रसंगात्। न तु ज्ञानप्रामाण्यमात्रे संदेहः किंतु प्रत्यभिज्ञाप्रामाण्ये स [illegible] इत्यत आह। एकतेति
येन प्रमाणेनाविरुद्धधर्माविरहादिना क्षणिकस्य घटस्यैकक्षणेन नानात्वं किंत्वेकतानिश्चयस्तेन प्रमाणेन स्थिरोऽस्थिर एव क्षणोपि
नानाक्षणवर्तिनो घटस्यैकतानिश्चयो मतः संभवति एकस्य नानादेशनानाज्ञानसंबंधवत्तनानाकालसंबंधस्यापि वि

19

रोधात् स्थिरे सिद्धे उपदर्शितरीत्या ऽदृष्टस्य शरीरवृत्तित्वासंभवादन्यथानुपपत्त्या नित्यविभुवृत्तित्वसिद्धिरिति भावः। ननु आ
यातूपदर्शितरीत्या ऽदृष्टे तथापि तत्रापरलोकादिकारणत्वमनुपपन्नं कारणत्वस्यापारमार्थिकत्वे तयापारमार्थिकादृष्टवृत्तित्वासंभ
वात्। अपारमार्थिकस्यापारमार्थिकवृत्तित्वनियमात्। न च कारणत्वस्यापारमार्थिकत्वे प्रमाणाभाव इति वाच्यम्। कारणत्वस्या
पारमार्थिकत्वानंगीकारे एकस्य नीलत्वस्य घटपटादिवृत्तित्ववत् एकस्य कारणत्वस्यापि तन्तुकपालादिवृत्तित्वमुपेयं तथा च तन्
त्वादिरपि घटादिकारणत्वप्रसंगात्। एवं च पारमार्थिकनीलत्ववैधर्म्येण कारणत्वस्यापारमार्थिकत्वात्तस्यापारमार्थिकादृष्टवृत्ति
त्वमसंभवीत्यत आह। हेतुशक्तिमनादृत्य नीलाद्यपि न वस्तु सत् [redacted] तद्धेकं तत्र तत्केकमिति सा
धारणं न किं हेतुशक्तिं कारणत्वमनादृत्य नीलाद्यपि न वस्तु सत् न पारमार्थिकं तथा च पारमार्थिकनीलवैधर्म्येणाकथमपार
मार्थिकत्वं कारणत्वे साधनीयं कारणत्वं विना नीलादेरनित्यस्याप्यसिद्धेः नित्यनीले तु न प्रमाणलेशोपीति भावः। ननु आयातु राम
१८ कारणत्वमपि पारमार्थिकं तच्च स्वाभाविकमेव तथा च कारणात् सर्वदा कार्योत्पत्तिप्रसंगः स्वभावसिद्धस्य तस्य सर्वदा वर्त्त

रूप ६

मानत्वादित्यत आह तथाक्तमित्यादि तथात्वं सहकारियुक्तं तत्कारणं तत्र कार्ये शक्तं तथा च सहकार्यभावान्न सर्वदा का
रणात् कार्योत्पाद प्रसंग इति भावः। ननु कारणत्वस्य स्वाभाविकस्य नीलादिवत् सर्वसाधारण्य प्रसंग इत्यत्रेष्टापत्तिमा
ह इति साधारण्यं न किंमिति नीलादेः साधारण्यं सर्वैस्तत्त्वेन प्रतीयमानत्वं तत्र प्रकृते कारणत्वेपि सहकारिषु
रणमिति सर्वैः प्रतीयमानत्वादित्यर्थः। तथा च पारिभाषिकं सर्वसाधारण्यं नीलादिवत् कारणत्वेपीष्टमिति भावः। न
न्वपदर्शितयुक्त्याऽदृष्टस्यात्मनिष्ठत्वे तस्य नित्यत्वप्रसंगः। तथा हि नात्मा तत्समवायिकारणं नित्यस्य तस्य का
लेनोदेशात् स्वव्यतिरेकासत्त्वात् कार्यव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वं स्य कारणत्वरूपत्वात् समवायिकारणा
भावे तु प्रस्थितमसमवायिकारणनिमित्तकारणाभ्यां तयोः समवायिकारणघटितत्वात्। तथा चानित्यस्यादृष्टस्य
कथं नियतकालीनभोगादिजनकतेत्यत आह पूर्वभावो हि हेतुत्वं मीयते येन केनचित् व्यापकस्यापि नित्यस्य ध
र्मिधीरन्यथा न हि हेतुत्वं कारणत्वं पूर्वभावः। अनन्यथासिद्धनियतपूर्ववर्तित्वरूपं नतु व्यतिरेकगर्भमिति। ननु

कुकाटीर·

मी५ (२)

मास्तु हेतुत्वं तथा तद्ग्राहकं तु अन्वयव्यतिरेकानुविधायित्वं विनाऽन्यद् दुर्वचमिति तदभावान्न तत्र तद्ग्रहः संभवतीति कथ
महेतुत्वमात्मनीत्यत आह· मीयते येन केनचिदित्यादि व्यापकस्यापि नित्यस्य निरुक्त हेतुत्वं येन केनचित· अन्वय
व्यतिरेकघटितभिन्नेन मीयते गृह्यते तथा च कारणताग्राहकमपि न व्यतिरेकानुविधायित्वं किंत्वन्वयानुविधायित्वमे
वेति नात्मनि हेतुताग्रहासंभव इति भावः। ननु व्यतिरेकघटितभिन्नधर्मस्य कारणताग्राहकत्वे प्रमाणाभाव इत्यत
आह· धर्मिधीरिति अन्यथा व्यतिरेकाघ[illegible]तस्य कारणताग्राहकत्वे धर्मिधीः कथमात्मरूपधर्मिसिद्धिः कथं स्यात
अयं भावः। यदि व्यतिरेकाघटितस्य [redacted] न कारणताग्राहकत्वं किंतु तद्घटितस्यैव तत्तदा आत्मनि तद राम
भावेन कारणताग्रहासंभवात कारणत्वाभावे सुखादिकं समवायिकारणजन्यं भावकार्यत्वादित्यनुमानेन सुखादि कारण
तया आत्मसिद्धेर्विलोपप्रसंगः अप्रसिद्ध्या आत्मरूपसमवायिकारणताजन्यत्वासिद्धेः सुखादावसंभवादिति· आत्म
सिद्ध्यन्यथानुपपत्त्या व्यतिरेकाघटितस्यैव कारणताग्राहकत्वमुपेयमिति। वस्तुतस्तु· व्यतिरेकसहचारस्य कारणताग्रा

२०

हकत्वमतेपि न क्षतिः। येन संबंधेन यत्कारणतां तत्संबंधावछिन्नप्रतियोगिताकतद्व्यतिरेकसहचारस्य कारणताग्राहकत्वेन या
आत्मन्यपि कारणताग्राहकसंभवात् आत्मनस्तादात्म्यसंबंधेन हेतुतया तादात्म्यसंबंधावछिन्नतन्निष्ठप्रतियोगिताकव्यति
रेकस्यान्योन्याभावरूपस्य घटादौ सत्वेन तदंतर्भावेनात्मनोपि व्यतिरेकसहचारग्रहसंभवादिति ध्येयम॥ एवं च माया
अविद्यादिपदमप्यदृष्टपरमिति न मायिकं जगदित्यादिवाक्यविरोधोपीत्याह॰ इत्येषा सहकारिशक्तिरसमा मायादुरुन्नीति
तो मूलत्वात्प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता देवोऽसौ विततप्रपंचरचनाकल्लोलकोलाहलः साक्षात्साक्षित
या मनस्यविरतिं बध्नातु शांतो मम। इत्येषा अदृष्टलक्षणा यस्य ईशस्य सहकारिरूपा शक्तिः कारणम असमा अन्या सदृशी
ऽतो माया इत्युदिता असमत्वे हेतुमाह॰ दुरुन्नीतित इति दुःखेन निरूप्यत्वादित्यर्थः॰ मूलत्वात सर्वेषां कारणत्वात् एतेन सांख्या
भिमतातिरिक्तप्रकृतिर्दूषिता प्रबोधः तत्त्वज्ञानं तस्य भयात् तस्य विरोधात्॰ अविद्येति उदितेति संबंधः एतेन वेदांतिसंमताति
रिक्ता मूलाविद्या दूषिता॰ असौ देवः विरता विनष्टा प्रपंचस्याज्ञानादेर्चनायाः कल्लोलाः परंपरा तस्य कोलाहलः किं वदंतीय
मूलत्वात्... परंपरा

त्रतादृशः साक्षितयास्वयमेवनिर्णयकीभूयममनसिसाक्षादविरतिंसाक्षात्काररूपं ज्ञानं वद्धातु जनयतु ॥ ॥ इति
प्रथमस्तवककारिकाव्याख्यानम् ॥ ॥ ननु श्रुत्या यातु अदृष्टं तथापि न ईश्वरसिद्धिः । न चाचेतनं चेतनाधिष्ठितमेव कार्य्यं
जनकमिति नियमबलादुक्तरीत्या ईश्वरसिद्धिरिति वाच्यम् · तादृशनियमे प्रमाणाभावात् । न चाप्तोक्तत्वं शब्दप्रामाण्ये तं
21 त्रमिति वेदस्य प्रामाण्यान्यथानुपपत्त्या ईश्वरसिद्धिरिति वाच्यम् । तस्य तत्रतंत्रत्वे प्रमाणाभावात् · नित्यतया निर्दोषत्वे
नैव वेदप्रामाण्यसंभवादित्यत आह · प्रमायाः परतंत्रत्वात् सर्गप्रलयसंभवात् · तदन्यस्मिन्ननाश्वासान्न विद्यांतरसंभव
: प्रमायाः प्रमात्मकज्ञानस्य परतंत्रत्वात् · गुणजन्यत्वनियमात् अयं भावः । शाब्दप्रमां प्रति वक्तृ यथार्थवाक्यार्थज्ञानं गु
णविधया हेतुः अन्यस्य तथात्वासंभवात् तथा च ईश्वराभावे कथं वेदात् शाब्दप्रमोत्पादः स्यात् · वक्तुरभावेनोपदर्शितका राम
रणाभावादित्युपदर्शितकारणसंपत्त्यर्थमवश्यमीश्वरोंगीकार्य्य इति · न च शाब्दप्रमां प्रति योग्यताप्रमैव हेतुर्न तूपदर्शि
तवाक्यार्थज्ञानमपि · एवं च बोद्धुर्योग्यताप्रमात एव सर्वत्र वेदात् शाब्दप्रमासंभवादलमीश्वरेणेति वाच्यम् · तन्मतेप्याद्ययो २१

ग्यता प्रमाजनकीभूतज्ञानाश्रयत्वेन ईश्वरांगीकारस्यावश्यकत्वात्· अन्यथाविशेष्यतासंबंधेन तद्विशिष्टविषयक
प्रमात्वावच्छिन्नं प्रतिविशेष्यतासंबंधेन तद्विशेषणवद्विशेष्यकज्ञानत्वेन हेतुत्वस्य सामान्यकार्यकारणभावानु
रोधेनावश्यकतया ईश्वरज्ञानाभावे तथाविधसामान्यकारणस्याभावेनाद्येयोग्यताप्रमाया उत्पादस्याशक्यत्वादि
ति ननु प्रमाया गुणजन्यत्वे प्रमाणाभावः प्रमात्वस्यार्थसमाजग्रस्ततया जन्यतावच्छेदकत्वासंभवात् तथा च
कथमीश्वरसिद्धिरित्यत आह· सर्गप्रलयसंभवादिति· सर्गप्रलययोर्व्यवस्थापकत्वादित्यर्थः। तथा चेश्वरानं
गीकारे सर्गाद्यकाले वेदप्रामाण्यग्रहासंभवः· तदानीं महाजनाद्यभावेन तत्परिग्रहेण तदा वेदप्रामाण्यग्रहासं
भवादिति सर्गाद्यकाले वेदप्रामाण्यग्राहकतया ईश्वराभ्युपगम आवश्यक इति भावः। न च वेदे प्रमितिजनकत्वस्य
प्रामाण्यग्रहस्यानपेक्षिततया तदभावे ज्ञप्त्यभावान्न सर्गाद्यकाले तद्ग्रहार्थमीश्वराभ्युपगम आवश्यक इति वा
च्यम्· तथापि वेदजन्यप्रमायां प्रामाण्यग्रहस्य विनेश्वराभ्युपगममशक्यतया तत्र तद्ग्रहार्थमीश्वरांगीकारस्यावश्य

कत्वात् तदंगीकारे तु तज्जन्यवाक्यजन्यत्वेन तत्र प्रामाण्यग्रहसंभवात् शाब्दप्रमायां प्रामाण्यग्रहो निरर्थक इति तु न
शंकनीयं गृहीतप्रामाण्यकज्ञानस्य प्रवर्तकतया तत्र प्रामाण्यग्रहं विना तस्मात्प्रवृत्त्यसंभवादिति। ननु भवत्वेवं
प्रामाण्यस्य परतस्त्वे तदेव न तस्य स्वतस्त्वानभ्युपगमादिति चेन्न तस्य निराकृतत्वात्। तथा हि· तत्र प्रामाण्ये प्रा
माण्यग्रहप्रतिबंधकाभावकालीनप्रामाण्याश्रयीभूतयावज्ज्ञानविषयत्वं गुरुमते स्वतस्त्वं तन्मते विचारांगविप्रतिपत्ति
स्तु घटत्ववद्विशेष्यतानिरूपितघटत्वप्रकारतारूपप्रामाण्यविषयिता तत्प्रामाण्यग्रहप्रतिबंधकाभावकालीनत
त्प्रामाण्याश्रयीभूतग्रहत्वव्यापिका न वेत्याकारिका। अत्र नैयायिकपरिगृहीतनिषेधकोटेः प्रसिद्धिः पटत्वविषयित्वा राम
दौ गुरुपरिगृहीतविधिकोटिप्रसिद्धिस्तु घटत्वविषयित्वादौ· अत्र गुरुमतानुयायिनः· व्यवसायस्यानुव्यवसायाभ्युपगमे स
र्वत्र व्यवसायोत्तरमनुव्यवसायकल्पने गौरवमिति लाघवात्· व्यवसायस्य व्यवसायोत्पादकसामग्रीजन्यग्रहविषयत्वरू
पस्वप्रकाशत्वमभ्युपेयते। एवं च तत्र प्रामाण्यमाने बाधकाभावः· तद्ग्रहजनकीभूतबाधाभावादेः पूर्वसत्त्वादित्याहुस्त २२

दसत्तथासति व्यवसायतृतीयक्षणे इदं ज्ञानं प्रमा न वेति प्रामाण्यसंशयो न स्यात् निश्चिते संशयायोगात्· तत्र प्रामा
ण्यसंशये इष्टापत्तिस्तु न संभवति तदुत्तरं प्रामाण्यसंशयाधीनविषयसंशयस्य सर्वानुभवसिद्धस्यापलापापत्तेः यदि
च व्यवसाये एकत्र द्वयमिति रीत्या प्रामाण्यज्ञानत्वयोर्ज्ञानांशे भानमभ्युपेत्य व्यवसायोत्तरं तथाविधसंशयद्वेषप
पाद्यते तत्र च न कोऽपि दोषस्तादृशज्ञानस्य प्रामाण्यांशे निधर्मितावच्छेदकतया तथाविधसंशये तस्याप्रतिबंधकत्वादि
ति विभाव्यते तथापि गुरुमते सर्वत्र ज्ञाने ज्ञानविषयत्वाभ्युपगमे आत्मत्वरूपेणात्मभानाभ्युपगमोप्यावश्यकः
अन्यथा आत्मयोग्यविशेषगुणभानासंभवात् तस्यात्मविनिर्मोकेण भानानभ्युपगमात् तथा च यत्र पर्वतोद्देश्य
क वह्निविधेयकानुमितिं प्रति वह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिसंशयान्यत्वविशि
ष्टज्ञानरूपतथाविधनिश्चयत्वेन हेतुत्वं तत्र तादृशविशेष्यताशालित्वविशिष्टसंशयान्यत्वविशिष्टात्मत्वज्ञानत्वादे
रपि विषयितासंबंधावच्छिन्नतादृशजनकतावच्छेदकत्वमादाय विनिगमनाविरहो गुरुमते दुर्वारः· एवं यत्र यत्र ज्ञानस्य

हेतुत्वं तत्र तत्रैवं तथा विघ विनिगमनाविरहेण कार्य्यकारणभावबुद्धेर्गुरुमते दुष्परिहरैवेति सर्वत्रानुव्यवसायस्वी
कारएवोचितः॰ एवं च गतं व्यवसायस्य प्रामाण्यविषयकत्वाभ्युपगमेन घटमित्यादौ भाने घर्म्मभानासंभवात् तःशब्दगंधादि
स्थलेत्वन्यथानुपपत्त्यात घांगीकारादित्यधिकं प्रामाण्यवादेऽनुसंधेयम्। मुरारिमिश्रमते प्रामाण्यस्य स्वतस्त्वं तु प्रा
१३ माण्यग्रहप्रतिबंधकाभावकालीनप्रामाण्याश्रयज्ञानविषयकयावज्ज्ञानग्राह्यत्वं तन्मते विचारांगविप्रतिपत्तिस्तु प्रा
माण्यग्रहप्रतिबंधकाभावकालीनप्रकारत्वविशेष्यत्वादिज्ञानाभावकालीनानुव्यवसायव्यक्तिमेतद्व्यक्तित्वेन ध
त्वा एतद्व्यक्तिः प्रामाण्यविषयिणी नवेत्याकारिका अत्र विधिकोटिर्मिश्राणां निषेधकोटिस्तु नैयायिकानाम्। अत्र मिश्रा
नुयायिनः प्रकारकत्वे विशेष्यकत्वादेः प्रतियोगित्वादेरिवानुपस्थितस्यापि भानाभ्युपगमेन प्रथमानुव्यवसायेत
ज्ञाने बाधकाभावेन घटत्ववद्विशेष्यकत्वविशिष्टघटत्वप्रकारकत्वरूपप्रामाण्यादिभानेपि बाधकाभावः। एवं च सर्व राम
त्रानुव्यवसाये प्रामाण्यभानसंभवे प्रामाण्यस्योत्पत्तौ स्वतस्त्वं स्वपदमित्याद्युक्तं तदसत्। घटत्ववद्विशेष्यकत्वविशिष्टघ २२

टत्वप्रकारकत्वं न प्रामाण्यं तस्य पटत्वेन घटविषयको घटत्वेन घटविषयको यो भ्रमस्तत्साधारण्यात् किंतु घटत्ववद्विशे
ष्यतानिरूपितघटत्वप्रकारत्वादिरूपं तस्य च ग्राहकं न केवलं बाधाभावादि प्रकारत्वादिज्ञानाभावदशायां बाधाभावादिज्ञा
त अतीतज्ञानादौ तद्बोधानुदयात् किंतु प्रकारत्वादिज्ञानसहकृतं बाधाभावादि तद्ग्राहकम्। एवं च प्रकारत्वादिज्ञानं विना
प्रथमानुव्यवसाये प्रामाण्यभानस्यासंभवदुक्तिकतया तथाविधस्वत्वस्यापि प्रामाण्ये संभवादित्यधिकमन्यत्रानु
संधेयम्। भट्टानां मते प्रामाण्यस्य स्वतस्त्वं तु ज्ञाततालिंगकानुमितिग्राह्यत्वं तन्मते विचारांगविप्रतिपत्तिस्तु घटत्ववद्विशेष्यक
त्वविशिष्टघटत्वप्रकारकत्वमेतत्प्रामाण्यविषयकत्वेन नैयायिकमतसिद्धभिन्नं यज्ज्ञानं तद्विषयो न वेत्याकारिका। अत्र
विधिकोटिर्भट्टानां निषेधकोटिर्नैयायिकानाम्। अत्र भट्टमतानुयायिनः। घटो ज्ञात इति प्रतीतिविषयत्वेन ज्ञातताख्या
तिरिक्तपदार्थविशेषोऽवश्यमभ्युपेयस्तस्य समवायिकारणं घटादि निमित्तकारणं घटत्वप्रकारकं ज्ञानादि। एवं च तादृश
ज्ञातता प्रत्यक्षानन्तरं घटो घटत्वप्रकारकज्ञानविषयः घटत्वप्रकारकज्ञाततावत्त्वादित्यनुमानात्प्रामाण्यग्रह इत्याहुस्त

दृष्यसतः ज्ञाततायानिर्युक्तिकत्वेनासिद्धतया तल्लिंगकानुमित्याप्रामाण्यग्रहस्यसुतरामसिद्धत्वात्. नच ज्ञाततांगीका
रे घटोज्ञात इति प्रतीतेरनुपपत्तिरिति वाच्यम्. ज्ञानविषयत्वेनैव तादृश प्रतीतेरुपपत्तेः अन्यथा घट इष्ट इति प्रतीति विषयत्वे
नेष्टत्वाख्यातिरिक्तपदार्थविशेषस्यापि सिद्धिप्रसंगात् इत्यधिकमन्यत्रानुसंधेयम्। ननु सर्गाद्यकालेपि वेदप्रयोक्तारःकपि
२५ लादयएव भवेयुस्तत्प्रयुक्तवाक्यजन्यत्वेनच तदा वेदजन्यबोधानां प्रमात्वमनुमेयं किमीश्वरेण न च तेषामतीन्द्रियरूपवेदा
र्थगोचरज्ञानासंभवेन वेद[redacted]प्रयोज्यत्वासंभवेन वेदप्रयोज्यत्वासंभवः वाक्यार्थज्ञानं विनावाक्य
प्रयोगविशेषासंभवादिति वाच्यम्. पूर्वसर्गसिद्धयोगजधर्मरूपालौकिकप्रतीत्यातेषामपितथाविधवेदार्थज्ञानसंभवा
त्यत आह. तदन्यस्मिन्निति. तदन्यस्मिन् ईश्वरान्यस्मिन् कपिलादौ अनाश्वासात् सर्वज्ञत्वेनाप्रमाणवाक्यात्. न विधांतरसंभ राम
वः। ईश्वरं विना सर्गाद्यकाले वेदजन्यबोधे प्रामाण्यग्राहकांतरासंभवोऽयं भावः। यदि कपिलादयः सर्वज्ञाः विश्वनिर्माणादिसम
र्थाः प्रतिसर्गविभिन्नाः स्वीकार्याः तर्हि लाघवादेकएव तादृशः स्वीक्रियतां सएवईश्वरः। अथ ते सर्वज्ञाः तर्हि तद्वचसिनाश्वा २८

त्वा३

सः तथा च वैदिकव्यवहारविलोपापत्तिरिति न विधांतरसंभवः ईश्वरानंगीकारे इति। ननु सर्वमिदं संभवति॰ यदि प्रलये वेद
स्य विच्छेदः तदैव न वर्णानां नित्यतया वर्णात्मकस्य तस्यापि नित्यत्वात् तथा च सर्गाद्यकाले वेदजन्यबोधप्रामाण्यग्रहो नित्यत्वे
नयन्निर्दोषत्वं तद्विशिष्टशब्दजन्यत्वेनैव भविष्यति किमीश्वरेण ननु उत्पन्नो गकारो विनष्टो गकार इत्यादिप्रतीतीनां वि
नागकारादेरुत्पत्तिविनाशस्वीकारमनुपपन्नतया तेषां तथाविधानित्यत्वस्वीकार आवश्यक इति वाच्यम् उत्पन्नो गका
र इत्यादिप्रतीतीनां स्वाश्रयवायुसंयोगव्यंग्यत्वरूपपरंपरासंबंधेन वायूत्पत्त्यादिविषयकत्वकल्पनेनैवोपपत्तौ वर्णानाम
नित्यत्वाभ्युपगमस्यानावश्यकत्वात्। न च तादृशप्रतीतीनां परंपरासंबंधेन वायूत्पत्त्यादिविषयकत्वकल्पने गौर
वमिति वाच्यम्। अनंतगकारादीनामुत्पत्तिविनाशकल्पने गौरवापेक्षया तत्कालीनगकारे तत्कालीनगकाराभेदावगा
हिन्याः स एवायं गकार इत्याकारकप्रत्यभिज्ञाया विना वर्णानां नित्यत्वस्वीकारमनुपपन्नतया च तादृशप्रतीतीनां तथावि
धपरंपरासंबंधेन वायूत्पत्त्यादिविषयितायाः कल्पनस्यैव सम्यक्त्वात्। न च वर्णानां नित्यत्वाभ्युपगमे विजातीयवायुसं

योगस्य कार्यतावच्छेदकं गकारादिप्रत्यक्षत्वं तेषां मते वायुसंयोगस्य वर्णव्यंजकत्वात् वर्णानामनित्यत्ववादिनां तु तस्य का
र्यतावच्छेदकं गत्वादिकं तेषां मते तस्य वर्णोत्पादकत्वात् तथा च वर्णनित्यत्वाभ्युपगमे वायुसंयोगकार्यतावच्छेदकं ज्ञा घव
संभवेन तस्य तदेवोचितमिति वाच्यम्। मन्मतेऽपि विषयिता संबंधेन गादेरेव तदवच्छेदकत्वांगीकारात्· न च गत्वादेर्हि वायि
तासंबंधावच्छिन्नतदवच्छेदकत्वमादाय विनिगमनाविरह इति वाच्यम्। अगृहीतकत्व खत्वादिकशब्दरूपकोऽज्ञाहत्वादिस्यत्वेन
त्वाविषयकशब्दत्वादिना गकारादिविषयकस्य प्रत्यक्षस्यासंग्रहेण तथा च व तुमशक्यत्वात् तथा चोपदर्शितयुक्त्या वर्णानां
नित्यत्वाभ्युपगमे बाधकाभावेन तेन्स्वरूपस्य वेदस्यापि नित्यतया प्रलये तद्विच्छेदासंभवान्नोपदर्शितयुक्त्या ईश्वरसिद्धिरि
ति चेन्नैवम्· वर्णानां नित्यत्वाभ्युपगमे सर्वदा वर्णानां प्रत्यक्षापत्तिः· तत्तत्पुरुषीयशब्दश्रावणत्वावच्छिन्नं प्रति हेतुत्वेन राम
ल्के तस्य तत्तत्पुरुषीयकर्णावच्छिन्नसमवायस्य सर्वदा तत्र सत्त्वात्· न च वर्णप्रत्यक्षे वायुसंयोगविशेषाणां विशिष्यहे
तुत्वस्य कल्पनीयतया सर्वदा तदभावान्न तत्प्रत्यक्षापत्तिरिति वाच्यम्। तथापि तत्तत्पुरुषीयकर्णावच्छिन्नसमवायरूपसा २४

मान्यकारणबलात् सर्वदा तदापत्तिसंभवात्। न च तथाविधसामान्यकारणेन फले जननीये विजातीयवायुसंयोगस्य स
हकारित्वाभ्युपगमान्नैवमिति वाच्यम्। वायुसंयोगं विनापि तथाविधसामान्यकारणेन ध्वनौ प्रत्यक्षजननात् तस्य तत्सह
कृतत्वासंभवात्। न च ध्वनिप्रत्यक्षत्वावच्छिन्नं प्रति ध्वनिरपि विषयविधया हेतुत्वेन कल्पनीय इति तथा च तादृशसाम
न्यकसामग्र्या फले जननीये वायुसंयोगध्वन्यन्यतरस्य सहकारित्वाभ्युपगमान्नोक्तापत्तिः तदा तत्र तादृशान्यतररूपस
हकार्यभावादिति वाच्यं तथाविधकार्यकारणभाव [redacted] कल्पने गौरवात्। वर्णस्यानित्यतामते सर्वदा वर्णोत्पत्त्या
ऋषीयकर्णावच्छिन्नशब्दसमवायरूपकारणविरहेण प्रत्यक्षापत्तेरसंभवात् तादृशकार्यकारणभावकल्पनेन वा
घवसंभवादित्यनया युक्त्या वर्णस्यानित्यत्वसिद्धौ तस्योत्पत्तिविनाशकल्पने गौरवस्य फलमुखत्वया अदोषत्वा
त्। न च वर्णस्यानित्यत्वाभ्युपगमे स एवायं गकार इति प्रत्यभिज्ञाया अनुपपत्तिरिति वाच्यम्। तत्कालीनगकारे
तत्कालीनगकारजातीयाभेदविषयकत्वेनैव तदुपपत्तेः। न च तथा सति तादृशप्रत्यभिज्ञायाः तज्जातीयोऽयं गकार इति

M.S. 1361

कुकाटीर·

(2)

प्रत्यभिज्ञातोऽवैलक्षण्यापत्तिरिति वाच्यम् अत्र जातित्वस्य गत्वांशे मानाभ्युपगमेन तस्यास्ततो वैलक्षण्यासंभ
वादित्यधिकं वर्णानित्यतावादेऽनुसंधेयम्। तस्मादुपदर्शितयुक्त्या वेदस्यानित्यत्वसिद्धौ प्रलये तद्विच्छेदसंभवेन सर्गाद्य
काले वेदज्ञान्यगृहस्य प्रामाण्यज्ञानं विना ईश्वरांगीकारं न निर्वहतीति तत्स्वीकार आवश्यक इति सारम्। ननु सति
२६ प्रलये उपदर्शितरीत्या ईश्वरः सिद्ध्यति स एव नास्ति प्रमाणाभावात् तत्स्वीकारे अहोरात्रमव्यवहिताहोरात्रपूर्वकमिति नि
यमभंगापत्तेः। कालत्वस्य भोगव्याप्यत्वभंगापत्तिश्च· एवं प्रलयाभ्युपगमे आधुनिकानां ब्राह्मणत्वाभावापत्तिः ब्रा
ह्मणजन्यस्यैव ब्राह्मणत्वाभ्युपगमेन सर्गाद्यकाले समुत्पन्नस्य तज्जन्यत्वाभावेन ब्राह्मणत्वाभावात् इदानींत
नानां सुतरां तज्जन्यत्वाभावसंभवात्। एवं शाब्दव्यवहारविलोपापत्तिश्च· प्रयोज्यप्रयोजकवृद्धयोरभावेन शक्ति राम
तग्राहकप्रयोज्यवृद्धप्रयोजकवृद्धव्यवहाराभावात्। घटादिनिर्माणे पुण्यस्य पूर्वपूर्वतद्दर्शनसापेक्षस्य सर्गा
द्यकालेऽसंभवेन घटादिसंप्रदायोच्छेदापत्तेश्चेत्यत आह। वेदादिवदेवापि विविर्गरोधः सुषुप्तिवत्। उद्भिदृष्टिक २६

किन्२ संब्रघ२

वह्न्यैग्मायावत्समयादयः वर्षादिवत वर्षादिनमव्यवहितवर्षादिनपूर्वकं वर्षादिनत्वादित्यनुमाने कर्कटासिंहान्या
तरराश्यवच्छिन्नरविपूर्वकत्वरूपोपाधिवत भवोपाधिरहोरात्रत्वेनाव्यवहिताहोरात्रपूर्वकत्वे सत्वे ऽव्यवहितसं
सारपूर्वकत्वमुपाधिः तथा चोपाधिसत्वान्न तथाविधानुमानात् ताद्दशहोरात्रेऽव्यवहिताहोरात्रपूर्वकत्वं साधयितुं शक्य
त इति भावः। कालत्वस्य भोगव्याप्यत्वं दूषयति-वृत्तिनिरोध इति वृत्तिनिरोधः अदृष्टरोधः। सुषुप्तिवत-सुषुप्तिकालवत्
तथा च सुषुप्तिकाले यथा कतिपयादृष्टानां निरोधः तथा कदाचित्समस्तादृष्टनिरोधोपि संभवतीति-तथाविधानु
मानमप्रयोजकमिति भावः। इदानीतनानां ब्राह्मणत्वाभावप्रसंग इति तृतीयबाधकं निरस्यति-उद्भिदादि
उद्भिदाख्य शाकविशेषस्तंडुलकणेभ्यस्तथाविधशाकविशेषबीजेभ्य उत्पद्यते। यथा वा वृश्चिकस्य गोमयाद्वृश्चि
काद्वोत्पत्तिस्तथा सर्गाद्यकाले केवलाद्दृष्टविशेषात्। इदानीं च ब्राह्मणाद्ब्राह्मण्यामुत्पत्तिरित्यर्थः। न चैवं स्मृतिब्रा
ह्मणं प्रति ब्राह्मणस्य हेतुतायां सर्गाद्यकालीनब्राह्मणे व्यभिचार इति वाच्यम्। सर्गाद्यकालीनब्राह्मणव्यावृत्तवेजात्या

वच्छिन्नं प्रति ब्राह्मणत्वेन हेतुत्वस्य कल्पनीयतया अनुपपत्त्यभावात्। अदृष्टविशेषजन्यतावच्छेदकजातिस्तु सर्वब्रा
ह्मणसाधारणी तस्यास्तदानीतनब्राह्मणव्यावृत्तत्वे मानाभावात्। न चैवं सति ब्राह्मणं विनाप्यदृष्टविशेषेण फ[illegible]न
नीयेत तथाविधकालविशेषब्राह्मणान्यतरस्य सहकारितया अनुपपत्त्यभावात्। अथादृष्टविशेषजन्यतावच्छे[illegible]
२७ ब्राह्मणत्वस्य जातित्वोत्कीर्तनमसंगतं विश्वामित्रत्वादिना संकरप्रसंगात्। तथाहि। विश्वामित्रत्वाभाववति ब्राह्म
णत्वं सर्गाद्यकालीनब्राह्मणादौ ब्राह्मणाभाववति विश्वामित्रत्वं क्षत्रियविश्वामित्रे इति परस्परव्यभिचारिणो
स्तयोर्ब्राह्मणविश्वामित्रे सामानाधिकरण्यादिति चेन्न ब्राह्मणत्वव्याप्यविरुद्धभेदेन विश्वामित्रत्वस्य द्वैविध्यां[illegible] राम
कारात्। न च विनिगमकाभावात्· विश्वामित्रत्वव्याप्यविरुद्धभेदेन ब्राह्मणत्वस्यापि द्वैविध्यापत्तिरिति वाच्यम् ब्रा
ह्मणत्वस्य विश्वामित्रत्वव्याप्यविरुद्धभेदेन द्वैविध्ये जातिकल्पनाबाहुल्यप्रसंगात्। तथाहि। एकं ब्राह्मणत्वं वि
श्वामित्रत्वव्याप्यमपरं च तद्विरुद्धम्। एवं तुल्ययुक्त्या क्षत्रियत्वमपि तद्व्याप्यविरुद्धभेदेन द्वयम्। अन्यथावि

श्वामित्रत्वमादाय साकर्य्यापत्त्या क्षत्रियत्वस्यापि जातित्वानुपपत्तेः तथा च ब्राह्मणत्वं द्वयं क्षत्रियत्वं च द्वयमे
कं च विश्वामित्रत्वमिति पंच जातयः ब्राह्मणत्वस्य व्याप्याविरुद्धभेदेन विश्वामित्रत्वस्य नानात्वे तु जातिचतुष्टय
मात्रं कल्पनम्। तथा हि एकं ब्राह्मणत्वव्याप्यं विश्वामित्रत्वं तदेव क्षत्रियत्वविरुद्धं ब्राह्मणविरुद्धत्वं चापरं विश्वामि
त्रत्वं तदेव क्षत्रियव्याप्यमेकं ब्राह्मणत्वमेकं क्षत्रियत्वं चेति जातिचतुष्टयं तथा च लाघवाद्ब्राह्मणत्वव्याप्यविरुद्धभे
देन विश्वामित्रत्वस्यैव द्वैविध्यं न तु विपरीतमपि पंचजातिकल्पने गौरवादिति। न च विश्वामित्रशरीरमात्रवृत्त्ये
कं ब्राह्मणत्वं विश्वामित्रभिन्नब्राह्मणशरीरमात्रवृत्ति ब्राह्मणत्वं चापरम्। एवं क्षत्रियत्वेऽपि द्विविधं क्षत्रियत्व
विश्वामित्रब्राह्मणविश्वामित्रेतरसाधारणं विश्वामित्रत्वं तु नैकं प्रमाणाभावात्। तथा च ब्राह्मणत्वस्य नानात्वक
ल्पेऽपि जातिचतुष्टयमात्रमिति ब्राह्मणह ननार्थमादाय विनिगमनाविरहो दुरुद्धर एवेति वाच्यम्। ब्राह्मणत्वक्षत्रि
यत्वयोर्नानात्वे ब्राह्मणत्वावच्छिन्नं प्रति बाध्यतात्वे [illegible] क्षत्रियत्वावच्छिन्नं प्रति क्षत्रियत्वेऽपि नैरुक्ताद्वयंत

त्र परस्परव्यभिचारवारणार्थं च तथाविधकार्य्यकारणभावचतुष्टये एव कार्य्यतावच्छेदककोटौ अव्यवहितोत्तरत्वं
निवेशनीयम् । विश्वामित्रत्वस्य नानात्वेऽपि विश्वामित्रत्वेन हेतुतास्य जन्ये कार्य्यकारणभावद्वयं तत्र व्यभिचारवार
णार्थं च तथाविधकार्य्यकारणभावद्वये कार्य्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेश इति स्फुटतरमेव ला
घवमित्यलमप्रसक्तविचारेण प्रलयाभ्युपगमे व्यवहाराविच्छेदप्रतिरूपबाधकमुद्धरति मायावादिति घ
टानयनादिसंपादकस्य सूत्रसंचारितदारुपुत्रकं प्रति घटमानयेत्यादिविनियोगस्वीकारकात् मायाविनो
यथेतरेषां शक्तिग्रहोदयः तथा सर्गादौ इत्यादि प्रयोजकप्रयोज्यवृद्धशरीरद्वयाधिष्ठितात् घटानयनादिसंपादक
घटमानयेत्यादिवाक्यं नियोजकादीश्वरादेव इतरेषां शक्तिग्रहोदय इत्यर्थः (यथेतरेषां शक्तिग्रहः) समयशब्दस्य
शक्त्यर्थकत्वात् आदिपदार्थस्तु त्र कुंभकारादिशरीरपरिग्राहकादीश्वराद् घटानयनादिसंपादकशक्तिरितरेषामिति
यनादिसंपादके घटमानयेति वाक्यनियोजकेश्वरादेवेतरेषां शक्तिग्रहोदय इत्यर्थः । अतएव नमः कुलालेभ्य इ

राम

त्यादि संगच्छते। सा तावता प्रलये बाधकं निरस्य इदानीं प्रमाणमाह॥ जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्म
णः॥ ह्रासदर्शनाद्ध्रासः संप्रदायस्य मीयतां॥ संप्रदायस्य वेदादिसंप्रदायस्य वेदत्वादेरिति यावत। ह्रासोऽत्यंतोच्छे
दः स्वसमानाधिकरणवेदाद्यधिकरणध्वंसोत्पन्नं यद्यत तद्भिन्नत्वे सति ध्वंसस्तत्प्रतियोगि इति त्वमितिया
वत्. ध्वंसप्रतियोगि समवेतत्वादिति हेतुः प्रदीपत्ववदिति दृष्टांतश्च पूरणीयः। अत्र पक्षे हेतुसिद्धिपरीहारार्थमाह॥
जन्मेत्यादि पूर्वं मनसः प्रजाः बभूवुः ततः प्रजामात्रार्थिमैथुनसंभवास्ताः इदानीं संभोगकामिमैथुनात्का
कतालीयन्यायानापत्योत्पत्तिरिति जन्मह्रासः पूर्वं वर्णेषु प्रकृतिषु संस्कारकर्म ततः द्वित्रेषु ततो गर्भेषु इ
दानीं तु अपत्योत्पत्त्यनंतरं यथाकथंचित् लोकव्यवहारमाश्रित्य तत् क्रियत इति संस्कारह्रासः॥ पूर्वं सहस्रशा
खावेदाध्ययनं ततः षडंगसहितएकशाखः इदानीं तु क्वापि वेदैकशाखामात्राध्ययनमिति विद्याह्रासः आदित
दाहृत्विधर्मादिः परिग्रहस्तत्र ततस्तत्र वृत्तिह्रासो ब्राह्मणः पूर्वं कौंडिन्यवृत्तयः ततः अयाचितवृत्तयः इदानीं तु

सेवावृत्तय इत्यादिक्रमेणाज्ञेयः। धर्म्मह्रासस्तु पूर्वं चतुष्पाद्धर्म्मस्ततस्त्रिपाद्धर्म्मस्ततो द्विपाद्धर्म्मः इदानीं तु एकपा
द्धर्म्मः सोप्यश्रद्धादिमलव्याकुल इति क्रमेण बोध्यः। शक्तिर्वेदादिधारणप्रयोजिका मेधा तस्या ह्रासः पूर्वापेक्ष
२५ या इदानीं तनानां भ्रष्टो कैकमात्रधारणाव्याकुलानां स्पष्ट एव। स्वाध्यायो वेदस्तत्कर्म्म अध्ययनं तस्य ह्रासस्तु
सेवावृत्त्यादिना त्वोदरभरणमात्रव्यस्तानामिदानीं तनानां स्फुट एवेति तथा च वेदादीनां ह्रासदर्शनेन परो ह्रासोपद
र्शितहेतुना उपदर्शितसाध्यसिद्धौ तद्घटकतया प्रलयसिद्धिरिति भावः। द्वितीयस्तवकार्थसंग्रहश्लोकमाह
कारंकारमलौकिकाद्भुतमयं मायावशात्संहरणं हारं हारमपीन्द्रजालमिव यः कुर्वन् जगत्क्रीडति। तं देवं नि
रवग्रहस्तवदमिथ्यानुभावं भावं विश्वासैकमृदुवमः शिवं प्रति नमनं भूयासमं तेष्वपि।२। श्लोकार्थस्तु यः पर राम
मेश्वरः अलौकिकाद्भुतमयं लोकनिर्म्माणयोग्यविलक्षणं जगत्कारंकारं कृत्वा कृत्वा मायावशात्तत्तत्का
ले संहृतसांडिहीर्ष्यासमवहिता इष्टवशात् संहरणं हारं हारं हृत्वा हृत्वा कुर्वन् क्रीडति तं देवं निरवग्रहस्तव २८

दमिथ्यानानुभावं निरवग्रहो निष्प्रतिबंधः स्तवतां पुरुषाणां मा भूत् अभिथ्यानानुभव इच्छानुभवो यस्मात् तादृशं भ
वं जगन्मूलकारणं शिवं प्रति नमनं नमस्कारं कुर्वन् अहमेतेषु अंतकालेषु भूयासमित्याशंसा ॥ ॥ इति द्वितीय
स्तवककारिकाव्याख्या ॥ ॥ ननु योग्यानुपलब्धिरूपबाधकसत्वात् कथमीश्वरसिद्धिः । यदि चैंद्रियकपदार्थसिद्धा
वेव योग्यानुपलब्धिर्बाधिका न त्वतींद्रियेश्वरसिद्धौ तदभावसाधकवक्ष्यमाणयोग्यानुपलब्धेरप्रसिद्धेरिति वि
भाव्यते तदा तींद्रियशशशृंगाभावस्याप्यसिद्ध्यापत्तिः । यदि च योग्यानुपलब्ध्या शशशृंगाभावो न सिध्यति सा
धकाभावात् शशशृंगाभावः तत्र तु नानुपपत्तिरित्युच्यते · अत्र तु वक्ष्यमाणेश्वरसाधकानुमानसत्वान्न दोष इ
त्युच्यते तदा ईश्वरे स्वीयेष्टसाधनताज्ञानशरीराद्यभावेन कर्तृत्वाभावसिद्ध्या कर्तुः तस्यापि शशशृंगतुल्यत्वापा
तेरित्युत आह · योग्यादृष्टिः कुतोऽयोग्ये प्रतिबंदिः कुतस्तरां मा का योग्यं बाध्यते शृंगं का नुमानमनाश्रयमा । योग्याद
ष्टि योग्यानुपलब्धिर योग्ये परमेश्वरे कुतः तथा च ईश्वरोपलंभाप्रसिद्ध्या प्रतियोगितद्व्याप्येतरप्रतियोग्युपलंभ

कभावत्सामग्रीविशिष्टप्रतियोग्युपलंभाभावात्मिकाया योग्यानुपलब्धेरीश्वराभावग्राहिकाया अप्रसिद्धे
श्वरे योग्यानुपलब्धिर्बाधिकेति भावः। निरुक्तयोग्यानुपलब्धेरप्रसिद्ध्या यदि नातीन्द्रियप्रतियोगिकाभावसिद्धिस्त
३० दा अयोग्यशशशृंगाभावसिद्धेरपि मास्त्विति प्रतिवादिसमाधानमाह- प्रतिवादिरित्यादि यतः क्वायोग्यशृंगं बा
ध्यते- अयोग्यशृंगं न बाध्यते योग्यानुपलब्धिवशात् अतीन्द्रियशशशृंगाभावः सिध्यतीति न कुधेत अप्रसिद्ध
साधकाभावात्- अतः प्रतिवादिः कुतस्तरामा अतीन्द्रियशशशृंगाभावोपि न सिध्येदिति प्रतिवादिस्ततरां नास्तीत्यर्थः
तथाप्युक्तप्रदर्शितरीत्या ईश्वरे कर्तृत्वाभावसाधने कथं पारमार्थिकेश्वरसिद्धिरित्याशंकामुद्धरति नानुमानमित्यादि- अ
नाश्रयं भवन्मते ईश्वरस्याप्रसिद्ध्याप्रसिद्धेश्वरपक्षककर्तृत्वानुमाने स्वीयेष्टसाधनताज्ञानाभावशरीराद्यभा
वहेतुकं न संभवतीत्यर्थः। अनुमितौ पक्षज्ञानस्यापि हेतुत्वादिति शेषः। इदमुपलक्षणं गयाश्राद्धादौ परकीये राम
ष्टसाधनताज्ञानादपि प्रवृत्तिदर्शनेन स्वीयेष्टसाधनताज्ञानाभावस्य कर्तृत्वाभावव्याप्यतया शरीराद्यभावहे ३०

तोरप्रयोजकतया च तेन तत्र कर्तृत्वाभावसिद्धिरित्यपि दूषव्यमाननुपलब्ध्याप्रसिद्ध्यापक्षज्ञानाभावादीश्वरे न कर्तृत्वा
भावसिद्धिरित्युक्तिरसंभवदुक्तिकैवा असिद्ध्याव्यावृत्त्या ईश्वरस्वरूपपक्षज्ञानसंभवादित्यत आह· व्यावृत्त्या भाववत्त्वैव
भाविकी विशेष्यता· अभावविरहात्मत्वं वस्तुनः प्रतियोगिता· व्यावृत्त्यं कर्तृत्वं तदभाववत्त्वैव भाविकी पारमार्थिकी
विशेष्यता ईश्वरे आश्रयता इति कारिकापूर्वार्धार्थः अयं भावः उपदर्शितरीत्या ईश्वरे कर्तृत्वाभावसाधने कर्तृ
त्वाभाववत्त्वेनैव ईश्वरस्यपारमार्थिकत्वमा अन्यथा सतोः संबंधाभावेन पारमार्थिककर्तृत्वाभावस्य अपारमा
र्थिकेश्वरस्य संबंधाभावेन तत्र तत्साधनतासंभवात्· न चालीककर्तृत्वाभाव एव तत्र सिद्ध्यतु इति वाच्यम् अ
लीककर्तृत्वाभावसिद्धेः पारमार्थिकेश्वरसिद्धिविरोधितया प्रकृते तथाविधसिद्धेरनुद्देश्यत्वादिति। अथ ईश्वरे क
र्तृकत्वाभावो न साध्यते· अपि तु अनुपलब्धिबलादीश्वराभाव एव साध्यते· तथा च पारमार्थिकेश्वरसिद्धिरि
त्यत आह· स्वभावविरहात्मत्वमिति वस्तुनः· वस्तुन एव तथा च ईश्वराभावसिद्धौ ईश्वरे भावप्रतियोगित्वमपि सि

कुकारीर·

(2)

ध्यति तत्त्वाभावाभावात्मकत्वं स्वरूपं वस्तुन एवेति· ईश्वराभावसिद्धावपि ईश्वरस्य पारमार्थिकताऽप्रत्यूहैवेति भा
केचित्तु वः अभावबुद्धिं प्रति प्रतियोगितावच्छेदकाविशिष्टप्रतियोगिज्ञानं हेतुरिति ईश्वरज्ञानं विना ईश्वराभावो वा भाव
ता तदुपपत्त्यर्थमीश्वरज्ञानमावश्यकमंगीकार्यं तथा च पारमार्थिकेश्वरस्यावश्यकता अन्यथा तज्ज्ञानासंभ
31 वात्· न वा सत्त्वव्याप्यात्मकेश्वरज्ञानादेव तदभावबुद्धिर्भविष्यतीति वाच्यम्। असतो भानानंगीकारेण सत्त्वव्या
प्तिसामग्र्या अलीककल्पनीयतया तथात्वासंभवादित्याहुः। वस्तुतस्तु अनुपलब्धिमात्रं नाभावग्राहकम
तींद्रियप्रतियोगिकाभावासिद्धिप्रसंगात्· अपि तु प्रतियोगितद्व्याप्येतरप्रतियोग्युपलंभसामग्रीविशिष्टप्रति
योग्युपलंभाभावरूपा योग्यानुपलब्धिस्तथा सा च प्रकृते नास्तीति कथमीश्वराभावसिद्धिरपीति दृष्टांतप्रदर्श
नेनाह· इष्टोपलंभसामग्री शशशृंगादियोग्यता न तस्यां नोपलंभोऽस्ति नास्ति सानुपलंभने र्थः तथा च यदा राम
यादृशसामग्री तदा न प्रतियोग्युपलंभाभावः· यदा तु तादृशसामग्री न तदा न निरुक्तयोग्यानुपलब्धेरिति न ३१

यथा शशशृंगादि योग्यतादृष्टोपलंभसामग्रीदोषघटिताया असन्नासकसामग्री सा शशशृंगादि योग्यताशशशृं
गज्ञानजनिका तस्यां तादृशसामग्र्यां सत्यां नोपलंभो नुपलंभो नास्तिवोपलंभनेनुपलब्धिदशायां सादृशोपलंभ
सामग्री नास्तीति संपूर्णकारिकार्थः तथा च यदा तादृशसामग्री तदा न प्रतियोग्युपलंभाभावः यदा तु तादृशसामग्री
न तदा न निरुक्तयोग्यानुपलब्धिरिति न यथा शशशृंगाभावासिद्धिस्तथा नियुक्तयोग्यानुपलब्धिविरहादीश्वरा
भावोपि न सिध्यतीति भावः। अथ यदि शशशृंगाभावो नास्तिकं तर्हि शशशृंगं नास्तीति प्रतीतिरिति चेत्तन्न ह्येषा
प्रतीतिः शशशृंगाभावप्रतियोगिकाविषयिणी· अपि तु शशे शृंगाभावविषयिणीति नानुपपत्तिगंधोपीति। ननु त
थापि मदादितरात्मानो न सर्वज्ञाः न सर्वकर्तारश्च चेतनत्वादहमिवेत्यनुमानादीश्वरे सर्वज्ञत्वाभावसिद्धौ फलतः पा
रमार्थिकेश्वराभावसिद्धिरित्यत आह इष्टसिद्धिः प्रसिद्धेहि त्वसिद्धिरगोचरे नान्या सामान्यतः सिद्धिर्ज्ञातावपि तथै
व सा प्रसिद्धे प्रसिद्धे आत्मनि चैत्रात्मादाविति यावत् उपदर्शितानुमाने पक्षे कृते इति शेषः। इष्टसिद्धिः सिद्धसा

धनमा ननु ईश्वरात्मैव पक्षः इत्यत आह हेत्वसिद्धिरित्यादि अगोचरे असतीश्वरात्मनि हेत्वसिद्धिः हेतोरज्ञानमि
त्यर्थः। तथा च तस्याज्ञानेन तेन हेतुना नासंभवान्न तस्य पक्षत्वं संभवतीति भावः। ननु आत्मरूपेणेश्वरात्मसिद्धिः संभवा
त्तैवमित्यत आह नान्या सामान्यतः सिद्धिरिति सामान्यतः आत्मत्वरूपेण अन्याईश्वरात्मविषयिणी सिद्धिरपीत्यर्थः। तेन
32 रूपेणापि तद्ग्राहकसामग्र्यभावादिति भावः। ननु आत्मत्वेन सर्वज्ञवृत्तिर्न न वा सर्वकर्तृवृत्ति जातित्वात् गोत्ववदित्यनुमा
नादात्मत्वे सर्वज्ञादिवृत्तित्वाभावसिद्धौ फलतः पारमार्थिकेश्वराभावसिद्धिरित्यत आह जातावपीत्यादि आत्मत्वजातौ
सर्वज्ञादिवृत्तित्वाभावसाध्येपि तथैवासिद्धसाधनादिदोषा वेत्यर्थः अयं भावः आत्मत्वे सर्वज्ञव्यक्तित्वाभावे साध्ये सर्व
ज्ञत्वाप्रसिद्ध्या तदघटितसाध्याप्रसिद्धेः। यदि च यत्किंचित्सर्वज्ञवृत्तित्वं साध्यं तदा चैत्राद्यात्मानमादाय सिद्धसाधनमि राम
तिनोपदर्शितानुमानावकाशोपीति। ननु भवदभ्युपगतागमादिभिरीश्वरज्ञानं संपाद्य तत्रासर्वज्ञत्वादिकं साधनीयमित्य
त आह। आगमादेः प्रमाणत्वे बाधनादिनिषेधनमाभासत्वे तु सैव स्यादाश्रयासिद्धिरुक्ता। आगमादेर्यदि प्रामाण्यं तर्हि ३२

बाधनादेरीश्वरपक्षकसर्वज्ञत्वाद्यभावसाध्यकानुमानादेर्निषेधनं नावतारः। आगमात्सर्वज्ञत्वादिविशिष्टेश्वरसिद्धा
तत्प्रतिबंधकबाधबुद्ध्यसंभवादिति भावः। आभासत्वे आगमादेरप्रामाण्ये सा पूर्वोक्ता आश्रयासिद्धिरुक्तैव दुर्वारै
वेति कारिकार्थः। ननु आगमकादिकमीश्वरांशे प्रमाणं न तु तत्सर्वज्ञत्वांशे तथा च कथं तस्मात्सर्वज्ञत्वादिवि
शिष्टेश्वरसिद्ध्युपदर्शितानुमितिप्रतिबंध इति चेन्न विनिगमनाविरहेणागमादेः सर्वांशे प्रामाण्यादिति। ननु
अतीन्द्रियपदार्थानभ्युपगंतॄणां चार्वाकानामतीन्द्रियपदार्थविलोपप्रसंगरूपबाधकासंभवेनानुपलब्धिमात्रा
देवेश्वराभावसिद्धिः स्यादित्यत आह। दृष्ट्यदृष्ट्योः क्व संदेहो भावाभावविनिश्चयात्। अदृष्टिबाधिते हेतौ प्रत्य
क्षमपि दुर्लभम्। दृष्ट्यदृष्ट्योस्तत्र तद्दर्शनतद्दर्शनाभावान्यतरयोः सतो भावाभावविनिश्चयात्तत्र तदभावा
न्यतरनिश्चयात् क्व संदेहः संदेहो न संभवतीति कारिकापूर्वार्द्धार्थः। अयं भावः। चार्वाकमतेऽप्यनुपलब्धिबलादेवाभाव

कुकाटी २०

निश्चयस्तदा अनुमानाप्रामाण्यमभ्युपगच्छतां चार्वाकाणां वह्न्यंशे उत्कोटिकसंभावनातो वह्निव्यवहार इति मतम
नुपपन्नं स्यात्· उपदर्शितयुक्त्या सर्वत्र वह्निवह्न्यभावयोरन्यतरनिश्चयेन वह्निसंदेहासंभवादिति अनुपलब्धेरभा
33 निश्चायकत्वे दूषणांतरमप्याह अदृष्टिबाधितेत्यादि अदृष्टिबाधिते केषांचिदनुपलब्ध्या निश्चिताभावके हेतौ प्रत्य
क्षहेतौ प्रत्यक्षहेतौ गोलकादाविति यावत्· प्रत्यक्षमपि दुर्लभं प्रत्यक्षप्रमाणमपि दुर्लभं स्यादिति तथा च गोल
काद्यदर्शनेन गोलकाभावसिद्ध्या प्रत्यक्षप्रमितिकरणस्यासंभवेत्तन्मते प्रत्यक्षप्रमाणस्वीकारोपि व्याहन्येतेति
भावः। एवं गृहाद्बहिर्निर्गतश्चार्वाको न पुनः परावर्तेत गृहे तस्यादर्शनेन गृहस्थानां तदभावनिश्चयेन तस्यास राम
त्वात् किं पुनर्बहुना गृहस्थस्वकुटुंबधनाद्यदर्शनेन तदभावनिश्चयवतश्चार्वाकस्य स्वहृदयकुट्टनं कोकाविदूल
तापि स्यात् परावृत्तस्यापि तस्य गृहे पुत्राद्यसंभाषणप्रसंगश्च गृहे पुत्राद्यदर्शनेन तदभावनिश्चयेन पुत्रादे २२

सत्त्वात्। यदि च नास्तिकवादिनश्चार्वाकस्य मते अनुपलब्ध्या पूर्वपुत्राद्यभावनिर्णयेऽपि पुनः पुत्राद्यंतरोत्पत्त्या-
नुपपत्तिरिति विभाव्यते तथापि चार्वाकस्य पुत्रादिप्रत्यक्षानुपपत्तिरूपबाधकं जागरूकमेव तदानीं चार्वाकीय-
गोलकात्मकेंद्रियादर्शनवता पुरुषेण तदभावनिर्णये न तस्य तदा तदभावात्। न चोपलब्धिविशेषाभावेनापदृ
भावसाधकः अपि तु तत्सामान्याभाव एव तथा च चार्वाकीयगोलकात्मकेंद्रियादेः केषांचिदुपलब्ध्यानोत्का-
त्यात् तदभावसिद्धिरिति नानुपपत्तिलेशोऽपीति वाच्यम्। तथा सति घटवति भूतले घटापसारणानंतरं कस्यापि तदभावप्र-
त्यक्षानुदयप्रसंगात्। भूतले घटस्याविद्यमानतादशायामनुपलंभसत्त्वेन तत्रोपलब्धिसामान्याभावासत्त्वादिति त-
स्मादनुपलब्धिर्न पदार्थाभावसाधिका अपि तु योग्यानुपलब्धिरेव तथा सा च प्रकृते नास्तीति नेश्वराभावसिद्धिरिति
चार्वाकमतशुष्ककाष्ठानलप्रवेशोपायोऽवसेयः। मीमांसकास्तु तोषयितव्यो भीषयितव्यश्च न ह्याहि
अनुपलब्धिमात्रेणाभावसाधकाः किंत्वपूर्वसिद्ध्या सतोषणीयः [illegible] योग्यानुपल[illegible]ब्धिरेतावत्र भाव

साधिकेति तदसमर्थ्यश्चुराभावासिद्धाभीषणीयश्चेति। ननु अनुपलब्धिमात्रस्याभावसाधकत्वे सर्वत्राती
न्द्रियोपाधिसंदेहेन व्यभिचारसंदेहाद्व्याप्तिनिश्चयो दुर्लभः स्यात् तथा च नानुमानप्रमाणमिति चेत् तत इ
श्वरसिद्धिरित्याशंकामपाकर्तुमाह· शंका चेदनुमानमस्त्येव न चेत् शंका ततस्तरां व्याघातावधिराशं
३५ का तर्कः शंकावधिर्मतः। कालांतरीयदेशांतरीयधूम एवेति यद्युच्यते तदा अनुमानप्रामाण्यमाव
श्यकमेव अन्यथा कालांतरीयदेशांतरीयधूमोपस्थितेरसंभवेन धर्मिज्ञानाभावात् तथाविधसं
शयाभावात् यदि च कालांतरीयदेशांतरीयधूमेन तथाविधव्यभिचारसंशय इत्युच्यते तदनुपलब्ध राम
मानधूमे स्वाधिकरणवृत्तित्वनिर्णयाद्व्यभिचारसंशयासंभवेन तत्वः धूमसामान्ये व्यभिचारसंशयस्य
न्याभावे तरां सुतरामनुमानं प्रमाणमावश्यकमिति कारिकापूर्वार्द्धार्थः। ननूपलभ्यमानधूम एव धूमत्वेन
व्यभिचारसंशयः संभवति तत्प्रतिबंधकस्य धूमत्वावच्छेदेन व्यभिचारनिश्चयस्यासत्त्वात् तथा च व्याप्तिनि ३६

श्चयासंभवेन कथमनुमानं प्रमाणमित्यत आह॰ तर्कः तथाविध व्यभिचार संशयप्रतिबंधक इत्यर्थः। ननु एवं स
ति तर्कमूलीभूत व्याप्तिनिश्चयस्यापि तर्कप्रयोज्यतया अनवस्थापत्तिरित्यत आह॰ व्याघातावधिराशंकेति [illegible]
: धूमादि विशेष्यक वह्न्याद्यन्वयव्यतिरेकानुविधायित्व ज्ञानं व्यभिचार शंकाकारणाभावादि प्रयुक्ताभाव स्तदवधि
राशंकेत्यर्थः। तथा च यत्र तथाविधान्वय व्यतिरेकानुविधायित्व ज्ञान व्यभिचार शंकाकारणाभावादि प्रयुक्तः तर्क
विरह [illegible] शंकाविरहस्तत्र तर्कात्पूर्वं तर्कस्यानपेक्षिततया नोपदर्शितानवस्थेति भावः। ननु कीदृशस्तर्को व्यभि
चार शंकानिवर्तक इति चेत् धूमो यदि वह्नि व्यभिचारी स्यात् तावह्निसमवहित जन्यो न स्यादित्याकारकस्तर्कस्त
थैव वा हि अन्वयं नवा यदि व्यतिरेक निर्णयाभावात्तादृशा तर्को न संभवतीति वाच्यम् धूमो यदि वह्नि [illegible]
[illegible] जन्यत्वे सति वह्नि समवहित जन्यो न स्यात् [illegible] न्यो न स्यादित्याकारक तर्कोक्तेः धूमो वह्नि समवहित [illegible]
[illegible] वा इत्याकारकानिष्टत्वे आपाद्याभाव हेतुकापादकाभाव साध्यकानुमानात् तथाविधा पाद्य व्यतिरेकनिर्णयसंभवात्तर्का

वत्वात्मकज्ञानस्याहार्य्यमानरूपतया अप्रतिबंधकत्वेन कथं तन्निवर्त्तकत्वमिति वाच्यम्। अन्याहार्य्यमानज्ञानस्याप्र
तिबंधकत्वेपि तथाप्रतिबंधकत्वोपगमे हानिविरहात्। यद्वा तर्कस्यानिष्टप्रसंजकत्वेनानिष्टतया तत्संबंधत्वेन ज्ञाते वह्नि
समवहिताज्जन्यत्वज्ञाने द्वेषोत्पत्त्या इच्छाया अनुदयेनाहार्य्य [illegible] ज्ञानासंभव इति प्रणाल्या आहार्य्यशंकानिवर्त्तक
३५ त्वस्य [illegible] संभवात्। ननु एतादृशतर्कावतार एव कथं तत्प्रतिबंधकस्य धूमो वह्नेरेव भविष्यति क्वचिद्वह्निं विनापि भवि
ष्यति [illegible] हेतुक एव वा उत्पत्स्यते इति शंकात्रयस्य संभवादिति। यत्तु तादृशशंकात्रयस्य तथाविधप्रतिबंधकत्वे मा
नाभावात् [illegible] नुपपत्तिरिति तन्न वक्ष्यमाणरीत्या तत्र प्रतिबंधकत्वस्यावश्यकत्वात्। तथाहि धूमो यदि वह्निसमवहिता
जन्यत्वे सति वह्निसमवहितजन्यो न स्यात् तज्जन्यो न स्यादित्याकारकस्तर्कः प्रकृतोपयोगी। अत्र वह्न्यसमवहितदंडादि
घटितसामग्रीजन्यस्वपक्षाभावि वह्निसमानाधिकरणघटादौ व्यभिचारवारणाय आपादकस्य तत्तदर्थकस्वसमा राम
नाधिकरणवह्निभेदन्यदाणाव्यवहितोत्तरक्षणकं यद्यत्स्वं तद्भेदकूटवत्त्वमाएतावन्मात्रोपादाने समानाधिकरणवह्निम ३५

भा॰ ३ भावे ऽ एतावन्मात्रोपादाने स्वसमानाधिकरणवह्निमदव्यवहितोत्तर

व्यवहितोत्तरक्षणोत्पत्तिके वह्निनांतरीयकधूमस्से व्यभिचार इति आपादके विशेष्यदलोपादानं तदर्थस्क स्वसमाना
धिकरणवह्निमत्क्षणाव्यवहितोत्तरक्षणं यद्यत्स्वतेद्भेदकूटवत्त्वमा न चैवं सति वह्निव्यधिकरणघटादौ व्यभिचार[illegible]
शक्यमिति वा व्यभावह्निसामानाधिकरण्यविशिष्टजन्यत्वस्यापाद्यत्वात्। अत्रापाद्याभावेनापादकाभावसाधन
वह्न्यसमवहिताजन्य त्वरूपविशेषणाभावसिद्धिमादायार्थांतरवारणाय निरुक्तवह्न्यसमवहिताजन्यत्वंपदे
तावच्छेदकेपि निवेशनीयम्। तथा च विशेषणाभावत्वेन निर्णीते पक्षे विशिष्टाभाव[illegible]सिद्धिरितरबाधबलाद्व्यापक
तानवच्छेदकविशेष्याभाववृत्तिधर्मेण वह्निसमवहितजन्यत्वेन विशेष्याभावमात्रपर्यवसायिनी नोपदर्शिता अर्थां
तरशंकावकाशः। अत्र च धूमोऽवह्नेरेव भविष्यतीति वाक्येनाभिलप्यमानात् धूमत्वावच्छेदेन स्वसमानाधिकरण
वह्निमदन्यक्षणाव्यवहितोत्तरक्षणोत्पन्नाभिन्नत्व तदभावकोटिकशंकापक्षविशेषणीभूतनिरुक्तवह्न्यसमवहिता
जन्यत्वनिर्णयाविधायकत्वेनोपदर्शितवितर्कघटिका। एवं धूमः कश्चिद्वह्निं विनापि भविष्यतीति शब्देनाभिलप्य

ज्ञाना धूमत्वसामानाधिकरण्येन स्वसमानाधिकरणवह्निमदन्यक्षणाव्यवहितोत्तरक्षणोत्पत्तिकभिन्नत्वतदभावको
टिकशंकापि तादृशी धूमोऽहेतुक एवोत्पत्स्यत इति शब्देनाभिलप्यमाना अहेतुकत्वतदभावकोटिकशंका तु वह्निसामा
नाधिकरण्यविशिष्टजन्यत्वाभावरूपापाद्यव्याप्यकोटिसंशयतया आपाद्यव्यतिरेकनिर्णयविघटक आपाद्यसंश
३६ यसंपादकतया तर्कविघटिकेति कथं तादृशशंकासत्त्वे तर्कोत्पत्तिरिति चेन्न धूमे वह्न्यन्वयव्यतिरेकानुविधा
यित्वज्ञानादेव तथाविधशंकाद्वयनिरासात्। अत एवोक्तमाचार्यैर्व्याघातावधिराशंकेति। तादृशशंकाद्व वा०
यं प्रति तस्य प्रतिबंधकत्वे मानाभाव इति तु नाशंकनीयम्। व्यावर्तकधर्मविषयाया मणिमंत्रादिन्यायेन तत्स्य राम
तत्संभवादित्यलमस्मत्तद्विचारेण· इदमत्र बोध्यमुपदर्शितप्रणाल्या व्यभिचारशंकानिवर्तकत्वेन त[illegible]
दिव्याप्तिग्रहे उपयुक्तः। क्वचिद्व्यास्थितायामपि व्यभिचारशंकायां तर्कस्तत्रोत्तेजकत्वेन व्याप्तिग्रहोपयुक्तः॥ अ
तएव पक्षमंतर्भाव्य व्यभिचारसंदेहसत्त्वेऽपि कार्यकारणभावादिप्रयुक्तानुकूलतर्कावतारे व्याप्तिग्रहो न विरुद्धो ३६

(1)

तेति। न च व्यभिचारसंशयस्य ग्राह्यसंशयतया व्याप्तिग्रहप्रतिबंधकत्वमेव न कुत उपदर्शितरीत्या तर्कस्य
व्याप्तिग्रहोपयोगित्वमिति वाच्यम्। अन्यत्र ग्राह्यसंशयस्याप्रतिबंधकत्वेपि प्रकृते अन्वयव्यतिरेकानुवि
धानबलात् तत्प्रतिबंधकत्वस्यांगीकारात् तदुक्तं यावच्चाव्यतिरेकित्वं शतांशेनापि शंक्यते। विपक्षस्य कुतस्ताव
द्धेतोर्गमनिकाबलं कारिकार्थस्तु हेतोरव्यतिरेकित्वं सत्वं विपक्षस्य विपक्षेयावदाशंक्यते तावत्तस्य गमनिका
बलं गमकत्वं कुत इति व्यभिचारशंकाच क्वचिदुपाधिशंकाधीनाज्ञेया तदुक्तमन्ये परप्रयुक्तानां व्याप्तीनामुपजी
वकाः। तैर्दृष्टैर्नैवेष्टा व्यापकांशावधारणा। कारिकार्थस्तु अन्ये ये केचन हेतवः परप्रयुक्तानामुपाधिसामानाधिक
रण्यप्रयुक्तानां व्याप्तीनामुपजीवकाः आश्रयाः तैर्दृष्टैरुपाधिमत्वेन संदिग्धैस्तैर्हेतुभिः न साध्यावधारणा न पक्षे
साध्यनिर्णयः अपितु हेतौ व्याप्तिसंदेह इति शेष इति उपमानं तु नेश्वरे बाधकं तस्य सादृश्यसाधकत्वेन ईश्वराभा
वासाधकत्वात् ततः सादृश्यमतिरिक्तमिति केचिद्वदंति तन्न तदुक्तमयाति परस्परविरोधे हि न प्रकारांतरस्थितिः

कुकाटीर (2)

भावा

नैकतापि विरुद्धानामुक्तिमात्रविरोधतः परस्परस्माच्च विरोधे भावत्वाभावत्वयोः परस्परविरोधनियमेन प्रकारांतरस्थि
तिः सादृश्यं भावाभावाभ्यामतिरिक्तमिति नेति कारिकापूर्वार्द्धार्थः तथापि सादृश्यस्य भावाभावोभयात्मकत्वे किं
बाधकमित्यत आह नैकतापि विरुद्धानामिति विरुद्धानां परस्परविरुद्ध भावत्वाभावत्वरूपविरुद्धधर्माणां नैकता
पि एकधर्मिवृत्तितापि नेत्यर्थः तथा च सादृश्यस्य भावाभावोभयात्मकत्वे तादृशविरोधभंग इति भावः। ननु भाव
त्वाभावत्वादीनां विरोधे किं प्रमाणमित्यत आह उक्तिमात्रविरोधत इति उक्तिमात्रस्य अयं भाव इति वाक्यज
न्यबोधस्यामान्यस्य विरोधतः अयं नाभाव इति बोधात प्रतिबंधतस्तथा च भावत्वाभावत्वयोरविरोधे तथाविध रम
प्रतिबध्यप्रतिबंधकभावानुपपत्तेः तद्विषयकबुद्धिं प्रति तद्विरुद्धधर्मविषयकज्ञानस्य प्रतिबंधकत्वनिय
मात् एवं च भावत्वाभावत्वयोर्विरोध आवश्यक इति भावः। ननु यदि सादृश्यं नातिरिक्तं न वोभयात्मकं [illegible] म
त्येषु केत्तदा तस्य कांत भाव इति चेत् [illegible] वेत्यत आह तथाहि सादृश्यं नाम तद्भि 32

प्र॰ प्रा॰ ए॰ ६ गु॰ प॰ २

न्नत्वे सतितद्वृत्तिमत्योधर्म्मिवत्त्वं स च धर्म्मो यद्यभावस्तदा सप्तमपदार्थरूप एव भावस्वरूपत्वे तु गुणाभावयोरन्य
तरसत्ताभावप्रसक्तीत त्रोपदर्शितसादृश्यस्य गुणवत्त्वेदुव्यमध्यें तं भाविः गुणभाववत्त्वे तु यदि समवायसंबंधे
नाश्रितत्वं तदा गुणादिविशेषांतर्भाव्यैतस्य निवेशः। यदि च तेन संबंधेन तस्यानाश्रितत्वं तर्हि समवायमध्ये
सादृश्यनिवेशः अनवस्थाभयेन समवायस्य समवायानभ्युपगमादिति सादृश्यस्य तत्स्वरूपांतर्भावेन
निर्वाहे अतिरिक्तपदार्थताभ्युपगमो निष्प्रयोजनक इति तच्च सादृश्यं भेदघटितमिति भेदघटितयोगज्ञान
सहकृतेंद्रियेण गृह्यते क्वचित क्वचिच्चानुमानादिनेति ध्येयम्। यत्तु उपमानफलं गवये सादृश्यज्ञानमि
ति मतं तदपि प्रसंगात्दूषयति। साधर्म्यमिव वैधर्म्यमानमेवं प्रसज्यते। अर्थापत्तिरसौ युक्तमिति साध्वा
रणां नाकिमा एवं गवये गोसादृश्यग्रहोत्तरं सा गौ गवयसदृशीति ज्ञानजनकत्वेनोपमानाद्व्यातिरिक्तप्रमाणं
गीकारे साधर्म्यमिव गविगवयसादृश्यग्राहकोपमानाख्यप्रमाणमिव वै धर्म्यग्राहकमानं प्रमाणांतरम

गवि अरवे सा २४
धेटादौ गोवैधर्म्यग्राहकं मानं मानांतरं

कुकाटीर (२)

पि प्रसज्येत प्रसक्तं स्यात्· असौ घटादौ गोवैधर्म्यग्राहकं प्रमाणमर्थापत्तिर्गवि घटादिवैधर्म्यं घटे गोवै
धर्म्यं विना अनुपपन्नमित्याकारकं ज्ञानं व्यतिरेकव्याप्तिज्ञानविधया अनुमानं युक्तं यदि तदा साधारणं
न किं गवि गवयसादृश्यज्ञानजनकमपि गवये गोसादृश्यं विना गवि गवयसादृश्यमनुपपन्नमित्याकार
कानुपपत्तिज्ञानं व्यतिरेकव्याप्तिज्ञानविधया अनुमानमेव किं न स्यादिति संपूर्णकारिकार्थः· तथा चोपद
र्शितसादृश्यज्ञानस्य प्रकारान्तरेणोपपादनेतज्जनकमेवोपमानप्रमाणमिति तन्नादरणीयमिति भावः· न
न्वेवं सति उपमानाख्यप्रमाणाङ्गीकारो निरर्थक इति अत आह। संबंधस्य परिच्छेदः। संज्ञायाः संज्ञिना सह
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः· संज्ञायाः गवयपदादेः संज्ञिना सह· गवयादिना सह संबंधस्य शक्तेः राम
परिच्छेदो ज्ञानं प्रत्यक्षादेरसाध्यत्वात् प्रत्यक्षप्रमाणादिना अनुपपन्नत्वात्। उपमानफलमुपमानाख्यातिरिक्तप्र
माणफलं विदुरिति· [illegible] संपूर्णकारिकार्थः· अयं भावः· अ ज्ञातगवयपदशक्त्याश्रयस्य कीदृशो गवयपदवा ३८

विशिष्या १

च्य इति प्रश्नानंतरं प्रयोजकवृद्धेन गोसदृशो गवयपद[illegible]तिवाक्ये प्रयुक्ते गोसदृशो गवयपदवाच्य इति शा
ब्दबोधानंतरं तज्जनितसंस्कारेण गोसादृश्यविशिष्टगवयात्मकपिंडज्ञान[illegible]सदृक्तेन जनितात् गो
सदृशो गवयपदवाच्य इति स्मरणादुत्पन्नं गवयपदशक्तिज्ञानं प्रत्यक्षादिना न संभवति गवयत्वविशिष्ट
दौ सन्निकर्षादेरभावादिति तज्जनकतया उपमानाख्यमतिरिक्तप्रमाणमवश्यमुपेयं तच्च प्रमाणमुपदर्शि
तातिदेशवाक्यार्थज्ञानं गोसदृशोयमित्याकारकपिंडदर्शनं वा व्यापारस्तु तस्यातिदेशवाक्यार्थस्मरणं फलं
तु गवयो गवयपदवाच्य इत्याकारकोपमितिरिति। एवं क्वचिद्वैधर्म्यकरणिकाप्युपमितिर्दृष्टव्या अन्य
था अयमतिदीर्घग्रीवः कठोरकंटकाशी त्याकारकात्। अतिदीर्घत्वोष्ट्रूप वैधर्म्यज्ञानाज्ज्ञायमानाद्वाधिक
करभपदवाच्यमतिदीर्घग्रीवं कठोरकंटकाशिनमित्यतिदेशवाक्यार्थस्मृतेरुत्तरमुत्पन्नाकारभःपदवाच्यइ वरभ
त्याकारिकोपमितिरनुपपन्ना स्यादितिः। ननूपमानप्रमाणं विनापि गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्या

३१ त गवयो गवयपदवाच्यो गोसदृशत्वादित्यनुमानाद्वा गवयपदप्रवृत्तिनिमित्तविशिष्टे शक्तिग्रहसंभवात् किमु
पमानस्यातिरिक्तप्रमाणत्वेत्यत आह० सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतेः समयो दुर्ग्रहः पूर्वशब्देनानुम
यापि वा० सादृश्यस्यानिमित्तत्वात् गौरवेण गोसादृश्यस्य गवयपदप्रवृत्तिनिमित्तत्वासंभवान्निमित्तस्या
प्रतीतितः लाघवात् गवयपदप्रवृत्तिनिमित्तत्वेन क्लृप्तस्य गवयत्वस्यानुपस्थितेः पूर्वं गोसादृश्यविशि
ष्टपिंडदर्शनादिपूर्वशब्देनोपदर्शितातिदेशवाक्येन अनुमयापि वा गवयो गवयपदवाच्यः गोसदृशत्वादित्य
नुमानेन वा समयो दुर्ग्रहः गवयपदप्रवृत्तिनिमित्तविशिष्टे वा गवयशक्तिग्रहोऽशक्य इति संपूर्णका
रिकार्थः। शाब्दबोधे पदजन्यपदार्थोपस्थितेरनुमितौ पक्षतावच्छेदकविशिष्टपक्ष[illegible]ज्ञानस्य हेतु राम
तयापि विना गवयत्वाविशिष्टोपस्थितिं तथाविधातिदेशवाक्यात् तथाविधानुमानाद्वा गवयो गवयप ३८
दवाच्य इति शक्तिग्रहासंभवेन तदुपपत्त्यर्थमतिरिक्तोपमानप्रमाणस्य मंगीकार्यमिति भावः। ननु प्रत्य

न्नतः गवयत्वविशिष्टोपस्थित्यनंतरमेव तथाविधातिदेशवाक्यस्य घटकीभूतयत्किंचित्पदलक्षणयाउपस्थिति
गो[illegible]त्वविशिष्टे तथाविधातिदेशवाक्यादेव तथाविधशक्तिग्रहसंभवे किमुपमानेनेत्यत आह । पदार्थ इता न्वया
दनाकांक्षेन वाक्यं स्यान्यादिकृति । पदार्थान्वयवैधूर्य्यात् तदाक्षिप्तेन च संगतिः । पदार्थ इतान्वयात् उपदर्शितातिदेश
वाक्य घटकपदशक्यार्थान्वयबोधजननात् निराकांक्षं वाक्यं जनितान्वयबोधकमतिदेशवाक्यं नान्यादिकृतिन
पश्चात् गवयत्वविशिष्टे स्वघटकपदलक्षणया गवयो गवयपदवाच्य इति शाब्दमुत्पादयितुं न शक्नोति इति का
कापूर्व्वार्थः । तद्वाक्य शाब्दबुद्धिं प्रति तद्वाक्य[illegible]न्यशाब्दबोधस्य उत्तेजकाभाववविशिष्टस्य प्रतिबंधकत्वा
दिति भावः । ननु प्रथमत एव लक्षणया तथाविधातिदेशवाक्यात् गवयो गवयपदवाच्य इत्यन्वयबोधे किं बाधकमि
त्यत आह पदार्थान्वयवैधूर्य्यादितिपदार्थान्वयवैधूर्य्यमेकपदार्थैः पदार्थान्वयानुपपत्तिस्तत्राक्षिप्तेन लक्षणी
येन संगतिः शाब्दबोधे इत्यर्थः अयं भावः यत्रान्वयानुपपत्तिस्तत्रैव लक्षणीयार्थस्य शाब्दबोधोत्पत्त्याप्र[illegible]

पदार्थान्वयानुपपत्तितः २

कुकारीरः गवयो १ २

तेतदभावेन लक्षणयाऽतिदेशवाक्यात् गवयपदवाच्य इत्याकारकशाब्दबोधासंभवेनान्यथानुपपत्त्या गवयो ग
वयपदवाच्य इत्याकारकविलक्षणप्रमितिमुपेत्य तत्कारणत्वेनातिदेशवाक्यार्थज्ञानगोसादृश्यविशिष्टपिंडदर्शी
न [illegible] उपमानाख्यातिरिक्तप्रमाणावश्यमुपेयमानं च गवयपदं सप्रवृत्तिनिमित्तं साधु [illegible] पदत्वात् घटवदित्य ५८
५० नुमानात् किंचिद्धर्मावच्छिन्नशक्तिनिरूपकत्वरूपसप्रवृत्तिनिमित्तकत्वसिद्धावितरबाधबलात् गव
यत्वावच्छिन्नशक्तिनिरूपकसिद्धौ वतथाविधशक्तिज्ञानसंभवात् अत्र मुपमानाख्यातिरिक्तप्रमाणाभ्यु
पगमेनेति वाच्यम्ः अनुमितौ व्यापकतावच्छेदकरूपेणैव विधेयभाननियमेन सर्वत्र तथाविधानुमाना
नवतारेणाचोपदर्शितरीत्या अनुमानात् गवयत्वावच्छिन्ने गवयशक्तिज्ञानस्यासंभावितत्वात्ः अत एव ग रामः
[illegible] विशिष्टप्रत्यक्षानंतरं गवयो गवयपदवाच्यः गोसादृश्यात्ः यन्नैवं तन्नैवं यथा घट इति व्यतिरेकानु ५०
मानादेव तथाविधशक्तिज्ञानसंभवे व्यर्थमुपमानाख्यातिरिक्तप्रमाणोपगमोऽपि निरस्तम्ः व्यतिरेकव्याप्तिज्ञानस्या

नुमित्यहेतुत्वात्· लाघवेनान्वयव्याप्तिज्ञानस्यैवानुमितिहेतुत्वेन क्लृप्तत्वात्· अत एव व्यतिरेकसहचारेणान्व
यव्याप्तिज्ञानाश्रयणमिति दीधितिः· तस्मात् गवयत्वविशिष्टे गोपदनिरूपितशक्तिज्ञानार्थमुपमाना
स्यातिरिक्तप्रमाणमवश्यमभ्युपगन्तव्यं तच्चेश्वराभावसाधकत्वेन न ईश्वरे बाधकमिति· शाब्दप्रमाणं तु न
ईश्वरे बाधकं तदर्थस्यानुमानतः सिद्धात् स्यातिरिक्तप्रमाणत्वाभावात् पदार्थसंसर्गसाधकानुमानप्रयोगस्त्वा
ते पदार्थाः मिथः संसर्गवतः आकांक्षायोग्यतासत्तिमत्पदस्मारितत्वादित्यादिक्रमेण बोध्यः· अत्र मिथः प
दमेकपदार्थेऽपरपदार्थनिरूपिततात्पर्यविषयीभूतसंसर्गवत्त्वं साध्यतालाभार्थं तथा च घटमान स्पद
येत्यादौ कर्मता घटनिरूपितघटपदमपदोभयतात्पर्यविषयीभूतसंसर्गवती घटबोधकघटपदनि
रूपिताकांक्षायोग्यतासत्तिमदमपदस्मारितत्वात् यद्घटबोधकं यत्पदनिरूपिताकांक्षायोग्यताआस
त्तिमद्यत्पदस्मारितं तत्तन्निरूपिततत्पदद्वयतात्पर्यविषयीभूतसंसर्गवत्· यथा इदं [illegible] मित्यादावि

कु॰ का॰ प॰ २०　　　　रू ५

पदार्थ इत्यादि केमणाय तद्घटितसामान्यव्याप्तिज्ञानबलात्कर्मीतायां वटादिनिरूपिताधेयता संसर्गवत्त्वसिद्धि
एतमन्यत्रापीति॰ सर्वत्रकोरकविभक्तिसमभिव्याहृतधातुवृत्तिवाक्यादिस्थले समूहालंबनेनानुमितिरिति॰
शाषिकमतं दूषयितुमाह अनेकांतपरिच्छेदेन निश्चयश्च न संभवे॰ आकांक्षासत्त्वया हेतुमेश्यता आसत्तिरवं
नापरिच्छेदे परिच्छेदविषये एकपदार्थे अपरपदार्थनिरूपिततात्पर्यविषयसंसर्गवत्त्वे साध्ये इति यावत्॰ अ
कांतः करकाभिप्राय चत्रयुः पयसा सिंचतीति वाक्यघटकीभूततृतीयार्थसेककरणत्वव्यभिचारः॰ तत्रापरप
दार्थकरकासंसर्गवत्त्वरूपसाध्याभावादिति शेषः। ननु एकपदार्थेऽपरपदार्थसंसर्गवत्त्वं न साध्यमपि तु　राम
अपरपदार्थवृत्तिअन्वयप्रयोजकधर्मावच्छिन्ननिरूपितसंसर्गवत्त्वं तच्च नोपदर्शितस्थले व्यभि
चा॰ सेकेऽन्वयप्रयोजकरूपद्रवद्रव्यकरणत्वावच्छिन्नसंसर्गवत्त्वादिति अतआह॰ निश्चयेत्यादि संभ　८१
वेत्याविधसंसर्गस्वरूपयोग्यत्वेऽपरपदार्थवृत्त्यन्वयप्रयोजकरूपधर्मावच्छिन्ननिरूपितसंसर्गवत्त्वे
निश्चकरणतया मे २

सा॰॰ध्येइति यावत् । निश्चयो न एकपदार्थेऽपरपदार्थसंसर्गनिश्चयो न संभवतीत्यर्थः । तादृशनिश्चयस्यैव प्रकृते उ
द्देश्यतया उद्देश्यासिद्धेरिति भावः । ननु घटमानयेत्यादौ नोपदर्शितपदार्थपक्षकानुमानात् वाक्यार्थसंसर्गसिद्धिः अपि
तु वाक्यपक्षकानुमानात् । तथाहि । घटमानयेत्यादिवाक्यं तात्पर्यविषयीभूततत्पदार्थनिरूपिततात्पर्यविषयीभूतसंस
र्गविशिष्टतात्पर्यविषयीभूतपदार्थविशेष्यकज्ञानपूर्वकम् । एतत्पदनिरूपिताकांक्षायोग्यताआसत्तिमत्तत्पदैतत्
पदघटितवाक्यत्वात् । यद्वाक्यं यत्पदनिरूपिताकांक्षायोग्यताआसत्तिमद्यद्यत्पदतत्पदोभयघटितं तत्तात्पर्यविषयतत्पदार्थ
निरूपिततात्पर्यविषयसंसर्गविशिष्टतत्पदार्थविशेष्यकज्ञानपूर्वकं यथा रजतमानयेत्यादिवाक्यमित्यादिक्रमेण
यत्तद्घटितव्याप्तिज्ञानात् सर्वत्र पदार्थसंसर्गानुमितिरिति वैशेषिकमतान्तरं दूषयति । आकांक्षेत्यासत्त्या स्वरूपसत्त
या । अज्ञाततयेति यावत् । अत्र विशेषणे तृतीया तथा चाज्ञाततेति पर्यवसन्नम् । आकांक्षा हेतुर्नैयायिकनये आकां
क्षाहेतुरित्यर्थः । तथा च तत्तत्पदार्थसंसर्गबोधं प्रागभावरूपाकांक्षा नैयायिकमते स्वरूपसती शाब्दबोधहेतुरिति यत्र नै

(२)

कुकाटीर०

याधिकनये वा कथं पदार्थसंसर्गसिद्धिः तत्र वैशेषिकनये उपदर्शितानुमानात् पदार्थसंसर्गसिद्धिरनुपपन्नैव त
त्राकांक्षाज्ञानाभावेन तद्घटितहेतुकानुमानासंभवादिति तत्र तदुपपत्त्यर्थं शाब्दस्य स्वतंत्रप्रामाण्यमावश्यक
मिति भावः। ननु एवं सति आकांक्षाघटिताएवत त्र हेतुर्वाच्य इत्यत आह योग्यतासत्तिरित्यादि अत्र बंधना उपदर्शित
साध्याव्याप्यात तथा च आकांक्षामनिवेश्य यदि योग्यतासत्तिघटितो हेतुर्न संभवति राजपुरुषसंबंधतात्पर्यं विनाप्रयुक्ते
यमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ तथाविधहेतुमति तात्पर्यविषयीभूततथाविधपदार्थद्वयसंसर्गाभावेन तद्
साध्यासत्त्वेन व्यभिचारादिति भावः। ननु उपदर्शितप्रागभावरूपाकांक्षाज्ञानहेतुप्रविष्टा अपि तु तत्तत्पदार्थसंसर्गबोधतात्पर्य
पातस्याप्यन्नैयायिकनयेपि शाब्दबुद्धिं प्रति ज्ञानमेव हेतुर्नातु उपदर्शितानुपपत्तिरिति चेदिदमपि तत्तदैव यदि संशयसाधारण राम
योग्यताज्ञानं शाब्दबुद्धिं प्रति नैयायिकनये हेतुर्न स्यात् उक्तौ नैयायिकनये शाब्दबुद्धिं प्रति संशयनिश्चयसाधारणयोग्यता
ज्ञानस्यैव हेतुतया यत्र योग्यतासंशयस्तत्रोत्पन्नपदार्थसंसर्गबोधस्य उपदर्शितानुमानान्ननिर्वाहः हेतुतावच्छेदकांशेन प्रयातम ४२

का परामर्शस्येवानुमितिहेतुत्वादिति तच्च तदुपपत्त्यर्थं शब्दप्रामाण्यमावश्यकमिति यदि चान्यत्र हेतुतावच्छेदकांशे निश्चयस्यानु
मितिहेतुत्वेपि घटकृते फलानुरोधेन तथानुपगमे क्षतिविरहः इति विभाव्यते तथापि शब्दस्य स्व[illegible]प्रमाणमावश्यकमेव अन्य
था घटादन्य इति अत्र घटप्रतियोगिताकभेदवानिति बोधस्यानुभवसिद्धस्यानुमानेनानिर्वाहात् तानिधर्मितावच्छेदकानुमिते
रनभ्युपगमादित्यादिकं बहुतरमन्यत्रानुसंधेयम् । यत्तु घटमानयेत्यादौ उपदर्शितानुमाना[illegible]मूहालंबनं ततत्पदार्थसं
र्गसिद्धावपि घटकर्मकानयनानुकूलाकृतिरिति विशिष्टवैशिष्ट्यबोधस्यानुमानेनानिर्वाहात् तदुपपत्त्यर्थं शब्दस्य स्वतंत्रप्र
माणत्वमावश्यकमिति तदसत् यतः तत्रोपदर्शितानुमानात् घटीयाकर्मतेत्यनुमित्यनंतरमानयनं घटकर्मता घटकर्मता
वद्विशेष्यकत्वप्रकारकेच्छाप्रकारीभूतविशेष्यतानिरूपकत्वादित्यनुमानाद्घटकर्मतावदानयनासिद्धौ कृतिरनुकूलतासंबं
धेन घटकर्मतावदानयनवती तथाविधसंबंधेन तथाविधानयनवान् यत्तद्विशेष्यकत्वप्रकारकेच्छाप्रकारीभूतविशेष्यता
निरूपकत्वादित्यादिक्रमेणानुमानादेव घटकर्मताकानयनानुकूलाकृतिविषयकबोधोपपत्तौ तदुपपत्त्यर्थं शब्दप्रामाण्ये वा

कारोनिरर्थक इति न वत्तत्र तथाविधहेतुज्ञानस्यानावश्यकतया न तेन तत्र तत्सिद्धिरिति वाच्यम्। वैशेषिकमते आकां
क्षादिज्ञानकाले नियतो व्याप्त्यादिज्ञानकल्पनवत् तथाविधज्ञानकल्पनस्यापि सुकरत्वादिति। ननु भवतु उपद
र्शितयुक्त्या शब्दः स्वतंत्रप्रमाणं तथापि तन्न लौकिकवाक्यमपि तु वैदिकवाक्यमेव। तथाहि। प्रमाणत्वं स्वाव्य
४३ वहितपूर्वक्षणावच्छेदेन स्वसमानाधिकरणप्रमाणांतरजन्यप्रतीतिविषयीभूतार्थविषयिणी या प्रतीतिस्तद्भिन्नप्रती
तिजनकत्वं तच्च न लौकिकवाक्ये लौकिकवाक्यजन्यबोधात्पूर्वं तथाविधवाक्यार्थविषयकानुमित्यात्मकबोधसंभ
वात् तत्र हेतुज्ञानाद्यभावादनुमितिर्न संभवतीति तु नाशंकनीयं यतः घटमानयेत्यादिवाक्यं घटविशिष्टज्ञानघ
टकभ्रमप्रमादविप्रलिप्साकरणापाटवात्मकदोषचतुष्टयान्यतरजन्यं वाक्यत्वात् यद्वाक्यं यत्प्रकारकज्ञानजन्यं तत्त
द्विशिष्टज्ञानतद्भ्रमादिदोषचतुष्टयान्यतरजन्यत्वसिद्धेः संवादिप्रवृत्तिमत्त्वादिना वक्तरि भ्रमाद्यभाववत्त्वनि ४३
श्चये यज्जन्यकर्मत्वाविषयकघटविशिष्टज्ञानानुज्ञ घटानयनादिवाद विशिष्टज्ञानान्यतरजन्यवाक्यप्रयो क्त

त्वादित्यनुमानात् तथाविधकर्मताविषयकघटज्ञानसिद्धौ तुल्यवित्तिवेद्यतया कर्मतायां तथाविधघटज्ञा
नविषयत्वसिद्ध्या कर्मताश्रयतासंबंधेन घटवती तथाविधघटज्ञानविषयत्वादित्यनुमानेन सर्वत्र लौकि
कवाक्यजन्यशाब्दबोधात्सर्वमेकपदार्थे अपरपदार्थसंसर्गसिद्धिः संभवतीति तस्मादुपदर्शितयुक्त्या लौकि
कवाक्यं न निरुक्तप्रामाण्यत्वाक्रान्तम् अपि तु प्रमाणान्तरगृहीतार्थग्राहकत्वरूपमनुवादकत्वाक्रान्तमिति लौकिकवा
क्यमनुवादकमेव वैदिकवाक्ये तु वक्तुरभावेन निरुक्तप्रमाणाद्यसंभवान्निरुक्तप्रामाण्याक्रान्तत्वेन प्रमाणमेव
तदिति। उरन्मीमांसकमतं दूषयितुमाह। निर्णीतशक्तेर्वाक्याद्धि प्रागेवार्थस्य निर्णये लिंगस्मृतिविलंबेन शा
ब्दस्यनानुवादिता। निर्णीतशक्तेर्वाक्यात वेदस्थले त्वे ह्यायाकांक्षाज्ञानादिघटितशाब्दसामग्री तद्विशिष्ट
तलौकिकवाक्यात्तु लिंगस्मृतिविलंबेन प्रागेव व्याप्त्यादिस्मृतिविलंबेनोपदर्शितानुमानात् प्रागेवार्थस्यानि
र्णये वाक्यार्थस्य शाब्दबोधसंभवे शब्दस्य लौकिकवाक्यस्य नानुवादिता। नोपदर्शितानुवादकतेति कारिका

अर्थः अयं भावः। उपदर्शितप्रणाडी सर्वत्र लौकिकवाक्यजन्यशाब्दबोधात पूर्वं संभवतीति न नियमः। एवं च य
त्र प्रथमत एवं वैदिकस्थलेष्वपि शाब्दबोधसामग्रीसमवधानं मानं तूपदर्शितानुमानसामग्रीसमवधानं तदा
सर्वत्र व्याप्तिस्मरणसामग्र्या अनियतत्वेन व्याप्तिस्मरणसंभवात तत्र लौकिकवाक्यस्य निरुक्तप्रमाणत्वाक्षेति
तथा तस्यापि प्रमाणत्वं निर्व्यूढमित्युपदर्शितजरन्मीमांसकमतमप्युक्तमेवेति। ननु शाब्दबुद्धिं प्रति अनाप्तोक्त
त्वसंदेहः प्रतिबंधकः तदुक्ते च लौकिकवाक्ये एकपदार्थविशिष्टापरपदार्थज्ञानवद्दुर्ज्ञेरितत्वरूपाप्तोक्तत्व
निश्चयात वैदिकवाक्ये तु दोषवत्पुरुषाप्रणीतत्वनिश्चयादिति लौकिकवाक्ये सर्वत्र शाब्दबोधात पूर्वानुमा राम
नानिरुक्ताप्तोक्तत्वज्ञानस्यावश्यकतया तद्घटकत्वेनैकपदार्थविशिष्टापरपदार्थसिद्धेरप्यावश्यकत्वेन
लौकिकवाक्ये अनुवादकत्वं दुर्वारमित्याशंकायामाह। व्यस्तपुंदूषणाशंकैः स्मारितत्वात पदैरमी। अन्विता इति।
४४ निर्णीते वेदस्यापि न तत्कृतः। व्यस्तपुंदूषणाशंकैः येन पदार्थानामन्वितत्वनिर्णयेन ज्ञातानामाप्तोक्तत्वसंदेहकैः पदैः ५५

स्मारितत्वात् अमी पदार्था अन्विताः परस्परसंसर्गवंत इति निर्णीते इत्यनुमितिसंभवे वेदस्यापि तदनुवादकत्वं न कथ
मिति कारिकार्थः ॥ अयं भावः यद्युपदर्शितरीत्या लौकिकवाक्यजन्यशाब्दबोधात्पूर्वमनुमानादिना पदार्थसंसर्गसि त्वेर
द्धिरावश्यकीति लौकिकवाक्यमनुवादकं तदा वैदिकवाक्येपि तद्दुर्वारमेवात्रापि शाब्दबोधप्रतिबंधकानाप्तोक्तत्वं
काक्षदासार्थं दोषवत्पुरुषाप्रतीतत्वनिर्णयस्यावश्यकतया दोषवत्पुरुषाप्रणीतपदस्मारितत्वहेतुना एकपदार्थे
अपरपदार्थसंसर्गानुमानस्य शाब्दबोधात्पूर्वं संभवात्। यदि शाब्दबोधे अनाप्तोक्तत्वसंदेहस्य ग्राह्यसंदेहप
र्यवसन्नस्याप्रतिबंधकत्वमिति वैदिकवाक्यजन्यशाब्दबोधात्पूर्वं तन्निवारकदोषवत्पुरुषाप्रणीतत्वनिर्णय
स्यानावश्यकतयानोपदर्शितरीत्या वेदस्यानुवादकत्वमित्युच्यते तदा लौकिकवाक्येन तत्सर्वं च लौकिकवा
क्यजन्यशाब्दबोधात्पूर्वमुपदर्शितानुमानस्यानावश्यकत्वात् शाब्दबोधे अनाप्तोक्तसंदेहस्याप्रतिबंधक
त्वेन तदुच्छेदकाप्तोक्तत्वनिर्णयस्यापि तदानपेक्षितत्वादिति विस्तृतं तु निरुक्तप्रमाणांतरागृहीतार्थग्राहकत्वं

न प्रमाणत्वं गौरवात्। अपि तु प्रमितिकरणत्वमेव तदिति लौकिकवाक्यजन्यशाब्दबोधात्पूर्वमुपदर्शितरीत्या क्षप
दार्थे अपरपदार्थसंसर्गासिद्धावपि तस्य प्रमाणत्वमव्याहतमेवेति। न चैवमपि शब्दस्य प्रमाणत्वमसंगतमेव
पदज्ञानं करणं पदार्थोपस्थितिर्व्यापारः शाब्दबोधः फलमिति प्रणाड्या पदज्ञानस्यैव तत्त्वादिति वाच्यम् इष्टत्वात्। न
चैवं सति शब्दः प्रमाणमिति व्यवहारो व्याहन्येतेति वाच्यम् तथाविधव्यवहारघटकीभूतशब्दपदस्य तज्ज्ञानपर राम
८५ तया अनुपपत्त्यभावात्। यद्वा शाब्दबुद्धिं प्रति ज्ञायमानपदमेव करणमिति मते शब्दस्यैव प्रमाणतया तथाविध
व्यवहारस्य स्वरसत एवोपपादनीयत्वादिति। अत्र पदज्ञानेन ज्ञायमानपदेन वा कार्यान्वितार्थविषयकशाब्दबो
ध एवोत्पाद्यते। प्रयोजकवृद्धस्य घटमानयेति वाक्यानंतरमुत्पन्नतया प्रयोज्यवृद्धस्य घटकर्मकानयनगो
चरप्रवृत्त्या अनुमितं कार्यान्वितार्थविषयकशाब्दबोधं पदज्ञानस्य ज्ञायमानपदस्य वा कारणतया बालेन ८५
८५ प्रथमतोऽवधारणात्। तथा च यत्र कार्य[illegible] तेनैव शब्दात् शाब्दबोधो जायते। इतरत्र तु न

तथेति कार्य्यबोधकपदासमभिव्याहृतानामर्थवादानामप्रामाण्यमेवेति कार्य्यान्वितपदशक्तिवादिनः प्रभाकराः
तन्न· बालेन प्रथमतः तथा कार्य्यकारणभावे गृहीतेपि आवापोद्वापक्रमेण घटादिविषयकशाब्दबोधघटपदा
दिज्ञानयोः कार्य्यकारणभावग्रहकाले कार्य्यांशमनिवेश्य लाघवात· घटादिविषयकशाब्दत्वावच्छिन्नं प्रतिघट
पदादिज्ञानत्वेन हेतुताग्रहात इति कार्य्यबोधकपदासमभिव्याहारस्थलेपि शाब्दबोधस्य सुकरतयात्रार्थ
वादानामपि प्रामाण्यसंभवात। न चैवं सति प्रथमगृहीतस्य कार्य्यांशमंतर्भाव्य कार्य्यकारणभावग्रहस्याप्रामाण्य
प्रसंग इति वाच्यम। प्रथमोत्पन्नस्य चंद्रे स्वल्पपरिमाणज्ञानस्य शास्त्रज्ञाधिकपरिमाणज्ञानानंतरं भ्रमत्वकल्प
नवत्तत्रापि तथा कल्पनस्येष्टत्वादिति। अतएव कार्य्यान्वितार्थविषयकशाब्दत्वोपस्थितिकाले अन्विता
र्थविषयकशाब्दत्वस्योपस्थितेरावश्यकतया गौरवात· कार्य्यांशमपहाय अन्वितार्थविषयशाब्दत्वावच्छिन्नं
प्रतिपदज्ञानत्वेन हेतुत्वं वाच्येनावधार्य्यते इत्यन्वयेपि घटादिपदानां स्मारिका शक्तिः कल्प्यते० पदेशानस्यमा

कु० का २९ (2)

र्य्यतावच्छेदककोटौ विषयतानिरूपकत्वेन निर्विघ्नार्थस्य पदशक्यत्वनियमादिति। अन्वये शक्तिवादिनो मह
र्षिपि निरस्ताः। कार्य्यकारणभावग्रहकाले गौरवात्। कार्य्यांशत्यागे वेत्। अन्वयांशस्यापि त्यागसंभवेन तमनंत
र्भाव्यैर शाब्दबुद्धित्वावच्छिन्नं प्रति पदज्ञानत्वेन हेतुतायाः कल्पनीयतया अन्वये घटादिपदानां स्मारिकायाः शक्तेः क
ल्पकाभावात्। न चैवं सति शाब्दबोधे कथमन्वयभानमिति वाच्यम्। घटः कर्मत्वमानयनं कृतिरिति निराकांक्ष
क्माता आधेयतासंसर्गक घटप्रकारक कर्मताविशेष्यक शाब्दबोधवारणाय कर्मताविशेष्यकाधेयतासंसर्ग
क घटप्रकारक शाब्दबुद्धित्वावच्छिन्नं प्रति घटपदोत्तराम्पदज्ञानत्वादिना आकांक्षाज्ञानहेतुताया आवश्यकतया राम
आकांक्षाज्ञानबलादेव शाब्दबोधेऽन्वयभाननिर्वाहात्। न चैवं सति शक्त्याविषयार्थस्य शाब्दबोधे भानमि
ति नियमो भज्येतेति वाच्यम्। तत्र भानशब्दस्य प्रकारताविशेष्यतान्यतररूपेण भानार्थकतया अनुपपत्त्य
भावात्। तस्मात् घटादिपदानामन्वयेन शक्तिः। अपि तु घटादावेवेति। ननु एवमपि घटे घटपदस्य शक्तिरित्यस्य

४५ ४५

द्रुमः घटादिव्यक्तीनामानंत्येनानंतव्यक्तिषु पदशक्तिकल्पनामपेक्ष्य घटत्वादिजातावेकव्यक्तौ घटादिपदशक्तिकल्प
नायाउचितत्वात् । न चैवं सति घटपदात घटबोधानुपपत्तिरिति वाच्यम् । जातेर्व्यक्तिवित्तिवेद्यत्वनियमेन जातिशक्तिज्ञा
नस्यैव जातिविशिष्टव्यक्तिविषयकशाब्दबोधत्वावच्छिन्नं प्रति हेतुत्वस्य कल्पनीयतया अनुपपत्त्यभावात् । न चैवं सत्य
पि तन्मते शक्तिविषयस्यैव शाब्दबोधविषयमिति नियमभंगो शक्यपरीहार इति वाच्यम् । तादृशनियमे मानाभावात् ।
न च जातिव्यक्तिवादिमते घटत्वेन घटपदशक्यमिति ज्ञानकाले घटत्वांशे निधर्मितावच्छेदकशक्तिज्ञानबलात शाब्दबो
धवारणाय घटेतरावृत्तित्वे सति सकलघटवृत्तित्वात सकलघटवृत्तित्वं धर्मितावच्छेदकीकृत्य घटपदशक्तिज्ञानत्वेन हे
तुत्वकल्पने गौरवं घटत्वविशिष्टे घटपदशक्तिवादिनां तु न तथा तन्मते स्वरूपतो घटत्वधर्मितावच्छेदकशक्तिज्ञानस्यैव हेतुत्वा
दिति वाच्यम् । जातिशक्तिवादे जातिविशेष्यकशक्तिज्ञानं शाब्दबोधं प्रति न हेतुः अपि तु पदविशेष्यकं शक्तिसंबंधेन
जातिप्रकारकं पदमित्याकारकं ज्ञानम् । तथोक्तरूपगमेनानुपपत्त्यभावादिति चेन्न । तन्मते व्यक्तौ जातिव्यक्त्योः संबंधे

कु॰ का॰ टी॰ २:

चपदशक्तिकल्पनामादाय विनिगमनाविरहेण जातिविशिष्टव्यक्तौ पदस्यैकशक्तिकल्पनाया एवोचितत्वात्। तथाहि। जातौ
शक्तिं कल्पयित्वा जातिशक्तिज्ञानस्य जातिविशिष्टव्यक्तिविषयकशाब्दबोधं प्रति हेतुताकल्पनेन तस्मात् जातिविशिष्ट
विषयकशाब्दबोध इत्युच्यते उतएकव्यक्तौ पदशक्तिं कल्पयित्वा व्यक्तिशक्तिज्ञानस्यैव जातिविशिष्टविषयकशाब्द
बुद्धिं प्रति हेतुताकल्पनेन तस्माज्जातिविशिष्टविशिष्टशाब्दबोध इत्यत्र विनिगमकाभावात् उभयत्र शक्तिकल्पनो
स्यावश्यकी। एवं जातिव्यक्त्योः संबंधांशे संस्थानविशेषरूपाकृतावपीति चतुर्षु पदानां नानाशक्तिकल्पनामपेक्ष्य आ
कृतिविशिष्टजातिविशिष्टव्यक्तिषु पदस्यैकशक्तिकल्पनैव लघीयसीति जात्याकृतिविशिष्टव्यक्तिरेव पदशक्याउचिता राम
च्चतएव पदानां जातौ शक्तिस्तादृशशक्तिज्ञानात्॰ जातेरेव शाब्दबोधः व्यक्तिज्ञानं तु आक्षेपात्॰ आक्षेपस्तु जातिव्य
क्त्याश्रिता जातित्वादित्याकारकमनुमानमिति भट्टमतमप्यपास्तम्। घटमानयेत्यादौ घटे द्वितीयार्थकर्मत्वान्वयानुपप
त्तिश्च प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः तस्माज्जात्याकृतिविशिष्टव्यक्तिरेव पदशक्तिः। अत एव पा ४६

४६

रमर्शे सूत्रं जात्याकृतिव्यक्तयः पदार्थ इति। एवं शक्यसंबंधात्सकललक्षणावृत्त्या पदेनोपस्थापितोऽर्थः पदार्थो दृष्टव्य इत्य
लमप्रस्तुतविचारेणेति। ननु पदर्शितरीत्या यदि शब्दः प्रमाणं तदा कथं जगत्कर्तृसर्वज्ञपुरुषधौरेयसिद्धिः प्रकृतेः क्रिय
माणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यते इत्यादिशब्दस्यैव तत्र बाधकत्वात्। एतदर्थस्तु
प्रकृतेः प्रकृतिपरिणामबुद्धितत्त्वस्य गुणैः प्रकृतिज्ञानादिभिः क्रियमाणानि कर्माणि अहंकारविमूढात्मा चेतनोऽहं
करोमीति मन्यते। कर्तृत्वाभिमानी भवतीति तस्माच्चेतने कर्तृत्वभ्रमप्रतिपादकस्यास्य शब्दस्य ईश्वरपारमार्थिककर्तृ
त्वसिद्धौ बाधकत्वात् नानुमानादिना पारमार्थिकजगत्कर्तृसिद्धिरित्यत्राह। न प्रमाणमनाप्तोक्तेर्नादृष्टः क्वचिदाप्तता
अदृश्यदृष्टौ सर्वज्ञो न च नित्यागमक्रमः। उपदर्शितवाक्यं यदि अनाप्तोक्तं तर्हि तन्न प्रमाणम्। अनाप्तोक्तेरप्रमाणत्वा
तत आप्तवाक्प्रमाणत्वादेव। ननु तेन तद्बाधकमायादिति तदाप्तोक्तं तदा तद्धेतुरीश्वरस्तदर्थगोचरयथार्थज्ञानवत्त्वविनाना
संभवतीति तस्य तदर्थगोचरयथार्थज्ञानवत्त्वस्वीकारे तद्वन्न स्यात्। तद्वाधो नित्यत्वेन भवस्य पर्युपेयं तस्मादेव सर्ववि

घटे कर्तृत्वमपि ज्ञानादौ किंचिद्विषयकत्वस्य ज्ञानकारणानियम्यत्वात् तत्स्याकर्तृत्वमेतादृशवाक्यस्यैव कर्तृ
त्वात्। न च शब्दस्यानादित्वान्नैवं पूर्वसर्गप्रलयव्यवस्थापनेन शब्दस्यापि सादित्वव्यवस्थापनादिति संपूर्णको
५१ रिकार्थः। ननुएवं सति ईश्वरे कर्तृत्वाद्यभावादेव कस्योक्तोगमस्य कोऽर्थ इत्यत आह॰ न चासौ क्वचिदेकांतः सत्त्व
स्यापि प्रवेदनात् निरंजनावबोधार्थो न च सन्नापि तत्परः असौ आगमः क्वचिदेकांतः एव न ईश्वरे कर्तृत्वाद्यभावसा
धक एवास्तीति न सत्त्वस्यापि प्रवेदनात् ईश्वरे कर्तृत्वसाधकस्यापि अहं सर्वस्य प्रभवोयतः सर्वं प्रवर्तत इत्याद्या
गमे अस्य सत्त्वादिति कारिकापूर्वार्द्धार्थः। ननुएवं सति प्रकृतेः क्रियमाणानीत्याद्यागमानामीश्वरे कर्तृत्वाद्यावेदका राम
नागमादिरुद्धार्थप्रतिपादकानामप्रामाण्यप्रसंग इत्यत आह॰ निरंजनावबोधार्थ इत्यादि अंजनपदार्थो धर्माधर्मौ
४० इयमात्तथा च प्रकृतेः क्रियमाणानीत्याद्यागमः ईश्वरे धर्माधर्माभावप्र[illegible]पादनपरो न तु सन्नापि कर्तृत्वाभावादिबो ४०
धकपदघटितोऽपि तत्परः ईश्वरे कर्तृत्वाभावप्रतिपादनात् पर्यवसित इति का[illegible]दत्तीयार्द्धार्थः। तथा च प्रकृतेः क्रियमाण

नीत्याद्यागमानामीश्वरे धर्माधर्माभावप्रतिपादनमात्रतात्पर्यं तथा [illegible] कर्तृत्वादिविशिष्ट ईश्वरसाधकवेदा-
र्थप्रतिपादकतयाऽप्रामाण्यशंकावकाश इति भावः। अत्र तु ईश्वरे कर्तृत्वसाधकवेदानामेव चेतने कर्तृत्वाद्यभा-
48 वप्रतिपादकतात्पर्यकतामादाय विनिगमनाविरहेणाशंकनीयः। ईश्वरे कर्तृत्वसाधकयुक्तीनां बाहुल्येन तथावि-
धविनिगमनाविरहभंजकत्वादिति। ननु यदि चेतनः सर्वज्ञः स्यात् तर्हि इष्टसाधनत्वादिना यागादेः प्रतिपादकवाक्यं
विनापि तत्प्रवर्तकः स्यात्तथा च यागादिप्रवृत्तेरिष्टसाधनत्वादिप्रकारकयागादिप्रवृत्तेरिष्टसाधनत्वादिप्रकार-
कयागादिविशेष्यकबोधजनकवेदप्रयोज्यत्वं चेतने सार्वज्ञ्याभावं विनानुपपन्नमित्यनुपपत्तिज्ञानात्मकार्था-
पत्त्याख्यातिरिक्तप्रमाणमीश्वरे सार्वज्ञ्याभावसाधकं सर्वज्ञेश्वरबाधकं स्यादित्यत आह। हेत्वभावे फलाभावात्
प्रमाणेऽसति न प्रमा। तदभावात्प्रवृत्तिर्नैकर्मिवादेप्ययं विधिः। हेत्वभावे कारणाभावे फलाभावात् कार्याभावात्
प्रमाणेऽसति यागादौ इष्टसाधनता[illegible]बोधकवेदे असति [illegible] यागादौ इष्टसाधनताप्रमा तदभावात् यागादौ इ-

कु.का.

सोवनत्वादिप्रमायाअभावात प्रवृत्तिर्न यागादौ प्रवृत्तिर्न स्यादिति कारिकाद्वितीयपर्यंतार्थः। अयं भावः। ईश्वरे सार्व-
स्याभावे विनायागादि [redacted] प्रवृत्तौ वेदप्रयोज्यत्वेनानुपपन्ने प्रवृत्तिं प्रति इष्टसाध-
नताज्ञानस्य हेतुतया इष्टसाधनताबोधकवेदं विना प्रकारांतरेणानुपपद्यमानायां प्रवृत्तौ वेदप्रयोज्यत्वस्यावश्यमभ्यु-
पेयत्वात। न च वेदादिष्टसाधनताज्ञानं विनापि भूतावेशन्यायेन ईश्वरादेव प्रवृत्तिसंभवेनेदं संभवदुक्तिकमिति वाच्यम्।
यतो भूतावेशन्यायेन ईश्वराज्जायमाना प्रवृत्तिर्निष्फला वेदप्रयोज्यप्रवृत्तेरेव स्वर्गादिफलजनकत्वनियमात। त-
था च स्वर्गादिफलिका प्रवृत्तिर्न वेदजन्येष्टसाधनताज्ञानं विनापीति। तस्यास्तत्प्रयोज्यत्वमावश्यकत्वमित्यपदर्शि-
तानुपपत्तिज्ञानासंभवेनानातिरिक्तार्थापत्त्याख्यप्रमाणं सर्वज्ञेश्वरे बाधकमिति। ननु इदं तदा स्यात यदि प्रवृत्तिं प्रति राम
इष्टसाधनताज्ञानहेतुता सर्वसिद्धा स्यात। तदेव नेत्यत आह। कर्मीवादेपर्यंविधिरिति येनेश्वरो नाद्रियते कर्मण्येव ड-
६८ गज्ञायत इत्युच्यते। तन्मतेपि अयं कार्यकारणभावः आवश्यक इत्यर्थः। अन्यथा तन्मतेपि कर्मत एव प्रवृत्ता ६८

स्य कार्य्योपपत्तौ तदा वेदकर्तृवेदस्य निष्प्रयोजनकत्वं दुर्वारं स्यादिति भावः। अपि च यदि अर्थापत्त्या स्वप्रमाणान्तरं युक्तिसि
द्धं स्यात् तदा तत्सर्वज्ञेश्वरे बाधकं स्यात् तदेव न तस्यानुमानान्तर्भावेनैवोपपत्तेरित्याह ॥ अनियम्यस्य नायुक्तिर्नो नियं
तोपपादकः। न मानयोर्विरोधोऽस्ति प्रसिद्धेरप्यसौ समः। अत्र यत इति पदं अत इति पदं वा व्याख्यार्थं यतः अनियन्तान्यव्या
पकेन तु उत्पादकेन अव्याप्यस्य तु उपपादकः अतः अनियम्यस्य अव्याप्यस्य नायुक्तिर्नो योग्यता व्यापकं विना नानुपपत्तिरि
ति यावदिति कारिकापूर्वार्द्धार्थः। अयं भावः। ज्योतिःशास्त्रावधारितशतवर्षजीवित्वविशिष्टे देवदत्ते गृहासत्त्वनि
श्चयानन्तरं बहिःसत्त्वकल्पनस्यान्यथानुपपत्त्या अर्थापत्त्याख्यप्रमाणान्तरमुपेयते तन्नु प्रमाणान्तरं शतवर्षजीवि
नो देवदत्तस्य गृहासत्त्वं बहिःसत्त्वं विनानुपपन्नमित्युपपत्तिज्ञानमिति मतं तदा निर्वहति। यदि अनुपपत्तिशा
ब्दार्थः व्यतिरेकव्याप्तिर्न स्यात् तावत् स्तत्र अव्याप्यस्य अव्यापकं विना अनुपपत्त्याभावेऽव्याप्यस्यैव व्यापकं विना अनु
पपत्तिरिति नियमात् व्यतिरेकव्याप्तिरेवानुपपत्तिःशब्दार्थः। तथा च शतवर्षजीवित्वविशिष्टगृहासत्त्वमिति के

तिरेकव्याप्तेर्ज्ञानपर्यवसन्नतया व्याप्तिज्ञानात् सकलानुमानविषयैव तस्याऽनुमित्यात्मकबहिःसत्त्वज्ञानजनकत्वं
संभवे व्यर्थमर्थापत्त्याख्यातिरिक्तप्रमितितत्करणत्वाख्यातिरिक्तप्रमाणत्वकल्पनयेति न च लाघवात् साध्यवदन्य
वृत्तित्वात्मकोऽन्वयव्याप्तिज्ञानस्यैवानुमितिहेतुतया तथाविधव्यतिरेकव्याप्तिज्ञानादनुमित्यसंभवेन तदा बहिः
सत्त्वज्ञानोपपत्त्यर्थमर्थापत्त्याख्यातिरिक्तप्रमितितत्करणत्वेन व्यतिरेकव्याप्तिज्ञानात्मकानुपपत्तिज्ञानस्य प्रमाणां
तरत्वादिकल्पनमावश्यकमिति वाच्यम्। व्यतिरेकव्याप्तिज्ञानस्यार्थापत्त्यात्मकविलक्षणप्रमितिजनकत्वांगीकारे व्यति
रेकव्याप्तिज्ञानान्वयव्याप्तिज्ञानयोः समवधानदशायां ज्ञानद्वययौगपद्यापत्तिवारणाय तादृशापरसामग्र्याः प्रतिबंधकत्व राम
कल्पने न गौरवस्य दुष्परिहरतयाऽनुमितिं प्रति व्यतिरेकव्याप्तिज्ञानस्यापि हेतुताकल्पनस्यावश्यकत्वेनोपदर्शितरीत्या
ऽर्थापत्त्याख्यप्रमाणांतरकल्पनायाऽसंभवात्। वस्तुतस्तु साध्यवदन्यावृत्तित्वरूपान्वयव्याप्तिज्ञानस्येव साध्याभाव
४८ व्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानस्याप्यनुमितिहेतुत्वमावश्यकं विनिगमनाविरहात्। ननु श ४८

रीरलाघवमेवविनिगमकमिति चेत्‌ यतः शरीरलाघवेनानुमितिं प्रतिसाध्यवदन्यावृत्तित्वरूपान्वयव्याप्तिज्ञानहेतु
त्वे तदैव यदि अनुमितिं प्रतिव्याप्तिज्ञानस्य सातत्येणैव कारणत्वं कल्प्येत तदेव न अपितु व्याप्तिविशिष्टहेत्वभावांश्च स्था
तपक्षे इत्यापत्तिं प्रति आपाद्यव्यतिरेकनिश्चयहेतुत्वे कल्पनीये कार्यतावच्छेदककोटावापाद्यव्यतिरेकनिश्चयस्याव्यवहि
तोत्तरत्वसंबंधेन वैशिष्ट्यं निवेश्य आपत्तित्वमनिवेश्यानुमित्यापत्त्युभयसाधारण्[illegible]त थाविधनिश्चयविशिष्टत्वावच्छि
न्नेत थाविधनिश्चयत्वेन हेतुता कल्पनेन लाघवेन तन्निर्वहितात्‌ तथा च व्यतिरेकव्याप्तिज्ञानस्यापि अनुमितिहेतुत्वस
उपदर्शितरीत्या लघुत्वेन निर्वाहसंभवे शरीरगौरवेन तत्र तत्र हेतुरित्यङ्गीकारमादरणीयैवेति व्यतिरेकव्याप्तिज्ञानस्यापि अ
नुमितिहेतुतया व्यतिरेकव्याप्तिज्ञानात्म[illegible]कानुपपत्तिज्ञानादनुमित्युत्पत्तौ बाधकाभावेन उपदर्शितस्थलेपि अनुमाना
देव बहिः सत्त्वज्ञानसंभवे व्य तिरेकत्वेनातिरिक्तार्थापत्त्याख्यप्रमाणकल्पनये तत्फलमप्रसक्तं तद्विचारेण शतवर्ष
जीवी देवदत्तः क्वचिदस्तीति प्रमायां गृहे नास्तीति प्रमाग्रहान्यविषयविरुद्धार्थविषयकत्वपरीहारार्थं गृहे नास्तीतिज्ञानं हि

१ करणीकों [illegible]क्कचित्स्तीति ज्ञानस्य गृहान्यसत्त्वविषयकत्वकल्पनरूपमर्थापत्तिलक्षणं करणं कल्प्यते नन्वा आवि

कुकार्टी षयविरुद्धार्थविषयकत्वे ज्ञानात्मकार्थापत्त्याख्यातिरिक्तप्रमाणत्वं च केचिदमनंतित तन्मतं दूषयति। नमानयोर्विरोधो
स्तीति तथाविधप्रमयोर्मध्ये क्वचित्स्तीति ज्ञानस्य गृहे नास्तीति ज्ञानविषयविरुद्धार्थविषयकत्वमवस्तुगत्या नास्ती
त्यर्थः। तथा च वस्तुगत्या यत्रैकज्ञा[illegible]ने ज्ञानांतरविषयविरुद्धार्थविषयकत्वं नास्ति तत्र विरुद्धार्थविषयकत्व
ज्ञाने सति तत्रैव विरुद्धार्थविषयकज्ञानोपपत्त्यर्थः। विषयभेदस्य व्यवस्थापकत्वमुपेयते न तु तदर्थमर्थापत्त्याख्या
तिरिक्तप्रमाणांगीकारोपीति गौरवादिति भावः। प्रसिद्धे चेति। प्रसिद्धेपि अनुमानप्रमाणस्थलेपि अर्थापत्त्या वि
षयपरिच्छेदसमः संभवतीत्यर्थः। तथा चार्थापत्त्याख्यातिरिक्तप्रमाणांगीकारे धूमहेतुकवह्न्याद्यनुमानस्थलेपि वह्निं वि
ना धूमोनुपपन्न इत्यनुपपत्तिज्ञानरूपातिरिक्तार्थापत्त्याख्यप्रमाणबलादेव वह्निः सेत्स्यतीति अनुमानप्रमाणमप्य
पगमो निरर्थकः स्यादिति भावः। यद्यपि यत्र तथाविधानुपपत्तिज्ञानं नास्ति अपितु अन्वयव्याप्तिज्ञानं तत्राप्यभावसि
द्धस्य पर्वते वह्निज्ञानस्योपपत्त्यर्थमनुमानप्रमाणस्योपगम आवश्यक इत्युक्तपदर्शितप्रतिवंदिरप्रयोजिका। तथाप्य
५० र्थापत्तौ अनुमितिभेदसाधकदृढतरयुक्तेरभावेन तत्र तद्भेदसिद्धौ प्रमाणाभावात् अर्थापत्तिरनुमितिरेवेत्यत्र ता ५०

तु ३

त्पर्य्यमवसेयम। पूर्वमनुपलब्धेः प्रमाणत्वमुपेत्य प्रकारांतरेण इंद्रियेबाधकत्वाभावउपपादितः। इदानीं तस्यैव
प्रमाणत्वव्यवस्थापनेनतमुपपादयति। प्रतिपत्तेरपारोक्ष्यात। इंद्रियस्यानुपलब्धत्वात। अज्ञातकरणत्वाद्धि भावावेशा
श्च चेतसः प्रतिपत्तेः। अभावप्रतिपत्तेः। अपारोक्ष्यात। अपरोक्षज्ञानत्वात। इंद्रियजन्यत्वं साधनीयमिति शेषः। तथा
चाभावप्रतिपत्तिरिंद्रियजन्या अपरोक्षत्वादित्यनुमानात अभावबुद्धेः इंद्रियजन्यत्वेसिद्धे सर्वत्र प्रत्यक्षप्रमाणत्व
त्वादेवाभावबुद्ध्युपपत्तौ अनुपलब्ध्याख्यातिरिक्तप्रमाणांगीकारो व्यर्थ इति भावः। उपदर्शितानुमाने हेतोः स्वरूपासि
द्धिं वारयति। इंद्रियस्येति। अभावप्रतिपत्तौ इंद्रियव्यापारस्यान्वयव्यतिरेकानुविधानादित्यर्थः। तस्माच्चेंद्रियव्याप
रान्वयव्यतिरेकानुविधायित्वेन तत्रापरोक्षत्वसाधनान्नोपदर्शितानुमाने स्वरूपासिद्धिरिति भावः। ननु अपरोक्ष
त्वसाधकं न केवलमिंद्रियान्वयव्यतिरेकानुविधायित्वं मत्प्रयोजकत्वात। अपितु अनन्यथासिद्धअन्वयव्यति
रेकानुविधायित्वं तच्च प्रकृते नास्ति तदनुपलब्ध्याधिकरणज्ञानेन तस्य अन्यथासिद्धत्वादित्यत आह० अज्ञातक

व्यापारो २

कु॰मा॰टी॰ रणत्वाच्चेति अभावप्रतिपत्तेरज्ञातकरणजन्यत्वाच्चेत्यर्थः। अयं भावः। अभावबुद्धिं प्रति अनुपलब्धिर्न ज्ञाता वेर
ऽज्ञातकरणजन्यत्वस्य अनुमित्युपमितिशाब्दान्यतमत्वनियमात् अपि तु अज्ञाता सा तथा। तथा च अज्ञातसाध
रणकरणजन्यत्वस्य प्रत्यक्षत्वव्याप्यतया तेनैव अभावबुद्धेः प्रत्यक्षत्वात्मकापरोक्षत्वसिद्धिर्निष्प्रत्यूहैवेति ननु
५१ अज्ञातकरणत्वस्यापरोक्षत्वव्याप्यत्वे मानाभावान्न तथेत्यत आह भावावेशाच्चेति चेतसो मनसः भावावेशात् मा
नसभिन्नानुभवे भावभूतकरणसहकारित्वनियमादित्यर्थः। तथा च मानसान्याभावानुभवः मनोभिन्नभावात्मक
करणजन्यः मानसान्यानुभवत्वादित्यनुमानात् तत्र मनोभिन्नभावात्मककरणजन्यत्वसिद्धौ इतरबाधादिन्द्रियजन्य राम
त्वसिद्धाविन्द्रियेणैव सर्वत्राभावबुद्ध्युपपत्तौ अतिरिक्तानुपलब्ध्याख्यप्रमाणाङ्गीकारो निरर्थक इति भावः। यद्यपि
मानसान्यानुभवस्य भावभूतमनोभिन्नकरणजन्यत्वनियमस्याप्रयोजकतया अनुपलब्धेः प्रमाणत्वनिरासि
५१ केयं युक्तिः शिथिलैव। तथापि तत्र व्यापाराभावेन करणत्वाभावात् न प्रमाणत्वं संभवतीत्यत्रैव तात्पर्यमुन्नेयम्॥ ५१

यत्तु यदि नानुपलब्धिः प्रमाणं तदा गृहाद्बहिर्निर्गतश्चैत्रः केनचित्पृष्टस्तत्र चैत्र आसीदिति स तद्गृहं ध्यात्वाव
दति नासीत्तत्र मैत्र इति तत्कथमुपपद्येत तत्र तथाविधनास्तिताज्ञानं स्मरणात्मकं न संभवति। गृहज्ञानकाले मैत्र
ज्ञानाभावेन प्रतियोगिज्ञानाभावात्तथाविधानुभवासंभवात् तथाविधज्ञानासंभवे च चैत्रस्य तथाविधवाक्यप्र
योगोऽनुपपन्नः वाक्यप्रयोगं प्रति वाक्यार्थज्ञानस्य हेतुत्वादित्यनुपलब्ध्याख्यातिरिक्तप्रमाणमुपेत्य तस्मादेतत्
त्र तथाविधनास्तिताज्ञानं संभवतीत्यवश्यमुपगंतव्यमिति तदप्यसत् तद्गृहे मैत्राभाववन्मैत्रतुल्यपरिमाणकघटा
दिमत्ता स्मरणकाले मैत्रवत्त्वेनास्मर्यमाणत्वादित्यनुमानादेव तत्र तथाविधनास्तिताबुद्ध्युपपत्तौ तदर्थमनुपल
ब्धेः प्रमाणत्वाभ्युपगमस्य निरर्थकत्वादिति प्रकारांतरेणाभावज्ञानस्येंद्रियजन्यत्वं प्रसाध्य अनुपलब्धेः प्रमाणां
तरत्वं निरोकरोति प्रतियोगिनि सामर्थ्याद्व्यापाराव्यवधानतः। असाश्रयत्वाद्दोषाणामिंद्रियाणि विकल्पनात्। अ
त्र इंद्रियाणीति पक्षः। अभावग्राहकानीति साध्यं [illegible] प्रतियोगिनि सामर्थ्यादिति। प्रतियोगिग्राहकत्वा

दित्यर्थः॰ तथा च यद्यपि प्रतियोगिग्राहकं तत्स्वप्रतियोगिकाभावग्रहजनकं यथा अनुमानादिकं घटस्यैव तदभावस्यापि
ग्राहकमिति यत्तद्घटितसामान्यव्याप्त्या इंद्रियस्याभावग्राहकत्वे सिद्धे तुल्ययुक्त्या अभावग्रहस्यापि इंद्रियजन्यत्वे सिद्धे
इंद्रियादेव सर्वत्राभावप्रतीत्युपपत्तौ व्यर्थमनुपलब्धेः प्रमाणत्वमिति भावः। न चोपमाने व्यभिचारेण उपदर्शितयत्तद्घटित
सामान्यव्याप्तेरभावात् कथमिदमिति वाच्यम्। तत्रोपमानभिन्नत्वविशेषणोपादानं नानुपपत्तेरभावादिति। ननु प्रतियोगि
ग्राहकत्वं प्रतियोगिग्रहजनकत्वं तत् ज्ञानान्यथासिद्धिघटितमिति उपदर्शितानुमाने हेतुः स्वरूपासिद्ध इंद्रियस्य अधिकर
णज्ञानेनाभावबुद्धिं प्रति अन्यथासिद्धत्वादित्यत आह॰ व्यापाराव्यवधानत इति अधिकरणज्ञानस्य तत्र व्यापारत्वेन त
त्रेंद्रियस्यान्यथासिद्धत्वाभावादित्यर्थः। व्यापारेण व्यापारी नान्यथासिद्ध इति प्रवादादिति शेषः। उपदर्शितानुमानस्याप्र
योजकत्वे प्रकारांतरेणाभावज्ञाने इंद्रियजन्यत्वं साधयति अक्षाश्रयत्वादिति दोषाणां पित्तादिदोषाणामिंद्रियाश्रितत्व
नियमादित्यर्थः॰ अयं भावः। अभावज्ञानस्येंद्रियाजन्यत्वे अभावप्रमाणानुपपत्तिः तज्जनकस्य दोषवत्करणस्य ५२

भावात् दोषस्य इंद्रियवृत्तित्वनियमेन अनुपलब्धौ तदसंभवादिति तथाविधभ्रमान्यथानुपपत्त्या अभावभ्रमः इंद्रि-
यजन्यः भ्रमत्वादित्यनुमानात् अभावबुद्धाविंद्रियजन्यत्वाभ्युपगमावश्यकत्वे अन्यत्रापि तेनैवाभावबुद्ध्युपपत्तौ
अनुपलब्धेः प्रमाणत्वाभ्युपगमो निरर्थक इति । यदि च भ्रमं प्रति दोषवत्करणं न हेतुरपि तु दोषावतदनुपदर्शितानु-
मानस्यापि प्रयोजकतया अभावबुद्धाविंद्रियजन्यत्वे युक्त्यंतरमाह ॰ विकल्पनादिति ॰ अभावाधिकरणयोर्वैशिष्ट्या-
वगाहिज्ञानस्यानुभवसिद्धत्वस्य सत्त्वादित्यर्थः ॥ अयं भावः । अभावबुद्धेरिंद्रियजन्यत्वाभ्युपगमे अधिकरणाभा-
वयोर्वैशिष्ट्यबुद्ध्यनुपपत्तिः परस्परजातिद्वयसांकर्यमिव एकत्र ज्ञाने असाधारणप्रमाणद्वयजन्यत्वाभ्युपग-
मस्याशक्यतया अनुपलब्धिप्रमाणजन्याभावबुद्धाविंद्रियेण अधिकरणभावासंभवात् अनुपलब्धेस्तु अभा-
वमात्रग्राहकत्वेन तत्र प्रकारांतरस्यासंभवादित्यनुकूलतर्कसहकृतेनाभावबुद्धिरिंद्रियजन्या अधिकरण-
विषयत्वादित्यनुमानेन अभावबुद्धाविंद्रियजन्यत्वसिद्धौ इंद्रियवत्त्वादेव सर्वत्राभावबुद्ध्युपपत्तौ व्यर्थोऽनुपल-

कु॰ का   दीर   वेप

श्चेः प्रमाणत्वाभ्युपगम इति इदं तु न विचारसहं मातत्वाद्धि। यथा घ्राणेन्द्रियजन्यसौरभज्ञानानंतरं सुरभि चंदनमि
त्यनुपनीतभानं तथा अनुपलब्धिप्रमाणजन्याभावबुद्धेः चरमभावादिकरणाभाववैशिष्ट्यावगाहि ज्ञानमनुपनीत
६३ मानमेवेत्यभ्युपगमेनैव अभावबुद्धेरिंद्रियजन्यत्वं विना अधिकरणाभाववैशिष्ट्यावगाहिबुद्ध्युपपत्तौ कथं
तदन्यथानुपपत्त्या अभावबुद्धेरिंद्रियजन्यत्वाभ्युपगम इति अनुपलब्धेः प्रमाणत्वाभावे पूर्वोक्तयुक्तिरेवावसेया न
नु अभावबुद्धिश्चेदिंद्रियजन्या तदा कथमभावस्य निर्विकल्पकावेद्यत्वसिद्धांतः इंद्रियजन्यज्ञानविषयस्य निर्वि
कल्पकवेद्यत्वनियमात् कथं वा इंद्रियेणाभावबुद्धिः तत्रेंद्रियप्रत्यासत्तेरभावादित्यत आह अवच्छेदकग्रहध्रौ राम
व्यादध्रौव्येसिद्धसाधनात् प्राप्त्यंतरेणावस्थानात् नो चेदन्योपि दुर्घटः अवच्छेदः प्रतियोग्यादिः तद्ग्रहस्य ध्रौव्यात्
अभावबुद्धेः पूर्वमावश्यकत्वात् अभावो न निर्विकल्पकविषय इति शेषः अयं भावः अभावबुद्धिं प्रति प्रतियोगिज्ञा
५३ नहेतुत्वमवश्यं वाच्यम्। अन्यथा नेति प्रतियोग्यमिश्रिताभावप्रत्ययापत्तेः। नन्वप्रतियोगिज्ञानं विनापि इदंत्व ५३

त भावा

तस्मात् ज्ञाततावि षयकत्वोपगमेन परिहरणीया। भ्रमातिव्याप्तिस्तु तत्र तदितित्प्रकारकत्वरूपयथार्थत्वविशेषणेनैव निरस
नीयेत्यतो ज्ञातताख्यातिरिक्तपदार्थविषयता स्वभावनियमाभावादुपकारोपि दुर्घटः सुघटत्वेपि सत्यर्थे असति का गतिरि
त्यथा स्वभावनियमात् कारणविशेषस्य कार्यविशेषजनन स्वभावनियमानभ्युपगमात् ज्ञातताख्यातिरिक्तपदार्थेपि
दुर्घटः। किंचिद्विषयत्वनियंत्रितः स्यादिति। तथाविधनियमाभ्युपगमस्त्वावश्यक इति शेषः। तथा च तादृशस्वभावनि
यमेनैकविषयकज्ञानस्यान्यविषयकत्वाभावात्। किं ज्ञानस्य किंचिद्विषयकत्वनियमोपपत्तौ तदुपपत्त्यर्थं ज्ञातता
ख्यातिरिक्तपदार्थाभ्युपगमो व्यर्थ इति भावः। ननु ज्ञानातिरिक्तकार्यजनने कारणस्य। तथा स्वभावनियमो ज्ञानस्य
य किंचिद्विषयकत्वोपपत्त्यर्थं ज्ञातताभ्युपगमस्त्वावश्यक इत्यत आह। सुघटत्वेपीत्यादि। अन्यथा ज्ञानरूपकार्य
जनने तथाविधस्वभावनियमानभ्युपगमे सत्यर्थे वर्तमानविषये सुघटत्वेपि ज्ञातताख्यातिरिक्तपदार्थोत्पादसंभ
वेपि असति अतीतविषये का गतिः ज्ञातताया असंभवः। पूर्वकारणतया अतीतविषयस्य तत्रोपादानकारणत्वासंभवात्

कु.क.टी.२ [redacted]

प्रत्यक्षानुभवो नाधिकेन ज्ञाततारव्यातिरिक्तपदार्थे साधक इति तत्रावश्यं तथाविधस्वभावनियममुपेत्य किंचिद्विषय
कत्वमुपपादनीयमिति सर्वत्र तेनैव किंचिद्विषयकत्वोपपादनेनेति फलो ज्ञाततास्यपगम इति भावः। ननु घटं जानाती
त्यादौ क्रियाकर्मनिष्ठफलजनिकेति नियमात ज्ञानरूपधात्वर्थे तादात्म्येन क्रियारूपहेतुना कर्मनिष्ठफलजन
कत्वे साधनीये इतरबाधबलात ज्ञाततारव्यातिरिक्तपदार्थसिद्धिरित्यत आह० अनैकांतादसिद्धेर्वा० न च लिंगमित्र
क्रियात्वेद्विशिष्यप्रकाशत्वान्नाध्यक्षानुभवोधिकैः ज्ञानं कर्मनिष्ठफलजनकं क्रियायाइति तादात्म्येन क्रियाहेतु
कानुमाने धात्वर्थरूपाक्रियायाहेतुत्वेऽनैकांतात घटमिहतीत्यादौ घटात्मककर्मनिष्ठफलजनकेऽश्वारूपा राम
धात्वर्थे व्यभिचारात स्वरूपक्रियायाहेतुत्वे अत्र चासिद्धेः ज्ञानरूपपक्षे हेतुरसिद्धेः। इह ज्ञाततासाधने क्रियात्व
लिंगं न हेतुरिति कारिकापूर्वार्धार्थः।। ननु तथापि ज्ञातो घट इति प्रत्यक्षेण ज्ञाततासिद्धिर्निर्विघ्ना स्यादेवेत्यत आ
५७ ह तद्वैशिष्ट्येत्यादि० तद्वैशिष्ट्यप्रकाशत्वात ज्ञानविषयत्ववैशिष्ट्यविषयकत्वात अध्यक्षानुभवो ज्ञातो घट

त्कल्पनमिति चेत् मास्तु उपदर्शितरीत्या अभावबुद्धिं प्रति प्रतियोगिज्ञानत्वमात थापि अभावस्यानिर्विकल्पकाव
घत्वसिद्धं ततः सुदृढ एव उपदर्शितरीत्यापि विशेषणतया प्रतियोगिविषयकस्यैवाभावप्रत्यक्षस्योपगमादिति यदि चेद्
यसंबंधविशेषणतायाः कार्यतावच्छेदककोटौ प्रतियोगिविषयतानिवेशे गौरवात् तदनिवेशे एवं तथाविधकार्यका
रणभावः कल्प्यते। प्रतियोग्यमिश्रिताभावप्रत्यक्षापत्तिस्तु इष्टापत्त्या न संभवतीति विभाव्यते तदा अभावस्य नि
र्विकल्पकवेद्यत्वमप्युपेयते इत्यभिप्रायेणाह अध्रौव्येति सिद्धसाधनादिति। अध्रौव्ये अभावप्रत्यक्षे प्रतियोगि
भानानैयत्ये सिद्धसाधनात्। अभावनिर्विकल्पकाभ्युपगमस्यावश्यकत्वात्। अभावस्यापि निर्विकल्पवेद्यत्वमुपे
यत इति शेषः। तथा चाभावस्य निर्विकल्पकवेद्यत्वसिद्धांतो निर्युक्तिकतया अश्रद्धेय इति भावः। अभावेंद्रियप्र
त्यासत्त्यभावे नाभावप्रत्यक्षं स्यादिंद्रियजन्यं न स्यात् इत्याशंकामुद्धरति। प्राच्यंतरेनवस्यानादिति। अभावस्य स्व
रूपसंबंधातिरिक्तसंबंधस्वीकारे तत्स्वरूप संबंधांतरस्वीकारे [illegible] नेरित्यर्थः। तत्तत्कालीनत्वविशिष्ट

कु·का·टी· ट·

प ५६

तल्लतादात्म्यादि स्वरूपस्यैवाभावसंबंधत्वमिति शेषः। तथा चेंद्रियसंबंधनिरूपकसंबंधात्मकविशेषणताया एव
तत्रेंद्रियप्रत्यासत्तित्वसंभवेनानुपपत्त्यभाव इति भावः। नवीनास्तु लाघवादतिरिक्तविशेषणताविशेषस्यैव तत्सं
बंधत्वाभ्युपगमौचित्यं संबंधकल्पने लाघवानादरे समवायोपि विलुप्येत। तथाविधस्वरूपसंबंधेनैव रूपादिप्रत्य
यनिर्वाहात् न चैवं सत्यनवस्थेति वाच्यम्। बीजांकुरन्यायेनानादित्वेन तत्परीहारात्। एवं चेंद्रियसंबंधनिरूपिता
तिरिक्तविशेषणताया एव तत्रेंद्रियप्रत्यासत्तित्वमित्याकूतमुपदर्शितरीत्या अभावनिर्विकल्पकाख्याभ्युपगमः त
थाविधस्वरूपस्याभावसंबंधत्वाभ्युपगमस्यानुपपत्तेः प्रमाणत्वाभ्युपगन्तॄणामप्यावश्यक इत्याह नोचेत्त्यादि। अ
भावनिर्विकल्पकानभ्युपगमे उपदर्शितस्वरूपस्याभावसंबंधत्वानभ्युपगमे वानुपपत्तेः प्रमाणत्वकल्पेपि बुद्धिवि
षयस्य निर्विकल्पकत्वे घटत्वनियमोधिकरणे अभाववत्ताबुद्धिप्रकारोपि दुर्घट इत्यर्थः। अत्र त्वत्तादि मिरेमिरे वमधरो
दूरे विरोधाद्यः प्रायोयमनुरववीद्गौ कविबुधैरात्मापि नासाद्यते तेस्य वीनविषयेयमेकम् समस्तकुंदनीलोत्सवं दे
ईश्वरानभिव्यक्ते न तत्तीयस्तो

५

न / ७ विरोधोदयो दूरे न संभवतीत्यर्थः २ सर्वानुविधेयम ५

वानामपिदेवमुद्भवदति श्रद्धाः उपधामहे अत्र यतः पदं अतः पदं च पुरलीयंतत्र यावयतः एभिरीश्वरे कर्तृत्वाद्यभावसाधक
त्वेनाभिमतैः प्रत्यक्षादिभिः प्रमाणैर्यन्मुख्यवीक्षणे कविधुरैर्येस्य ईश्वरस्य मुख्यवीक्षणेन ज्ञानसापेक्षत्वेन एकेविधुरैर्धर्मि
ग्राहकप्रमाणं मनाधविशिष्टैरात्मापि नासाद्यते मुख्यमेव फलजननोन्मुखं कर्तुं न शक्यते अतः अधरो ... प्रत्यक्षादि
प्रमाणस्य फलजननोन्मुखतायाः पश्चाद्भावी अनुविधेयमवश्यं यस्य एतादृशं एकं सजातीयद्वितीयरहितमसमस्तंदं दली
लोत्सर्वं अ समानिरूपमायास्वच्छंदलीलाचेतनांतराप्रयोज्यक्रीडासेवोत्सवो दुःखाजनकं कर्मं यस्य तादृशं देवानामपि सर्वे
देवेश्वरमुद्भव इति श्रद्धा अस्युग्रम श्रद्धाविशिष्टावर्णा उपधामहे प्रणवामह इति संग्रहश्लोकार्थः समाप्तस्तृतीयस्तवकः ॥
ननूपदर्शितरीत्या वेदादिकर्तृत्वेनेश्वरासिद्धावपि तस्य प्रमात्मकज्ञानमसिद्धं त्वसमानाधिकरणत्वाव्यवहितपूर्ववर्तित्वा
नासमानविषयकत्वरूपागृहीतग्राहित्वात्मकप्रमात्वस्यानित्यतदीयज्ञाने अभावात् तथा च ईश्वरो ... स्वतंत्रप्रमि
त्यमूलकत्वेनाप्रामाण्यशंकया महाजनपरिग्रहो न स्यादित्याशंकामपनेतुं प्रमात्वमन्यथानिर्वक्ति ... अथानेराधिकव्याप्ते

रलक्षणं पूर्वदृक्यथार्थानुभवो मानमपेक्ष्यत इष्यते धारावाहिकप्रमात्मकविशिष्टबुद्धावव्याप्तेर्भ्रमत्रकं विशिष्टविशिष्ट
बुद्धावतिव्याप्तेश्च अपूर्वदृक् अपूर्वदृकत्वं निरुक्त्वा गृहीतग्राहित्वमिति यावता। अलक्षणं न प्रमालक्षणं ननु तदा तत्ते
किञ्चित्तत आह· यथार्थानुभवो मानमिति किंतु तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपकानुभवत्वं तत्त
प्रकारकानुभवप्रमात्वमित्यर्थः। ननु अत्रानुभवत्वनिवेशप्रयोजनाभाव इत्यत आह अनपेक्षत इष्यते तद्गतस्मृतौ तं
त्रिकानां प्रमाव्यवहारस्य अभावेन तत्साधारणप्रमालक्षणस्यानपेक्षिततयेत्यर्थः· तथा च तावता त्रिकालं स्मृतौ प्रमाव्यव
हाराभावेन तस्या अलक्ष्यतया तद्वारणार्थं तत्रानुभवत्वनिवेश आवश्यक इत्यर्थः। ननु घट ज्ञानेन घटो पादानकारकज्ञा
नतास्वव्यातिरिक्तपदार्थो जन्यत इत्यवश्यमुपेयमन्यथा किं विज्ञानं किं विद्विषयकमिति नियमानुपपत्तेः· तथा विष
तिरिक्तपदार्थांगीकारे तु न तदनुपपत्तिः यत्र यज्ज्ञानबलात्तदनुपपत्तिः तज्ज्ञानस्य सर्वो विषयो नान्य इत्यपगमात तथा च
निरुक्त्वा गृहीतग्राहित्वस्य प्रमालक्षणे बाधकाभावः· [illegible] द्रिकाव्यापि द्वितीयादिज्ञानानां पूर्व [illegible] ज्ञानोत्पत्त्यादि ५६

दिनातेजःसामान्याभावात्मकांधकारादिप्रत्ययोदयेन व्यभिचारान्नैवमितिवाच्यम। अभावत्वप्रकारकलौकिक
प्रत्यक्षत्वावच्छिन्नंप्रतिप्रतियोगिज्ञानस्य हेतुत्वकल्पनेनानुपपत्त्यभावात· तथाचाभावोननिर्विकल्पकविषय
ःपूर्वप्रतियोगिभासकसामग्र्या आवश्यकत्वेन सर्वत्राभावप्रत्यक्षे प्रतियोगिनःप्रकारविधयाभानसंभवात प्रत्य
क्षविषयस्यनिर्विकल्पकवेद्यत्वेनियमेमानाभावात· प्रतियोगिज्ञानहेतुत्वंनिर्युक्तिकमेवा नचैवंसतिनेतिप्रतियो
ग्यमिश्रिताभावःप्रत्यक्षापत्तिःइष्टापत्तिरुक्तसप्तमभावोनिरूप्यइतिसिद्धांतान्न संभवतीतिवाच्यम। प्रतियोग्यमिश्रि
ताभावप्रत्यक्षस्याप्रसिद्ध्या आपत्तेरसंभवात। नचप्रतियोगिज्ञानशून्यकालेइंद्रियसंबंधविशेषणतारूपप्रत्यासत्ति
बलात अभावप्रत्यक्षत्वावच्छिन्ने आपादनीयेफलतस्तथापत्तिःसंभवतीतिवाच्यम। इंद्रियसंबंधविशेषणतायाःप्रति
योगिमिश्रिताभावप्रत्यक्षंप्रत्येवहेतुतायाःकल्पनेनतथापादनासंभवात। नचेंद्रियसंबंधविशेषणतायाःकार्य
तावच्छेदककोटौप्रतियोगिविषयतानिवेशप्रतियोगिभेदेनपुरुषभेदेनतत्कारणतानंत्यकल्पनेगौरवात तदपेक्ष

अभावबुद्धिंप्रति प्रतियोगिज्ञानस्य स्वतंत्रहेतुताकल्पनमेवोचितमिति वाच्यम्। यतः अतः अभावबुद्धिं प्रति प्रतियोगि
ज्ञानस्य हेतुत्वकल्पनेपि इंद्रियसंबंधविशेषणतायाः कार्यतावच्छेदके कौ प्रतियोगिविषयतानिवेशनमावश्य
कम्। अन्यथापदज्ञानकाले इंद्रियसंबंधविशेषणताबलात् घटाभावप्रत्यक्षापत्तेर्दुर्वारत्वादिति न तदापत्त्यभावो
पदविशेषणकभ्रमात्मकपगमेबाधकाभावान्नोपदर्शितरीतिः संभवतीति वाच्यम्। सर्वदा तथाविधभ्रमेमानाभा
वेन तयोरेकैकरसंभवदुक्तिकत्वात् न च विषयतासंबंधेन अभावबुद्धिं प्रति स्वप्रकारीभूतधर्मावच्छिन्नप्रतियोगि
ताकत्वसंबंधेन ज्ञानत्वेन प्रतियोगिज्ञानानामेकैकहेतुत्वं प्रतियोगिविषयतामनिवेश्य कल्प्यते। अतो नानुपप
त्तिरिति वाच्यम्। परामर्शघटकविशेषणकप्रत्यक्षजनकदोष काले तथाविधभ्रमोदयेन तत्र व्यभिचारादुपद ५६
र्शितरीतिरसंभवदुक्तिकत्वात्। एवं च प्रतियोगिमिश्रिताभावप्रत्यक्षं प्रति इंद्रियसंबंधविशेषणताया हेतुताया
आवश्यकत्वं विनापि प्रतियोगिज्ञानहेतुता प्रति प्रतियोगमिश्रिताभावप्रत्यक्षापत्तिवारणसंभवात्। न तत्रत

इति शेषः। न च ज्ञानस्य चक्षुर[illegible]तया ज्ञातो घट इति चाक्षुषे ज्ञानभानासंभवेनान्यथानुपपत्त्या ततो ज्ञातता सिद्धिरि
ति वाच्यम्। ज्ञानस्य चक्षुरयोग्यत्वेऽपि ज्ञानांशे उपनीतभानात्मकतया विषयचाक्षुषसंभवात्। ज्ञानं च ज्ञानस्यातीन्द्रियतया प्रत्य
क्षासंभवेन तन्मूलकानुमानादेरप्यसिद्ध्या उपनायकज्ञानाभावेन तथाविधोपनीतभानमप्यसिद्धमिति वाच्यम्। मन
:संयुक्तसमवायसन्निकर्षघटितसामग्रीबलात् ज्ञानप्रत्यक्षे बाधकाभावेन ज्ञानस्यातीन्द्रियत्वासिद्धेः। न चैवं
सति निर्विकल्पकस्यापि प्रत्यक्षापत्तिरिति वाच्यम्। तद्धर्मावच्छिन्नविशेष्यकत्वप्रकारतानिरूपिततत्प्रकार
कत्वान्निष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन ज्ञानप्रत्यक्षं प्रति तादात्म्येन तद्धर्मावच्छिन्नविशेष्यतानिरूपितत
न्निष्ठप्रकारताशालिज्ञानत्वेन हेतुताकल्पनस्य घटो भूतले चेति समूहालंबनानंतरं घटत्वेन भूतलं जानामीत्य
नुव्यवसायवारणाय आवश्यकतया ज्ञानस्य प्रत्यक्षत्वेऽपि निर्विकल्पकप्रत्यक्षत्ववारणासंभवात्। अत एव निर्विक
प्रत्यक्षापत्तिवारणार्थं विषयतासंबंधेन प्रत्यक्षं प्रति तादात्म्येन निष्प्रकारकज्ञानत्वेन रूपेण निर्विकल्पकत्वेन प्रतिबंध

३ ...न्य पाद्‌का ड न्य त्वेन इ

केवलकल्पने गौरवात्तदपेक्ष्यज्ञानत्वेनैव तत्र प्रतिबंधकत्वं कल्प्यमिति ज्ञानसामान्यमेवातीन्द्रियमिति मतानुया-
यि मतमप्यास्तम् उपदर्शितकार्यकारणभावेनावश्यकल्पनानिर्वाहे तया विषप्रतिबध्यप्रतिबंधकभावस्याकल्पना-
त्। यत्तु घटं जानामीत्यादौ क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वोपपत्त्यर्थं घटादौ ज्ञातताख्यपदार्थमावश्य-
कमिति तन्न। घटमिच्छति घटं करोतीत्यादाविव विषयत्वरूपमात्रकर्मत्वेनैव तत्र निर्वाहे ज्ञाततारूपातिरिक्तपदार्थ-
नावश्यकत्वात् इत्यादिकं बहुतरमन्यत्रानुसंधेयम्। ननु घटज्ञानादीनां पटविषयकज्ञानाद्यपेक्षया भेदसिद्ध्य-
न्यथानुपपत्त्या घटज्ञानादिजन्यज्ञाततांगीकार आवश्यक इत्यत आह। अपि नैव विशेषो हि निराकारतया धिया-
क्रियात्मैव विशेषो हि व्यवहारेषु कर्मणः। अत्र प्रथमार्धे हि शब्दः यत इत्यर्थे द्वितीयार्धे हि शब्दः हेत्वर्थे अयं धी-
त्यत्र तृतीयार्थे भेदं लाक्षणिको विशेषशब्दार्थ इतरभेदानुमापकः तथा च यतो निराकारतया धियां ज्ञानानां नावि-
षयतासंबंधेनैव धियो भिन्ना इतरभेदानुमापकः। अतः कर्मणां घटपटादीनां व्यवहारे विशिष्टबुद्ध्यादिव्यक्तिये वे

५८

घटादिषु रूपकर्मभिन्नएवइतरभेदानुमापकः संपूर्णकारिकार्थः। ननु अत्र तृतीयाया अभेदलाक्षणिकत्वे
सुविभक्तौ न लक्षणेति प्रवादव्याघातः। न च तथाविधप्रवादस्य निर्युक्तिकत्वादश्रद्धेयतेति वाच्यम् आख्यातादितोपि बलवत्त्वे
लौवकर्मत्वबोधोपपत्तौ षष्ठ्यादेर्द्वितीयाद्यर्थकर्मत्वादावनुशासनस्य वैयर्थ्यापत्त्या तथाविधप्रवादस्य सयुक्ति
कत्वादिति चेन्न। यत्र सुविभक्तौ न लक्षणेति प्रवादस्य एकसुविभक्तेर्व्यत्ययानुशासनातिरिक्तापरसुविभक्त्यर्थ
लक्षणाभावार्थकत्वात् अतएव व्यत्ययानुशासनस्यापि सार्थकता व्यत्ययानुशासनं विना तथाविधप्रवादव्याघा
तापत्त्या लक्षणया एकविभक्तेरपरविभक्त्यर्थबोधकत्वासंभवात्। न च तत्रापरविभक्त्यर्थनिवेशे गौरवमिति वाच्यम्
तथासति धान्येन धनवानित्यादौ तृतीयाया अभेदलाक्षणिकत्वस्य धूमादिहेतुत्वव्यवच्छेदकव्याप्यज्ञानज्ञाप्यत्वेनालौकिकत्व
स्य चानुपपत्तेरिति। ननु उपदर्शितयुक्त्या ईश्वरज्ञानस्य प्रमात्वेपि ईश्वरे प्रमातृत्वप्रामाण्ये अनुपपन्ने ईश्वरस्य प्रमां
प्रतिसमवायिकारणत्वाभावेन प्रमासमवायिकारणत्वरूपप्रमातृत्वलक्षणस्य तत्राभावात् तथा चेश्वरे प्रमातृत्वोक्तिः

ऽकारणत्वेन चा।

कु का टी

नमः मंत्रायुर्वेदवच्च तत्प्रामाण्यमाप्तप्रामाण्यादिति न्यायसूत्रे ईश्वरे प्रामाण्यात् कीर्तनं चासंगतं स्यादित्यतः पूर्वोक्तं प्रमा
लक्षणमनूद्य ईश्वरे प्रमातृत्व प्रामाण्ये उपपादयति। मितिः सम्यक् परिच्छित्तिस्तद्वत्ता च प्रमातृता। तदयोगव्यवच्छेदः प्रा
माण्यं गौतममते सम्यक्परिच्छित्तिर्यथार्थज्ञानं तद्वत्त्वाय यथार्थज्ञानरूपप्रमावत्ता तथा च प्रमासमवायिकारणत्वं न प्रमातृ
५१ त्वलक्षणम्। अपि तु प्रमावत्त्वं तच्च ईश्वरे व्याहृतमेवेति न तत्र प्रमातृत्वोत्कीर्तनमसंगतमिति भावः। ईश्वरे प्रमाणत्वमु
पपादयन् प्रमाणत्वमुपपादयति। तदयोगव्यवच्छेद इत्यादि प्रमाया अयोगव्यवच्छेदोपि प्रमाणत्वं गौतममते इत्यर्थः। तथा च
प्रमायाः अयोगव्यवच्छेदः प्रामाण्यमित्यभिप्रायेण पूर्वोपदर्शितन्यायसूत्रे गौतमेन ईश्वरे प्रमाणत्वमुत्कीर्तनमिति। राम
नानुपपत्तिरिति भावः। न चैवं सति प्रमाणस्य पंचविधतया चातुर्विध्येत तद्विभागानुपपत्तिरिति वाच्यम् प्रमाकरण
त्मकप्रमाणस्यैव चातुर्विध्येन विभक्ततया विभागव्याघाताभावादिति स्तवकार्थसंग्रहश्लोकमाह सा साक्षात्कारिणि नि
त्ययोगिनि परद्वारानपेक्षास्थितौ भूतार्थानुभवे निविष्टनिखिलप्रस्तावि वस्तुक्रमः लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्र ५९

च्छं शंकात्तु षशंकोन्मेव कलंकिभिः किमपरैस्तन्मे प्रमाणं शिवः तत्प्रमाणं तस्मात्प्रमाणमेव शंकोन्मेषकलंकिभिः अप्र
माएव शंकासंबंधरूपकलंकयुक्तैरपरैर्बोधैः किं कर्यं तदपलपनीयमिति संपूर्णश्लोकार्थः॥ समाप्तश्चतुर्थस्तवकः
॥ एतावता ग्रंथेनाशरीरिनित्यसर्वविषयकप्रमाश्रयत्वात्मकेश्वरसिद्धौ बाधकं निराकृत्य इदानीं तन्साधकप्रमाण
मा ह॰ कार्य्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः वाक्यात् संख्याविशेषाच्च साध्यो विश्वविद् व्ययः॥ अत्र च कार्य्यत्वा
दौ भावप्रधाननिर्देशः प्राचीनमततादात्म्यसंबंधस्य व्याप्यतानवच्छेदकत्वेन यथाश्रुते अनुपपत्तेः पंचम्यर्थ
स्तु प्रयोज्यत्वम अन्वयश्चास्य साध्यपदार्थानुमितिविषयैकदेशानुमितौ तथा चा[illegible]योजनत्व धृ[illegible]त्वादिप
दत्व श्रुतित्व वाक्यत्व संख्याविशेषत्वात्मक बहुविधहेतुप्रयोज्यानुमितिविषयो विशेषविषयक नित्यज्ञानाश्र
य नित्यात्मक ईश्वर इति संपूर्णकारिकार्थः। अत्र आयोजनपदार्थः कर्म्म धृ[illegible]त्वादीत्यत्रादिपदार्थो विनाशि
त्वं पदपदार्थो व्यवहारः प्रत्ययपदार्थः अयं भावः। क्षित्यादिकं सकर्तृकं कार्य्यत्वात् घटवत् संसर्गाद्यकाले नंद्याए

कारंभकपरमाणुसंयोगाजनकं कर्म्म प्रयत्नवज्जन्यं कर्म्मत्वात अस्मदादिशरीरक्रियावत। ब्रह्मांडादिधृ
तिः प्रयत्नवत्याधृतित्वात वियति विहंगमधृतिवत ब्रह्मांडादिनाशः प्रयत्नवज्जन्यनाशत्वात पाट्यमानपटनाशवतस
गोद्यकालीनघटपटानयनादिव्यवहारः प्रयत्नवज्जन्यव्यवहारत्वात। इदानींतनघटपटानयनादिव्यवहारवत। वेदज
न्यप्रमा गुणजन्या प्रमात्वात प्रत्यक्षप्रमावत। वेदः पौरुषेयो वेदत्वात यन्नैवं तन्नैवं यथा गगनादि वेदः पौरुषेयो वा
क्यत्वात। भावतत्सर्गाद्यकालीनद्व्यणुकपरिमाणजनकद्वित्वसंख्या अपेक्षाबुद्धिजन्या द्वित्वात्त अस्मदा[illegible]घटे द्वाबु
द्धिजन्यद्वित्ववत्। इत्याद्यनुमानैरीश्वरसिद्धिः। अत्र सकर्तृकत्वसाध्यकानुमाने सकर्तृकत्वं स्वोपादानगोचरज्ञानवि
शिष्टकृतिमज्जन्यत्वं बोध्यम्। स्वपदार्थः पक्षीभूतक्षित्यादिः। उपादान[illegible] पदार्थश्च समवायिकारणम्। नचैवं सति अदृष्टद्वा
रा अस्मदादि[illegible]मादायार्थान्तरमिति वाच्यम्। अदृष्टद्वारकत्वोपादानगोचरज्ञानादि[illegible]मज्जन्यत्वस्य साध्य[illegible]त्वात्। एवमग्रिमानु
मानत्रयेपि बोध्यम्। धृतिपक्षकानुमाने धृतित्वं पतनानुत्पादप्रयोजकसंयोगत्वं बोध्यम्। न तु पतनप्रतिबंधकसंयोगत्वं.
जनकत्व १ — २ अदृष्टद्वारकं त्व

ब्रह्मांडस्यपतनाप्रसिद्धातदनन्वयापत्तेः मन्मतेतुपतनानुत्पादएव तत्स्यान्नये।
नानुपपत्तिः। गुणत्वसाध्यकानुमाने च गुणत्वं धर्माद्यतिरिक्तधर्मावच्छिन्नकार्य्यतानिरूपितकारणताश्रयत्वं बोध्यम् एवं स
तिकधर्माश्रयानुमानादीश्वरसिद्धिरितिचेत् तत्तदेवादृष्टपदार्थेतानुमानात्पक्षधर्मताबलेन वक्तव्य पार्थवाक्यापे
क्षोनजन्यत्वसिद्धौ साध्यतावच्छेदकघटकत्वेन ईश्वरसिद्धेरप्रत्यूहत्वात् सजातीयोच्चारणानपेक्षोच्चरितस्यैव प्रकृते
वेदेपदार्थत्वेनाध्यापकरूपवक्तारमादायसिद्धसाधनाभावादिति पौरुषेयत्वसाध्यकानुमानेऽपि पौरुषेयत्वं स
जातीयोच्चारणानपेक्षोच्चरितत्वमानत्वं चोच्चारणजन्यत्वमन्त्राध्यापकोच्चारणजन्यत्वमादायसिद्धसाधनप्रसंगात्स
ज्ञातीयोच्चा [redacted] नपेक्षोच्चरितत्वमपि स्वसमानानुपूर्वीकवाक्
च्चारणानपेक्षोच्चारणजन्यत्वमावाकेच्चारणतुवाक्यानुकूलकंमतान्वाद्यभिप्रायात्तः तथाविधकेति वैदिकानवेश्वरानु
मानात्तत्त्वावि वोच्चारणसिद्धावपि न ईश्वरसिद्धिरिति वाच्यमातादृशोच्चारणसिद्ध्युत्तरं तादृशोच्चारणज्ञानादिमत्
प्रयोज्यमुच्चारणत्वात्तादिदानीतनोच्चारण [illegible] ईश्वरसिद्धिसंभवेन तादृशानुमानस्य तत्त्वयोऽकाव

व२

कु. का. ७२.

नऽनुपपत्त्यभावात्। ऽपेक्षाबुद्धिजन्यत्वसाध्यकानुमानेऽपेक्षाबुद्धित्वमेकत्वद्वयविशेषकज्ञानत्वमानव.
ईदृशानुमानात्तथाविधज्ञानसिद्धावपि न ईश्वरसिद्धिरिति वाच्यम्। तादृशानुमानात्तथाविधज्ञानसिद्धौ तस्य
तथाविधज्ञाने किंचिदात्मसमवेतज्ञानत्वादस्मदादिज्ञानेवदित्यनुमानादीश्वरसिद्धौ तदनुमानस्य तत्प्रयोजकत्वे
नानुपपत्त्यभावात्। न चैवं सत्यपि सर्वविषयकज्ञानादिमत्त्वेन न ईश्वरसिद्धिरिति वाच्यम्। उपदर्शितानुमानादीश्व
रसिद्धौ तज्जन्यत्वेन वेदस्य प्रामाण्यसिद्धेः यः सर्वज्ञः सर्ववित्यादिवेदादेव सर्वविषयकज्ञानवत्त्वेन तत्सिद्धेरित्यधिकमस्म
त्कृते ईश्वरवादेऽनुसंधेयम्। ननु क्षित्यादिकं सकर्तृकं कार्यत्वादित्याद्यनुमानात् कथमशरीरिकर्तृजन्यत्वसि
द्धिः ईश्वरे शरीराभावेन कर्तृत्वाभावसिद्ध्या कर्तृत्वरूपविशेषणबाधात्मकविशिष्टबाधस्य तत्प्रतिबंधकस्यात्। एवं
साध्यतावच्छेदककोटिप्रविष्टैकविशेषणेऽपरविशेषणविरोधज्ञानस्यापि अनुमितिप्रतिबंधकतया कर्तृत्वेऽ
शरीरित्वविरोधज्ञानस्यापि तथाविधानुमितिप्रतिबंधकस्य संभवात्। एवं क्षित्यादिकमकर्तृकं शरीराजन्यत्वादित्यादि

६१

तथाविधानुमितिप्रतिबंधकस्य सत्प्रतिपक्षस्य संभवात् । एवं प्रतिकूलतर्कसत्त्वात् विपक्षबाधकतर्काभावाच्च कार्यत्वे
तत्राह । न बाधोऽस्योपजीव्यत्वात् प्रतिबंधो न दुर्बलैः । सिद्ध्यसिद्ध्योर्विरोधो न नासिद्धिरनिबंधना । न बाधः । उपदर्शितानुमितिप्र
तिबंधकविशेषणबाधात्मकविशिष्टबाधो न संभवति । अस्य कार्यत्वादिहेतुकेश्वरसिद्ध्यनुमानस्योपजीव्यत्वात् । आ
भावबुद्धौ अधिकरणज्ञानस्य हेतुतया आधिकरणज्ञानसंपत्त्यर्थं तत्रादौ एव अपेक्षणीयत्वात् । तथा चाधिकरण
ज्ञानाभावेन । तथाविधानुमानात्पूर्वं तादृशबाधबुद्धेरसंभवेनानुपपत्त्यभाव इति भावः । उपदर्शितबाधरूपदोषं निरा
...प्रकृतहेतोः सत्प्रतिपक्षतां निराकरोति प्रतिबंध इत्यादि दुर्बलैः । शरीरांशवैयर्थ्येन व्याप्यत्वासिद्ध्या शरीराज
न्यत्वादिरूपदुर्बलहेतुभिः प्रतिबंधो न प्रकृतहेतोः सत्प्रतिपक्षतापि नेत्यर्थः । सत्प्रतिपक्षरूपदोषमुद्धृत्य प्रकृतानुमि
तिप्रतिबंधकीभूत अशरीरित्वकर्तृत्वयोर्विरोधज्ञानासंभवं व्यक्तं प्रतिपादयति सिद्ध्यसिद्ध्योरित्यादि ईश्वरज्ञानाज्ञानेन अशरी
रित्वकर्तृत्वयोर्विरोधज्ञानमपि न संभवतीत्यर्थः । संभवितत्प्रसिद्धौ तद्धर्मिकरणवृत्तित्वरूपविरोधघटकाधिकरण...
...यं भावः । उपदर्शितानुमानेन अशरीरित्वकर्तृत्वासक्रीतमतभाव्य अशरीरित्वकर्तृत्वयोः सामानाधिकरण्यज्ञाना

कु·का· ६२·

सिद्धासुतरां तथेति भावः। अशरीरित्वकर्तृत्वयोर्विरोधज्ञानरूपं प्रकृतानुमितिप्रतिबंधकं निरस्य अनुमानासंभ
वरूपदोषं निरस्यति नासिद्धिरित्यादि अनिबंधनाप्रतिकूलतर्कविपक्षबाधकतर्काभावो भयप्रयुक्ता या सिद्धिः
अनुमानासिद्धिरनुमानासंभव इति यावत् तदभावोस्तीत्यर्थः। प्रकृते प्रतिकूलतर्काभाववत्सत्वात् विपक्षबाधकत
६२ र्कसत्वाच्चेति भावः। ननु कथं तयोः सत्वमित्यत आह तर्काभासतया अन्येषां तर्काशुद्धिरभूषणमा अनुकूलसत्त
र्कोत्र कार्यलोपो विभूषणमा अन्येषामीश्वरो यदि कर्ता स्यात् तर्हि शरीरी स्यादित्याद्याकारकप्रतिकूलतर्काणां त
र्काभासतया ईश्वरासिद्ध्या आश्रयासिद्धिदोषेण संभवितयात् तर्काशुद्धिर्दूषणमा ईश्वरो यदि कर्ता स्यात् तर्हि शरीरी स्या राम
दित्याद्याकारकप्रतिकूलतर्काणां तर्काभासतया ईश्वरासिद्ध्या आश्रयासिद्धिदोषेण संभवितयात् तर्काशुद्धिर्दूषणमा
ईश्वरो यदि कर्ता स्यात्तर्हि शरीरी स्यादित्याद्याकारकप्रतिकूलतर्कं च प्रकृतानुमानव्याप्तिरूपदूषणानसंभवति ६
अनुकूलतर्कस्तु विपक्षबाधकतर्कस्तु कार्यलोपः कार्यलोपापादकः। इत्यादिकं यद्यकर्तृकं स्यात्तर्हि कार्यं न स्यादि

६२

त्याघाकारकः कार्यान्योन्याभावापादक इति यावत् तद्विभूषणम्। प्रकृतानुमानानुग्राहकः इति संदर्भकारिकार्थः। क्षित्या
दिपक्षकसकर्तृकत्वसाध्यकानुमाने अनुकूलतर्कं प्रदर्शयन् सर्गाद्यकालीनपरमाणुकर्मपक्षकप्रयत्नवज्जन्यत्व
साध्यकानुमाने तं प्रदर्शयति। स्वातंत्र्ये जडताहानिर्नादृष्टघातकं हेत्वभावे फलाभावात्। विशेषवाना स्वातंत्र्ये सर्गाद्य
कालीनपरमाणुकर्मणि कर्तृरूपे चेतननैरपेक्ष्ये न परमाणोर्जनकत्वे जडताहानिः परमाणोश्चैतन्यहानिः स्यात्। का
र्यस्य चेतनजन्यत्वनियमेन परमाणावेव तथा चैतन्याभ्युपगमादिति भावः। ननु अचेतनेनादृष्टसहकारेणैव फल
मुत्पाद्यते न तु चेतनसहकारेणेति तथाविधनियमोऽसिद्ध इत्यत आह नादृष्टमित्यादि। अदृष्टं न दृष्टघातकं न हेतुनिष्का
रणताविघातकं न कर्तृरूपचेतनं विना फलोत्पादकमिति यावत्। अत्र हेतुमाह हेत्वभावे फलाभावादिति। क्रियामात्रे
तिकर्तृलिङ्गेन हेतुतया कर्त्तारं विना परमाणौ तथाविधक्रियाकार्यानुत्पत्तिप्रसंगादित्यर्थः। ननु क्रियामात्रे प्रति ह
तित्वेन हेतुतानेऽपि तु चेष्टां प्रति भोक्तृप्रयत्नस्तथेति नोक्तानुपपत्तिरित्यत आह विशेषस्येत्यादि विशेषस्ते

न्का॰टी॰

वैधात्तत्र कार्य्यविशेषस्तु विशेषवान मो... प्रयत्नरूपकारणविशे... जन्य इत्यर्थः तथा च विशेषकार्य्य
कारणभावस्य सामान्यकार्य्यकारणभावाविघटकत्वे तादृशविशेषकार्य्यकारणभावेपि तथाविधसामान्यकार्य्यकार
णभावस्यावश्यकः॰ यद्विशेषयोः कार्य्यकारणभावो बाधकं विना तत्सामान्ययोरिति नियमात॰ अन्यथा बीजवि
६३ शेषस्य ... विशेषं प्रतिहेतुत्वे बीजत्वेनांकुरत्वेन कार्य्यकारणभावोपि न स्यादिभावः। ननु तथापि घटत्वादेः प्रय
त्नवद्व्याप्यत्वे मानाभावात कथं घटत्यादिपक्षक प्रयत्नवज्जन्यत्वसाध्यक घटतित्वादिहेतुकानुमानादीश्वरसिद्धि
रित्यत आह॰ कार्य्यत्वान्निरुपाधित्वमेवं घटतिविनाशयोर्विच्छेदेन पदस्यापि प्रत्ययादेश्च पूर्ववत एवं यथा ... यादेः राम
[illegible] न कृतिजन्यत्वात॰ सकर्तृकत्वसाध्यक कार्य्यत्वहेतुकानुमाने हेतोः साध्यव्याप्यत्वं तथा घटतिविनाश
योर्ध्वंसोऽघटतितद्विनाशयोः कार्य्यत्वेन कृतिकार्य्यत्वात निरुपाधित्वं घटतित्वादिहेतुक प्रयत्नवज्जन्यत्वसाध्यक
६२ नुमानेपि हेतोः सा... व्याप्यत्वमिति कारिकापूर्वार्द्धार्थः घटतित्वविनाशत्वे साध्ये व्याप्यत्वमुपपद्य व्यवहारं वद ६३

मात्वे साध्ये व्याप्यत्वमुपपादयति। विच्छेदेनेति विशेषणात्तृतीया पदस्येत्यत्र पदशब्दो व्यवहारार्थकः प्रत्ययशब्दः प्र
मार्थकः तथा च कार्यत्वान्निरुपाधित्वमिति तस्यानुषंगेन प्रत्ययवत यतोऽजन्यकृतिमत्प्रयोज्यकवृद्धविच्छेदवि
शिष्टव्यवहारस्य तथाविधविच्छेदविशिष्टायाः प्रमाया अपि पूर्ववत्तवुद्धांउद्दति तद्विनाशवत्कार्यत्वान्नि
पाधित्वं व्यवहारत्वहेतुकानुमाने प्रमात्वहेतुकानुमाने च हेतोः साध्यव्याप्यत्वमिति कारिकाद्वितीयार्थः अत्र
प्रत्ययप्रयोजकवृद्धविच्छेदविशेषणोत्कीर्तनात् सर्गाद्यकालीनव्यवहारपक्षकानुमानेन सर्गाद्यकालीन
व्यवहारे कृतिमज्जन्यत्वसिद्धौ अजन्यकृतिमत्प्रयोजकजन्यत्वबाधेनेतरबाधबलात् नित्यकृतिमज्जन्यत्वसिद्धौ
ईश्वरसिद्धिरिति सूचितम्। कार्यायोजनेत्यादिकं प्रकारांतरेण व्याख्यातुमाह। उद्देशएव तात्पर्यं [illegible] वेष्वपु
शसतीश्वरादिपदं सार्थं लोकवृत्तानुसारतः। उद्देशएव तात्पर्यमिच्छैव सकलवेदार्थबोधतात्पर्यं तया च
कार्यत्वस्य सकलवेदार्थबोधतात्पर्यवत्त्वीकात्तन्नाहृत्पाणिकतया सकलवेदार्थबोधतात्पर्यमात्मसमवेताम्

कार्य[illegible]दार्थमाहुः २

कात्वादित्याकारके नानुमानेनेतरबाधबलादीश्वरात्मसिद्धिरिति भावः। आयोजनपदार्थमाह॰ व्याख्येत्यादिवि
श्वदृशः सर्वज्ञस्य ईश्वरस्य वेदव्याख्या सती विद्यमानेत्यर्थः। अत्र तथाविधव्याख्यायाम। अत्र वि[illegible]त्वक
९ य[illegible]त्वव्यस्यमानानुमाने प्रत्ताप्तसिद्धिः परिहृता। तथा चायोजनपदस्य तथाविधव्याख्याचरित्रिव्या[illegible]क
या सकलवेदार्थव्याख्याकेति मङ्ज्ञत्याव्याख्यात्वादित्याकारकेनानुमानेनापि ईश्वरसिद्धिरिति तादृ[illegible]ग्रंथ
र्थः धृतिरित्यादिशब्दस्य सकलवेदधारणाद्यर्थकतया सकलवेदधारणादिकं प्रयत्नवज्जन्यं धारणात्वादित्य राम
नुमानेनापि ईश्वरसिद्धिरिति धृत्यादेरित्याद्यर्थ इत्यपि ध्येयम्। पदादित्यादेरर्थमाह॰ ईश्वरादिपदं [illegible]मिति
ईश्वरादिपदं किंचिदर्थशक्तमित्यर्थः। अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते एतद्वाक्यघटकीभूतस्वतंत्रोच्चारयि
तृशक्ताः हृपदमादिपदार्थ इति भावः। तथा च पदादित्यस्य ईश्वरादिपदवृत्ति किंचिदर्थशक्तत्वादि[illegible]र्थकतया ई
६४ श्वरादेरहमादिपदं शक्त्या किंचिदर्थबोधकं किंचिदर्थशक्तपदत्वादित्यनुमानादपीश्वरसिद्धिरिति पदादित्यादेर ६४

य इति भावः ननु ईश्वरपदपक्षकोपदर्शितानुमानात् पक्षधर्मताबलादीश्वरसिद्धिः संभवति सर्वज्ञता तृप्ति
रनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिरनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्येति वाक्यशेषात्
सर्वज्ञत्वादि षड्धर्मविशिष्टेश्वर एवेश्वरपदार्थतानिश्चयात् अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते [illegible] वाक्यघ
टकाहंपदादिपक्षकोपदर्शितानुमानान्न कथमीश्वरसिद्धिः एतद्वाक्यघटकीभूताहंपदस्य स्वतंत्रोच्चारयितृत्व
वक्तृत्वे मानाभावादित्यत आह लोके त्यादि लौकिकाहंशब्दस्य स्वतंत्रोच्चारयितृरूपार्थवाचकत्वकल्पनादित्यर्थः
तथा च य एव लौकिकाः शब्दास्त एव वैदिकवाक्यघटका इति नियमात् लौकिकवाक्यघटकाहंपद [illegible] वैदिकवा
क्यघटकतया वैदिकवाक्यघटकीभूताहंपदस्यापि स्वतंत्रोच्चारयितृबोधकत्वेनानुपपत्त्या [illegible] प्रत्य
यत इत्यस्य [illegible] यावद्वैदिकविधिप्रतिपाद्येच्छा नृति इच्छात्वार्थकतया यावद्वैदिकविधि प्रति [illegible] समवेता
इच्छात्वादित्यनुमानादपीश्वरसिद्धिरिति भावः [illegible] त्यादेरुपप [illegible] कार्यां विधिपदार्थतामाह प्रवृत्तिः कृति

का० ४ ।

रेवानं स्याचेष्ठातोऽयताम्र सातज्ञानविषयस्तस्य विधिस्तत्साधकोऽपवाऽत्र पुरुषे विधिरित्य[illegible] सानीत याप्र
वृत्तिः साकृति स्वरूपेव साध्ये कृतिरिक्तातः चिकीर्षातः साचिकीर्षा यतः यस्माज्ज्ञायते तज्ज्ञानं तत्तु [illegible] साध्य
त्वेप्रकारके इष्टसाधनताज्ञानं तस्य तज्ज्ञानस्य विषय इष्टसाधनत्वं कृतिसाध्यत्वं च विधिर्विध्यर्थः [illegible] नैवप्रा
65 चीनमतमुक्त्वा स्वमतमाह तज्ज्ञापकोऽपस्यापि वेति । अथवा तस्यावश्यकं यागादिकेमिष्टसाधनत्वादुमा
न वेत्य मीमांसाभिप्रायविषयत्वादित्यनुमानेन इष्टसाधनत्वादिज्ञापकमामाभिप्रायस्वरूपं म[illegible] नैकृ राम
ति [illegible] बंदनिष्टाननुबंधी कार्यपर्यवसायिकमेव विध्यर्थ इत्यर्थः । तथा चेच्छाया विध्यर्थत्वात प्रत्ययत इत्य
स्याविधित्वय प्रतिपाद्येच्छावक्त्रीच्छात्वादित्यर्थकतया प्रत्ययतः साध्ये विभु विद्वाय इत्यस्य विधिप्रतिपाद्येच्छा
श्री [illegible] मवेतादृच्छात्वादित्याकारकादवच्छिदिकावच्छेदेनात्म साध्यकानुमानादीश्वर साध्य इत्यर्थे नानुपपन्न
६५ इति भावः ।। निरुक्ताभिप्राय एव विध्यर्थः । अत्राप्तोक्तीतेनं तु वक्तृगतिमनुरुध्य न तु श[illegible]नाव च्छेदककोटा ६५

वर्पितान्निवेश इति स्वमतमुपपादयितुं मतान्तरं दूषयति· इष्टहानेरनिष्टाद्वेरप्रवृत्तेर्विरोधतः· अन्यत्वा
त प्रत्ययस्त्यागात् कर्तृधर्मेण न शंकरात् कर्तृधर्मः यागादिकर्तृधर्मः यागादिकर्तृधर्मः स्पंदः इच्छावान्
विषयत्व इति शेषः। अत्र स्पंदस्य विषयत्वाभावे हेतुमाह· इष्टहानेरित्यादि। स्पंदज्ञानकाले इष्ट[illegible]साधना
नैपुण्यात् अनिष्टसाधनताज्ञानसंभवाच्च प्रवृत्त्यनुत्पत्तेरित्यर्थः। तथा च प्रवृत्तिप्रयोजकज्ञान[illegible]
वविषयत्वनियमेन स्पंदे तथात्वान्नविषयत्वमिति भावः। यागादिकर्तृधर्मोपायेच्छाविषयत्वे [illegible]मा
रू विरोध तदिति। अन्योन्याश्रयेन कर्तृधर्मोपायेच्छाज्ञानस्य तथाविधोपायेच्छां प्रति हेतुत्वात् सं[illegible]य
र्थः· तथा चोपायेच्छाजनकज्ञानविषयस्यैव विषयत्वनियमेन अन्योन्याश्रयेण कर्तृधर्मो[illegible]याः
तद्भावान्न विषयत्वमिति भावः। ननूपायेच्छां विनापि विधित एवोपा[illegible]ज्ञानसंभवा[illegible]श्रय
इति न कर्तृधर्मोपायेच्छाया विषयत्वमनुपपन्न[illegible]तिउपायेच्छां विना सा ज्ञात्परंपरया

कु॰का॰टी॰

वैतत्प्रयोज्यस्योपायेच्छाज्ञानस्य विच्छित्तोप्यसंभवादित्यर्थः। तथा चोपायेच्छाज्ञाने साक्षात्परंपरया वाउपायेच्छो
पयोगित्वावश्यकतया उपायेच्छाया विषयत्वे उपदर्शितान्योन्याश्रयो दुर्वार इति भावः। ननु विधिनैवक्षयमनु
पायेच्छा उत्पाद्यते तदुपायेच्छाज्ञानं तदुपायेच्छांतरमित्यभ्युपगमात् उपायेच्छाया विषयत्वेन दोष इत्यत आह प्र
त्ययत्यागादिति विधितइच्छेत्यादौ गीकारे प्रत्ययस्य ज्ञानस्य त्यागात् इच्छाहेतुत्वत्यागप्रसंगादित्यर्थः। ज्ञानं वि
66 नापि विच्छित्तेः इच्छेत्यस्या व्यभिचारेण ज्ञाने इच्छाहेतुत्वासंभवादिति भावः। न चैवं सत्यपि विधिज्ञानस्यप्र[illegible] राम
त्पादकत्वे बाधकाभावात् तथैव वक्तव्यमिति वाच्यम् तथाविधान्वयव्यतिरेकानुविधानाभावेन तद्रूपासंभ
वादिति। ननु एवं सति फलज्ञानाधीन फलेच्छैव विध्यर्थोस्त्वित्यत आह संकरादिति प्रवृत्तिजनकज्ञानस्य इष्ट
साधनताज्ञानसहचरितत्वनियमादित्यर्थः। अयं भावः अनिष्टसाधनताज्ञानकालेप्रत्ययभावेन प्रवृत्तिं प्र
६६ तीष्टसाधनताज्ञानस्य हेतुत्वमवश्यं वाच्यम् तत्र प्रकारांतरेणासंभवतीति इष्टसाधनत्वे विध्यर्थता आवश्य ६६

की तथा चावश्यकत्वात्तदेव विध्यर्थोऽस्तु किं फले च्छायास्तदर्थत्वांगीकारेणेति भावः। कर्तृत्वं धर्मीयत्नस्यावि
ध्यर्थत्वेऽनुपदर्शितदोषमस्त्वेव पिपठतीत्यादौ प्रवृत्त्यापत्तिरूपदोषांतरं तादृशमाख्यातेऽसामान्यस्य यत्नवाचक
त्वं व्यवस्थापयति। कृताकृतविभागेन कर्तृरूपव्यवस्थायायत्र एव कृतिः पूर्वापरस्मिन सैव भवान कृता
कृतेति विभागेन व्यापारजन्यत्वप्रतिसंधानाविशेषेपि यत्नजन्यत्वप्रतिसंधानाप्रतिसंधानाभ्यां घटः कृत
श्चांकुरो न कृत इति व्यवहारेण कर्तृरूपव्यवस्थया कर्तृकर्तृव्यवस्थया घटस्य कर्तृकुलालः चैत्रादिकं तु
न तत्कर्तृ इति व्यवहारेण चेति यावत्। यत्न एव कृतिः यत्न एव कृ[illegible]र्थः कृतिरेव भावनामाख्या[illegible]र्थ इत्यर्थः
पूर्वापरीभूतकृतिकल्पनस्याख्यातव्यापत्वमिति भावः। अत्र पूर्वापरीभूतत्वोक्तौ तेनोभा[illegible]त्यादि कर्मा
दाय पवत्यपि अपाक्षीदित्यादि प्रतियोगिनि वा ननु यत्नस्य कृञर्थत्वेपि आख्याता[illegible] प्रमाणमाव
:त यासत्त्व गच्छतीत्यादौ वै[illegible]यत्न[illegible]रित्यत आह भावनेव हि यत्नो

सर्वमाख्यातस्य गोचरः तथा विवरणग्रन्थो व्याहतः पञ्चुपपत्तिस्तः। यत्नात्मा भावनैव सर्वाख्यातवाच्या यतस्तथा
त्वैव यत्नात्मक भावनैवेति यावत्। विवरणग्रन्थो व्याख्यातः पठति पाकं करोतीति यत्नार्थे करोतिनाख्यात
र्थे विवरणनिर्वाहादिति कारिकार्थः तीय... णांतार्थः तथा च तथा विवरण विवरणान्यथानुपपत्त्या आख्या
तस्य यत्ने शक्ति वाचकत्वमावश्यकमास्थेये तनेरथोऽगच्छतीत्यादौ चानुकूलव्यापारादौ न हानि वाच्या नानु
पपत्तिरिति भावः। ननु चेतनेतनेभ्यस्य शब्दार्थतया चेतनः पाकयत्नवान् पाकानुकूलव्यापारवत्त्वादित्यनुमा
नत्वेऽन्यथैव यथाख्यातवाच्यत्वमत आह आक्षेपेत्यादि पाकानुकूलव्यापारवत्त्वस्य काष्ठादिसाधारणत्वेन व्य
भिचारितयाऽनुपदर्शितानुमानासंभवादित्यर्थः। तथा च हेतो व्यभिचारितया उपदर्शितानुमानासंभवेन यत्नस्य
न्यवाच्यत्वमिति आख्यातस्य तद्वाचकत्वेन बाधकाभाव इति भावः। ननु विवरणग्रन्थे आख्यातस्य यत्ने शक्ति
रुच्यते तदा तत एव कर्तर्यपि शक्तिः कल्प्यतां पचतीत्यत्रैव ... यत्नवानित्यनेककर्तुरपि विवरणा

राम

६०

त्यत आह॰ आक्षेपलभ्ये संख्येये नाभिधानस्य कल्पना॰ संख्येयमात्रलाभेपि सांकाङ्क्षेण व्यवस्थितिः आक्षेपल
भ्ये कर्त्तुराख्यातार्थसंख्याविशेष्यतया आख्यातार्थसंख्या किंचिदितिता॰ अत्र प्रतियोगित्वादित्यनुमानात्तल्लुप्यवि
त्तिवैधत्तया बाधिते कल्पनादाख्यातपदनिरूपितशक्तेः कल्पना अनन्यलभ्यस्य शब्दार्थत्व नियमादिति भावः॥ न
नु संख्यान्वयित्वेनोपदर्शितरीत्या कर्त्तुर्लाभेपि चैत्रत्वादिना विशेषधर्मेण कथं तल्लाभ इत्यत आह॰ संख्येयमा
त्रेत्यादि संख्येयमात्रलाभेपि संख्यात्वमात्रेण कर्त्तुर्लाभेपि साकांक्षेण आख्यातपदसमभिव्याहृत चैत्रादिपदेन त
दुपस्थितिचैत्रत्वादिविशेषधर्मपुरस्कारेण कर्त्तुरुपस्थितिः। तथा चाख्यातसामान्यस्य कृत्यनुकूलव्यापारो नार्थ
ः उक्तदूषणगुणग्रामाता अपि तु यत्न एव तज्ज्ञानं चेत्प्रवर्त्तकं तर्हि पचतीत्यादिवाक्यादपि प्रवृत्त्यापत्तेरिति भावः॥ न
नु अस्तु तर्हि कार्य्यमेव विध्यर्थत्ववादिमते कार्य्यपदार्थो यदि स्वर्गस्तदा दूषणमाह॰ प्रतिसर्गः नफलमिति स्व
र्गसाधनत्वज्ञानाभावेपि स्वर्गज्ञानात्प्रवृत्त्यापत्तेः कार्य्यपदार्थो न फलमित्यर्थः। ननु तर्हि अपूर्वं कार्य्यपदार्थोस्ति

का॰ टी॰ र॰

त्यत्राह॰ नापूर्वमिति अपूर्वत्वहानितो नापूर्वं कार्य्यं शब्दार्थ इत्यर्थः। अपूर्वस्य कार्य्यशब्दार्थत्वे प्रकृतेः पूर्वमेव
विध्यर्थः तथा च लिङ्पदनिरूपितशक्तिग्रहकाले स्वपूर्वस्यावश्यं प्रतीत्या शाब्दबोधात् पूर्वमप्रतीतत्वं रूपा
६८ पूर्वत्वस्य तत्र व्याघातप्रसङ्ग इति भावः। ननु कार्य्यसामान्यमेव कार्य्यपदार्थः प्रकृते कार्य्यत्वरूपेण ग्रहादौ लि
ङ्पदनिरूपितशक्तिग्रहात् शाब्दबोधे फलकामनियोज्यान्वययोग्यताबलात् कार्य्यत्वेनापूर्वभानमिति नि
त्यानुपपत्तिरित्यत आह॰ तदभावादित्यादि परमते नित्यनिषेधस्थले फलकामाभावेन॰ प्रदर्शितरीत्या अपूर्व
लाभात् न कार्य्यसामान्यमपि विध्यर्थ इत्यर्थः। ननु तर्हि क्रियैव कार्य्यपदार्थोऽस्त्वित्यत्राह॰ न क्रियाप्रवृत्तितदति राम
इष्टसाधनत्वाद्यज्ञानाभावदशायां केवलयागादिरूपक्रियाज्ञानात् प्रवृत्त्यभावेन क्रियापि न विध्यर्थ इत्यर्थः। ननु तर्हि
प्रवर्त्तनाशब्दवाच्याभिधैव विध्यर्थोऽस्तु तज्ज्ञानमेव प्रवर्त्तकमित्यत्राह॰ असत्त्वादप्रवर्त्तकेष्वनाभिधा
६८ पि गरीयसी बाधकस्य समानत्वात् परिशेषोऽपि दुर्लभः असत्त्वादभिधायां भानाभावात् अप्रवर्त्तकेष्वपि कामिधेति ६८

ज्ञानात् अप्रवृत्तेर्बोधस्य समत्वात् कार्यादाविवात्रापि बाधकसत्त्वात्ऽयतः परिशेषो दुर्लभः ॰ अतो नाभिधापि ग
रीयसी उक्तयुक्त्या स्वाभिधाभिन्नस्य कस्यचिज्ज्ञानस्य प्रवर्त्तकतया तस्यैव विधिशक्यत्वावश्यकत्वेऽपि अभिधा
यां विधिशक्तिकल्पने गौरवमिति रीत्या गौरवग्रस्ताऽभिधानानुमानात्त्व ॰ मध्यमादौ वियोगतः। [illegible]त्वेति
सामर्थ्यान्निर्विधानुपपत्तितः अत्र क्रियागतेष्टसाधनत्वं न विध्यर्थः इति पूरणीयमात्र हेतुमाह॰ हेतुत्वादि
अग्निकामो दारुणी मथ्नीयादित्यत्र कुत इत्याकांक्षायां यतो दारुमथनमग्निमाधनमित्यत्र रिते दारुमथने
[illegible]त्वेकविध्यर्थकानुमाने इष्टसाधनत्वस्य विध्यर्थे हेतुत्वादित्यर्थः इष्टसाधनत्वस्य विध्यर्थत्वे [illegible]मेदेन
हेतुत्वासंबंधेत्यर्थं न तत्र तथाविधानुमानानुपपत्तिरिति भावः। हेत्वंतरमाह अनुमानाच्चेति भ[illegible]ति [illegible]त्यंतर
तिबुस्तहत्यां यो श्वमेधेन यजते इत्यत्र इष्टसाधनत्वबोधेऽपि विध्यनुमानादित्यर्थः। हेत्वंतरमाह॰ मध्यमा
दौ वियोगत इति मध्यमोत्तमपुरुषस्थले लिंग इष्टसाधनत्वा[illegible]बोधकत्वादित्यर्थः। तज्ज्ञातादेर्विध्यत्वादि

कु.का.टी.र.

भावः। हेत्वंतरमाह॰ अन्यत्र स्मरेम र्थ्यादिति आज्ञा अध्येषणा अनुज्ञा प्रश्न प्रार्थनाशंसा लिंगाभिरुक्ता व
कं तु कल्पनादित्यर्थः। अत्र यो वक्तुरिष्टमननेनुविद्वान् स तत्सरं भाद्रमेति सा आज्ञा। याः श्रोतरि पूज्य सम्माने
व्यंजिका सा अध्येषणा या निवारणी भावव्यंजिका सा अनुज्ञा अभिधानप्रयोजनादिजिज्ञासा प्रश्नः। नानेष्टप्राप्ति
नानुज्ञा शंसनमाशीरिति हेत्वंतरमाह॰ निषेधानुपपत्तित इति नकलंजं भक्षयेदित्यत्रेष्टसाधनत्वानिषेधस्य
बाधितत्वादित्यर्थः। अत्र विध्यर्थस्यैव निषेधो न त्वबोध्य तद् इति भावः। स्वमतमाह॰ विधिर्वक्तुरभिप्रायः प्र
वृत्त्यादौ लिंगादिभिरभिधेयोऽनुमेयान्तु कर्तुरिष्टाभ्युपायता प्रवृत्तिर्द्विविधा स्वेच्छाधीना पराधीना च॰ तत्र स्वे राम
च्छाधीना प्रवृत्तिं प्रति स्वेष्टसाधनताज्ञानं परप्रयोज्य प्रवृत्तिं प्रति परनिष्ठप्रवर्तनाज्ञानं च हेतुत्वेन कल्प्यते अ
निदितो रागेजा ज्ञा दितः पितृशिरच्छेदादौ पुत्रादेः प्रवृत्तिदर्शनात्॰ राजा मां प्रवर्तयते इत्याकारकज्ञानं स्यान्
विधानात प्रवर्तनात्वं चात्र प्रवृत्तिजनकज्ञानप्रतिरिक्तं वेदनाद्देतत्॰ एवं च स्वर्गकामो यजेतेत्यादि विधिप्रयो ६८

ड्य यागादिगोचरप्रवृत्तेरपि विधिरूपपरप्रयोज्यतया विधिनिष्ठप्रवर्त्तनाज्ञानसाध्यत्वमवश्यमंगीकार्यं तत्र तत्
स्यैव कारणत्वेन तच्छून्यत्वात् तत्त्वं विना अभिधायाः शब्दनिष्ठत्वलिंगार्थत्वेन संभवतीति अभिधाया लिंग
निष्ठत्वं लिंगार्थत्वं चावश्यकमा इयमभिधाना शब्दभावनापदवाच्यापि शब्दभावना अर्थभावनामेदेन
भावनाद्वैविध्यात् ननु भावनाया द्वैविध्ये भावनांशत्रयवतीति महत्सिद्धांतविरोधः॰ प्रकृते त्वविधि
त्वस्यैवांशत्रयवत्त्वरूपत्वादिति चेत् सिद्धांतोसि। नहि तत्र त्रैविध्यमेवांशत्रयवत्त्वं येन भावनाया द्वैवि
ध्येऽठस्यानुपपत्तिः स्यात् अपि तु कर्मकरणेति कर्तव्येतेन त्रितयसापेक्षत्वेन तथाविधत्रितयाकांक्षितत्व
तथाविधत्रितयसापेक्षत्वं तथाविधत्रितयाकांक्षोत्थापकत्वमा भावनाज्ञाने किं भाव्यं केन भाव्यं कथं भा
व्यमित्याकांक्षोदयादिति। न च भावनाज्ञानोत्तरं तथाविधाकांक्षा जायत इति। अत्र मानाभाव इति वाच्यं तत्र
तथाविधाकांक्षानंगीकारे लिंगपदज्ञानजन्यार्थभावनाज्ञानांतरं यागादिगोचरार्थभावनाविशेष्यकस्वर्गादि

कु०का टी२

फलकत्वप्रकारकबोधस्यानुभवसिद्धस्यापलापापत्तेः। न चैवं सति फलाकांक्षा स्वीकार्या किं करणाद्याकांक्षये
ति वाच्यम् आकर्म्मीकांक्षायाः करणाकांक्षानियतत्वेन करणाकांक्षाया आवश्यकत्वात्। अत एवेति कर्त्तव्यताकां
क्षाप्यावश्यकी करणाकांक्षायास्तन्नियतत्वात्। अत एव विधिवादे पक्षधरमिश्रा अप्याहुः। अन्यथा स्वर्गा 70
फलं न भावयेत् तत्तस्य एतत्त्रतयाधीनत्वादिति। अत्र स्वर्गादिफलं न भावयेदित्यस्य विधिना स्वर्गादिफलकत्वे
न अर्थभावनां न बोधयेदित्यर्थकरणात् तस्य एतत्त्रतयाधीनत्वादित्यस्य स्वर्गादिफलकत्वस्य तथा विधाकांक्षे राम
त्रयाधीनत्वादित्यर्थकरणेनासंगतिरिति। ननु लिंगपदादर्थभावनोपस्थितौ तदुत्तरं निरुक्ताकांक्षावत्त्वं भ
वतीति यदुक्तं तदयुक्तम्। भाट्टमतेऽपि फलानुकूलव्यापारः। एवं माभिधायाः शब्दभावनात्वाभावात् तस्याः शा
ब्दभावनात्वाभिधानमप्यसंगतमिति चेन्न तेषां निरुक्तव्यापारस्याख्यातसामान्यशक्यत्वाभ्युपगमेन लि
७० गपदस्यापि शक्यतया अभिधायाः शब्दभावनात्वाभ्युपगमेन चानुपपत्त्यभावात्। तदाहुर्भट्टपादाः अभि ७०

धा भावनामित्यत्यस्य अभिधीयत इत्यभिधा शब्दस्तन्निष्ठ भावनामित्यर्थो बोध्यः। अन्यामर्थभावनातो
भिन्नामाहुः स्वशक्त्या उपस्थापयंति॰ भावनेति अर्थोत्र धात्वर्थो यागादिः॰ अर्थित्वादात्मा वा आत्मत्वजनकद
रूपविषयित्ववृत्तित्वं वा। एवं च यागादिविषयिणी भावना आत्मवृत्ति भावना वा अत्रार्थात्मभावनाशब्दार्थो बोध
ः। अन्या अभिधारूप भावनातो भिन्ना सर्वाख्यातस्य गोचरः सर्वाख्यातशक्या॰ ननु उक्तोक्तान्वयसह
कारेण अर्थभावना अर्थभावना कर्म्मकरणेतिकर्त्तव्यतैतं त्रितयान्विता लिंगपदेन बोध्यत इति प्रागुक्तमसंगतं
मा अर्थभावनायाः कर्म्मादीनां विशिष्यापरिचयादिति चेन्न तस्याः स्वर्गादिकं कर्म्म यागादि करणं प्रयाजादि स
हकारीति सप्रसिद्धत्वात्। एवं शब्दभावनापि कर्म्मकरणेतिकर्त्तव्यतेत त्रयान्विता लिंगाभिधीयते लिंगपदात्
शब्दभावनोपस्थित्यनंतरमा अस्याः किं करणा केतिकर्त्तव्यता इत्याकारकजिज्ञासारूपाकांक्षोत्थानात् कर्म्मत्व
स्य यागादिप्रवृत्तिकरणं लिंगपदनिरूपितशक्तिज्ञानं वायुर्वै क्षेपिष्ठा देवता इत्यादिस्तुत्यर्थवादः सहकारी

कु काशीर॰

७। तिन कर्म्मोघपरिनयादनुपपत्तिः॰ तदाहुः भट्टपादाः लिंगोभिधासैव च शब्दभावना भाव्या तु तस्याः पुरुषप्र
वृत्तिः संबंधबोधः करणं तदीयं प्ररोचनाचांगतयोपयुज्यत इति अत्र लिंगोभिधेत्यस्य वायुर्वै क्षेपिष्ठा देवता
वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्यादिस्तुत्यर्थवाद इत्यर्थः। अंगतयेत्यस्य सहकारि
तयेत्यर्थः। तदयं भट्टमतनिष्कर्षः॰ स्वर्गकामो यजेतेत्यादौ लिंगपदेन आख्यातसामान्यशक्त्या अर्थभाव
नाउपस्थाप्यते॰ तदुत्तरं तत्र कर्मिकरणेति कर्तव्यताकांक्षाउपदर्शितजिज्ञासारूपा जायते। ततः स्वर्गकर्मि
कायागकरणिकाप्रयाजादीतिकर्तव्यताका स्वर्गकामकर्तृका भावनेत्याकारकार्थी भावना विशेष्यकबोधः राम
अत्र यागकरणकत्वं नयागनिष्ठकरणतानिरूपकत्वं यागे अर्थी भावनाकरणत्वाभावात् अपितु यागनिष्ठ
विषयतानिरूपकत्वपारिभाषिकं तद्विषयकत्वं चात्र जन्यत्वमिति केचित्। यागजन्यफलप्रयोजकत्वं प्रकृते या
७१ गकरणकत्वमित्यपरे। वस्तुतस्तु स्वर्गोपत्यस्यानुकूलव्यापारसमूह एवात्र स्वर्गकर्मिकाभावना तत्र यागक ७१

रणकत्वं च यागव्यतिरिक्तत्वमिति॰ एतादृशकरणकत्वं चात्र यागस्य संसर्गमर्यादया भासते न तु प्रकारविध
या तदुपस्थापकपदाभावात्॰ तथाविधपदकल्पने गौरवादिति। न चात्र प्रयोजकादेः कथं शाब्दबोधे सहकृत
त्वरूपेतिकर्तव्यताकत्वसंबंधेन भानं तद्बोधकपदाभावादिति वाच्यं व्युत्पत्तिवैचित्र्यात्॰ दर्शितसह
कार्याकांक्षायाः प्रकारांतरेणावृत्तेः॰ अन्यथानुपपत्त्या प्रयाजादिपदाध्याहारेणैव तथाबोधजननिर्वाहात्
इति॰ एवं निरवच्छिन्ननिरूपितशक्त्या शब्दभावनोपस्थितौ किं भाव्यं केन भाव्यं कथं भाव्यमित्याकांक्षा
की कांक्षा जायते॰ ततः विधिनिमित्तशक्तिग्रहेण शब्दस्यार्थभावनासहकृतेन पुरुषप्रवृत्तिं भावयेत इ
त्याकारकशब्दभावनाविशेष्यको बोधः॰ यादृशार्थबोधकपदे विधिवाक्ये श्रुतं नास्ति तादृशपदक
ल्पनेनैवोपपादनीयः॰ ततः स्वर्गफलिका यागकरणिका प्रयाजादीतिकर्तव्यताका स्वर्गकामकर्तृका
भावना॰ तिङादिनिरूपितशक्तिग्रहकरणकस्वकल्प्यर्थवादसहकृता शब्दभावनातिङ्पदसहप्रवर्तनावि

विषयइति महावाक्यार्थबोधे बुद्धरूपरक्ताभावनालिङर्थ इति म [illegible] गत॰ न चैवं सांख्यादिसिद्धांता
नुपपत्तिर्विधिः प्रवर्त्तनात दुपरक्तावच्छिन्नशिष्टा तु अर्थी भावनालिङर्थ इति पाद्येतितद्‌र्थीत॰ अत्रापि शब्द
भावनायां शक्तिग्रहकारणकत्वं शक्तिग्रहप्रयोज्यप्रवृत्त्यादिरूपफलप्रयोजकत्वं पारिभाषिकं शक्ति
ग्रहे शब्दभावनाया जनकत्वरूपकारणत्वाभावेन तथाविधकारणतानिरूपकतत्कारणकत्वासंभव
त॰ अत्रापि पूर्ववत्कारणत्वादेः संबंधविषया मानमंतरं गते ष्या॰ अत्रान्वयबोधे अर्थभावनाफ
लत्वभावेपि महावाक्यार्थबोधे तदनुभाव्यते प्रयोजकाभावादिति॰ अथवा प्रथममुपदर्शिता शब्द
विशिष्टा अर्थभावना विशेष्यक एव बोधः॰ तदुक्तं शब्दभावनाया मुपदर्शितायां ज्ञातायां मुप
दर्शिता शब्दविशिष्टार्थभावनाविशेष्यकस्तत्यर्थवादसहकृत शक्तिज्ञानकारणक शब्दभावनात
७२ विशिष्ट प्रवर्त्तनाविषयत्वविशेष्यक महावाक्यार्थबोधो [illegible] तेन शब्दभावनाविशेष्यककार ७२

णांतरबोधोपि प्रयोजनाभावात् । अध्येतया बोधे [illegible]न्यने गौरवाच्च । अत्र च विषयत्वं जन्यत्वं तदेव फलाकां-
क्षानिवृत्तेरिति । अत्र च महावाक्यार्थबोधे अर्थभावनायां स्वर्गफलकत्वभानं तु घटेन जलमाहरेत्यादौ कि-
तरत्वादिवत् । अन्वयप्रयोजकरूपवत्त्वं योग्यता विषयाः अर्थभावनायां प्रवर्तनाविषयत्वान्वयेतस्यात-
था विषयोग्यत्वात् । ननु अन्वयप्रयोजकरूपवत्त्वरूपयोग्यताज्ञानानामेवान्वये अभिधाम[illegible]
प्रकृतजनकत्व लक्षणान्वयप्रयोजकरूपवत्त्वरूपयोग्यताज्ञानस्य हेतुतायाउक्तत्वादिति चेत विषय[illegible]
भावनाविषयस्वर्गफलकत्वज्ञानस्य तत्र हेतुत्वे प्रवर्तनात्वेन ज्ञाते त्येव भावनात्वेन ज्ञाते त्यंत मिश्र
ष्यविरोधस्तेन ग्रंथेन प्रवर्तनात्वेनान्वयप्रयोजकरूपवत्त्वरूपयोग्यताज्ञानस्य हेतुतायाउक्तत्वादिति चे-
त्ग्रंथस्य मा...वे...त्वेन ज्ञाते त्यनंतरं ज्ञातत्वेति पुनापि त्वासात याजातं साध्यत इत्यनेन । ... यां
कारणाय चार्थभावनाया भावनात्वेनानंतरं ... प्रवर्तनात्वेन ज्ञातं ज्ञायत इत्य...कस्य विते

कएव विश्रांतत्वेनानुपपत्त्यभावादिति॰ न चात्रार्थभावनाया अप्य[illegible]लाभात्तद्ध्यस्यतत्साधीयपद
इति वाच्यम् तत्र त्यदुःखेरुकलेककर्मणीत्यत्र कर्मपदस्यार्थभावनार्थकत्वेनानुपपत्त्यभावादि
73 ति॰ तावंश्च वर्तकज्ञानस्य व्यावर्त्यार्थस्यापत्तज्ञानस्यावश्यके यागादौ निष्फलत्वज्ञानकाले प्रवृ
त्त्यापत्तिवारणार्थं स्वगकरणाकरणकत्वसंबंधेनयागादिति॰ विशिष्टयामर्थभावनाया सिद्धसाध
नताज्ञानस्य हेतुतायामहृमतेसिद्धत्वात्॰ यागादि विशिष्टभावनायाइष्टसाधनताज्ञानकाले विशे स०
षणीभूत यागेपीष्टसाधनताज्ञानस्यावश्यकत्वेन वा ज्ञानस्य हेतुतयातत्र याविशेष्टसाधनताज्ञान
काले यागे निष्फलत्वज्ञानासंभवेनानुपपत्त्यभावात्॰ चैवं सति न्यायकृतावि[illegible]पन्यायम
ते क्रियागतेष्टसाधनताहेतुताज्ञानस्य हेतुतयाविशेषसंभवात्॰ यत्तु॰ अर्थभावनागतेष्टसा
धनताज्ञाने महृमतेन प्रवृत्तिहेतुः आपितु आमिधागतेष्टसाधनताज्ञानम्॰ अत एव पञ्चधर

मिश्रास्त्वाहुः क्रियागतेष्टसाधनतानविषयत्वेपि तु अभिधागतमिति विशेष इति अन्यथा विशे
ष्यके इष्टसाधनताज्ञाने हेतुत्वे तत्तद्वारणप्रकारकस्योक्तत्वात्. न चैवं सति मिश्रग्रंथविरोधः लिङ्
णायात् अभिधापदस्य भावनाकत्वेनानुपपत्त्यभावात्. न चैवं सत्यपि तादृशग्रंथविरोधे फलकत्वस्या
पि विधिप्रतिपाद्यत्वेनानुपपत्त्यभावादिति — न चैवं सति फलभावनात्वेनार्थभावनाविरोधोक्तौ अर्थ
भावनायां तथाविधप्रवर्तनाविषयत्वभाने अन्वयप्रयोजनां[illegible]पस्थापम इति चेन्न. नाद्यः अपेक्ष
योग्यप्रवृत्तिं प्रति तदनुकूलपरइष्टप्रवर्तनाज्ञानस्य हेतुतां वाच्यायां तथाविधप्रवर्तनाविषयत्वभा
ने अन्वयप्रयोजनं नेनपस्थापम इति चेन्न तानादिस्थले उक्तरीतया तत्संपत्त्यर्थं तथाविधबोधस्याव
श्यकत्वात्. तथाविधबोधोपकथ्यतादृशाकारणसंपत्तिरिति तु नाशंकनीयम्. उक्तत्यसाध्यताज्ञानको
ले यागादौ प्रवृत्त्यापत्तिवारणाय प्रवृत्तिं प्रति हेतुत्वेन उक्तप्रवर्तककृतिसाध्यताज्ञानस्य संपत्तिजन्य

त्वस्वप्रयोज्यकृतिजन्यत्वान्यतररूपस्वविषयत्वसंबंधेन यागादिविशिष्टभावनायांप्रवर्त्तनात्व
याभ्युपगमेन तुल्यवित्तिवेद्यतया प्रवर्त्तनायामपि स्वजनककृतिप्रयोजकत्वरूपयागाद्यनुकूलत्व
बोधस्यावश्यकतया तस्याविधिकारणोपपत्तेः॰ न च तथाप्यर्थीभावनायांप्रयाजादिसहकृतत्वमानंनि
रर्थकमिति वाच्यम्॰ प्रयाजादिसहकारिसंदेहसपाद्यफलजनकत्वसंदेहसंपादितप्रवृत्तिप्रतिबं
धकत्वेनोत्सारणार्थं तत्र तदन्वयांगीकारात् तत्रापि विशिष्टेतत्रावेविशेषणेपि तत्रावावश्यकत्वेना
नुपपत्त्यभावात्॰ न चैवं सत्यपि प्रवर्त्तनायां तुल्यार्थीवादे सहकृतत्वस्यभाने प्रयोजनाभावइति वाच्यम्॰
तत्तत्र ना भावे बलवदनिष्टाननुबंधिज्ञानरूपप्रवर्त्तक ना ना संपत्त्यर्थं तत्तत्रावांगीकारावकत्वा
दिति [redacted] स्त्रत्यर्थंवादज्ञानेन कथं बलवदनिष्टाननुबंधिज्ञानं संपाद्यत इति तन्नाशंकनीयं तदृष्ट
७८ टकीभूततत्किंचित्पदस्य स्वाभ्रयस्य रूपबलवदनिष्टाननुबंधित्वेन द्वागंगीकारेणैतेस्मात्तत्त्व ७८

बोधसंबंधादिति० अतएवार्थवादानां स्वार्थेऽप्रामाण्यमिति तेषां सिद्धांतः० न च तत्रापि स्वकरण
कत्वसंबंधेन तत्तत्तिङ्पदनिरूपितशक्तिज्ञानभावे प्रमाणभाव इति वाच्यम्० करणकाकांक्षांतरतत्त्व
प्रावस्थापावश्यकत्वात्० अयमत्र संक्षेपः० विधिश्रवणानंतरं विधिनात्मकशाब्दबोधाख्यशाब्द
भावनातत्संपाद्यते घटज्ञानांतरं घटजन्यज्ञातताख्यते तु ते सिद्धपदार्थवत् ततः आख्यातसामान्यश
क्त्या अर्थभावनाया उपस्थितिः तदनंतरं किं भाव्यं केन कथा प्रयाजादीति कर्तव्यताका भावना इत्याकारके
बोध इति भाव्यमित्याकारिकावाकांक्षाजिज्ञासारूपा जायते० ततः [redacted] त तत्पदार्थोपस्थिति
सहकारेण स्वर्गफलिका यागकरणिका प्रयाजादीतिकर्तव्यताका भावना इत्याकारको वांतरवाक्यार्थ
बोधः० ततः शब्दभावनायां तिङ्पदनिरूपितशक्तिज्ञानात् तस्या उपस्थितेः० ततः किं भाव्यं केन भाव्यं क
थं भाव्यमित्याकारिकाजिज्ञासारूपाकांक्षा० ततस्तत्तत्पदार्थोपस्थितिसहकृततत्त्वविधाकांक्षासहकृ

तोपदर्शितावांतरवाक्यार्थबोधात तिङ्पदनिरूपितशक्तिजनक [redacted] घटकस्तुत्यर्थवादस्तुत
शब्दभावनात्मकप्रवर्त्तनाविषयः स्वर्गफलिकायागकरणिकाप्रयाजादीतिकर्त्तव्यताका भावनाइत्याको
रकार्थीभावनाविशेष्यकशब्दभावनात्मकप्रवर्त्तनाविषय स्वर्गप्रकारकमहावाक्यार्थबोधविरूपप्र
कभावनातिङ्प्रतिपाद्यत इति तत्सिद्धं तात ततः स्तुत्यर्थवादज्ञानात क्रियायां बलवदनिष्टाननुबंधि
75 त्वात चिकीर्षादिकं चोत्पद्यते तन्मते ज्ञानेच्छयोर्योगपद्यागीकारात ततः यागादिरूपक्रियायां प्रवृत्ति [redacted]
उत्पत्तिरिति॰ अत्र तिङ्त्वावच्छिन्ननिरूपितशक्तिचतुष्टयं भट्टमते बोध्यम्॰ तथाहि॰ एका शब्दभा राम
वनात्वेनानु [redacted] कृतानुकृता [redacted] तत्ज्ञानस्याकांक्षोत्थापकत्वेन शब्दभावनास्ववि
शिष्टप्रवर्त्तनात्वज्ञानानुबोधेन चावश्यकत्वात॰ अपरा च प्रवर्त्तनात्वज्ञानानुकृता रागादिस्थल
इष्टत्वितरकत्वेन त्वज्ञस्यत यावविषज्ञानस्यावश्यकत्वात॰ अपरा च प्रवृत्त्यनुकृता हेमिषा

ख्यासाक्षात्प्रवर्त्यइतनकेन शब्देन प्रवृत्तिजननेतस्या आवश्यकत्वात् ॰ अपराचाभिधाने
ज्ञानानुकेताततज्ज्ञानस्याप्यनुभवसिद्धत्वेनावश्यकत्वात्तदिति शक्तिचतुष्टयम् ॥ ० ॥ केचित्तु ॥ ० ॥ अभि
धागतेष्टसाधनत्वंविध्यर्थ इतिमते तदादाय शक्तिचतुष्टयाबाध्यमितिवदंति तदसत् ॰ भावना
याः स्वर्गादिरूपेष्टज्ञानत्वेभाव्यावतस्याः पुरुषप्रवृत्तिरितिवाक्यविरोधापत्तेरिति तस्मादुपदर्शि
तरीत्यैव शक्तिचतुष्टयमंतरभाव्यतेउपपादनीयमितिकोदोषः अतोभाव्यते ॰ शक्तिभिन्नस्याभि
धाशब्दवाच्यत्वे [illegible] मानाभावेनकुत्रतथाशक्तिकल्पनमानं च परप्रयोज्यप्रवृत्तिपरनिष्ठ
स्मिज्ञानस्यहेतुतायाउपदर्शितरीत्याप्यावश्यकतयाविधिनिष्ठप्रवर्त्तनाज्ञानंविनानप्रवृत्तिरि
तितदुपपत्त्यर्थंविधिनिष्ठोभिधाख्यातिरिक्तपदार्थोवश्यंतत्तशक्यो वाच्यइतिवाच्यमन्ताहृशा
वाक्यवशेदादौ प्रवृत्तिनिर्वाहात् ॰ स्वेष्टाधीनप्रवृत्तिस्थलेवश्यंवक्तृइष्टसाधनताज्ञानहेतुतयैव

राज्ञादिततः पित्रादिनिष्ठव्यापारद्वारैव परसमवेतव्यापारजनकत्वनियम इति वाच्यम्॰ अनुमि-
तिकरणव्याप्तिज्ञानादौ व्यभिचारेण तथाविधनियमाभावादिति व्यर्थमप्रस्तुतविचारेण एतत
यत्र पठितुं ननु अस्तु तर्हि भाव्यमेव विध्यर्थ इत्यत आह॰ अतिप्रसक्तज्ञानत्व फलं नापूर्वं तेत्वाह
नितः॰ तदलाभान्वयार्थं च न क्रियाप्यप्रवृत्तितः॰ कार्यधर्मस्य विध्यर्थत्ववादिमते कार्यपदार्थो
यदि स्वर्गस्तदा दूषणमाह॰ अतिप्रसंगात्व फलमिति स्वर्गसाधनत्वज्ञानाभावो लूप स्वर्गज्ञानात
76 प्रवृत्त्या पदार्थो यदि तेकार्यपदार्थो न फलमित्यर्थः॰ ननु तर्हि अपूर्वं कार्यपदार्थोस्त्वित्यत्र ना रा॰
पूर्वमिति अपूर्वद्वयहानितो नापूर्वकार्य शब्दार्थ इत्यर्थः॰ अपूर्वस्य कार्यशब्दार्थत्वे प्रकृतेपू
र्वमेव विध्यर्थः॰ तयाच तिरूपद निरूपित शक्तिग्रह काले अपूर्वस्यावश्यं प्रतीत्या शाब्दबोधात
पूर्वसंघतितत्वरूपापूर्वत्वस्य तत्र व्याघात प्रसंग इति भावः॰ ननु कार्यसामान्यमेव कार्यं

पदार्थः प्रकृते कार्यत्वरूपेण वेदादौ तिङ्पदनिरूपितशक्तिग्रहात् शाब्दबोधे फलकार्ययोनि
योऽर्थान्तरेण योग्यताबलात् कार्यत्वेन पूर्वभानमिति नोक्तानुपपत्तिरित्यत आह ० तदलाभा
दित्यादिपरमतेतिनिषेधस्य लफलकामनात्वेनउपदर्शितरीत्या अपूर्वालाभात् न कार्यसा
मान्यमपि विध्यर्थ इत्यर्थः ० ननु तर्हि क्रियैव कार्यपदार्थोऽस्त्वित्यत आह ० न क्रियापि प्रवृत्ति
इति इष्टसाधनत्वादिज्ञानाभावदशायां केवलयागादिरूपक्रियाज्ञानात् प्रवृत्त्यभावेन क्रियापि न विधि
रित्यर्थः ० ननु तर्हि प्रवर्तना शब्दवाच्या अभिधैव विध्यर्थोऽस्तु न ज्ञानमेव प्रवर्तकमित्यत अस
त्वादप्रवर्तेष्वनाभिधापि गरीयसी वाच्यकस्य समानत्वात् परिशेषोपि दुर्लभो सत्त्वात् अ
भिधायां मानाभावात् ० अत्र निवृत्ते यागकरणाभिधेति ज्ञानात् ० अप्रवृत्ते बोधकस्य सम
त्वात् कार्यादावि वाचापि बाधकस्यत्वात् ० अ [illegible] नर्दर्भः ० अतो नाभिधापि गरीयसी

उक्त्या युक्त्या अभिधात्वस्य कर्तृविज्ञानस्य प्रवर्तकतया तस्यैव विधिशक्यत्वावश्यकत्वे अभिधा
यां विधिशक्तिकल्पने गौरवमिति रीत्या गौरवग्रस्ता अभिधानुमानमपि न विध्यर्थ इत्यर्थः॰ ननु
तादृक्क्रियागतेष्टसाधनत्वमेव विध्यर्थोऽस्तु न ज्ञानमेव प्रवर्तकमित्यत्राह॰ हेतुवादनुमानाद्भ्रम.
११ ध्यसादो वियोगतः॰ अन्यत्र लृप्तसामर्थ्यातन्निषेधानुपपत्तितः॰ अतः क्रियागतेष्टसाधनत्वं
न विध्यर्थ इति पूर्वाभिधात्वहेतुत्वादिति अभिकामोदारुणी मध्नीयादित्यत्र केकुतइत्याकांक्षायां राम
यतो दारुमथनमग्निमाधानमित्यत्र यतो दारुमथनपदलक्यविध्यर्थसाध्यकानुमाने इष्टसा
धनत्वस्य हेतुत्वादित्यर्थः॰ इष्टसाधनत्वस्य विध्यर्थत्वे सांगभेदेन हेतुत्वासंभवेन तत्रैतत्साध
विधानुमाने ~~इष्टसाधनत्वस्य हेतुत्वादित्यर्थः॰ इष्टसाधनत्वस्य विध्य~~ नुपपत्तिरिति भावः॰
हेत्वंतरमानाद्भ्रेति भवति सत्यं तत्त्वविद्राशयः ... नये इतेत्यत्र इष्टसाधनत्वबोधेपि

नो२

ऽ[illegible]ध्यनुमानादित्यर्थः० हेत्वंतरमाह० अनुमानाच्चेति० भवतु नाम मध्यसादौ वियोगेन इति मध्य

मोत्तमपुरुषस्थलेतिङः इष्टसाधनत्वाबोधकत्वादित्यर्थः० तत्राग्न्यादेर्विध्यर्थत्वादिति भावः० हेत्वं

तरमाह० अन्यत्रेष्टसामर्थ्यादिति आज्ञाऽध्येषणानुज्ञाप्रश्नप्रार्थनाशंसयितिङामिच्छा

वाचकत्वनादित्यर्थः० यावत्तु विच्छामनन्तुविदधानस्तत्संबंधादिनेति सा आज्ञायाश्चोत

रिपूज्ञा तस्मात वंजका सा अध्येषणाया निवारणी भावव्यंजिका सा अनुज्ञा अभिधानप्रयो

जनादिजिज्ञासा प्रश्नना मेच्छा प्रार्थना शंसनमाशीरिति० हेत्वंतरमाह० निषेधानुपपत्तितश्चेति

कलंजं न भक्षयेदित्यत्रेष्टसाधनत्वनिषेधस्य बाधितत्वादित्यर्थः० अत्र विध्यर्थस्यैव निषे

धो न त्व बोध्यतइति भावः० स्वमतमाह० विधिर्वक्तुरभिप्रायः प्रवृत्त्यादौ तिङादिभिरभिधेयोनुमेया

नुकर्तुरिष्टाद्यभ्युपायता प्रवृत्त्या रावित्यत्रादिपदग्राह्या निवृत्तिः समन्वयर्थः० उद्देश्यतातथाच प्रव

कु॰ का॰

त्रिनि वर्त्ति वा उद्देश्ययो वस्तु गवे बहु रभिप्रायः सति आदिभिरभिधेय इत्यर्थः॰ ननु एवमपि इष्ट
साधनत्वाद्भूतत्वकथं यागादौ प्रवृत्तिरित्यत आह॰ अनुमेयादिति॰ इष्टाद्युपायतान्वितं तत्प्राव इष्टाद्यु
पायता इष्टादिसाधनता अनुमेया इत्यर्थः॰ एवं च अनुमित्यात्मकेष्टसाधनताज्ञानबलात् यागादौ प्र
वृत्तिरिति भावः॰ अत्रेदं तत्त्वं बहु अभिप्रायो विध्यर्थ इत्यत्र अभिप्रायशब्दार्थस्त्वेदिक्षाम त्र तदान दे
78 जं भक्षयेदित्यत्र विध्यर्थनिषेधानुपपत्तिरीश्वरेच्छायाः सर्वविषयकत्वेन विषयतासंबंधेन कलंजभ
क्षणेपि तत्सत्त्वात्॰ यदि च बलवदनिष्टाननुबंधीष्टसाधनत्वप्रकारेच्छा अभिप्रायशब्दार्थस्तदा न
घ बलवदनिष्टाननुबंधीष्टसाधनत्वएव शक्तिर्वक्तव्यदिति प्रांचः॰ नवीनास्तु॰ बलवदनिष्टाननु
बंधित्वविशिष्टेष्टसाधनत्वे इष्टस्य॰ न चैवं सति श्येनेनाभिचरन यजेतेत्यस्यैव विध्यर्थत्वाद्विधेः
त्वयानुपपत्तिः॰ श्येनस्य हिंसात्वेनानिष्टसाधनतया विशिष्टाभावात्॰ न चेष्टसाधनत्वमात्रे

त्र विधेर्लक्षणेऽन्हि शब्दानुपपत्तिरिति वाच्यम्० न विधौ परः शब्दार्थ इति शावरभाष्यविरोधेन विधिस्थ
ले लक्षणाकल्पनस्यासंभवदुक्तिकत्वादिति चेन्न० विशिष्टबोधकेष्टाद्युपायतान्वितपदेन विना विधम
दोण स्थले करणविशेष्यकबोधोपि शक्तौ च केवलेष्टसाधनत्वबोधसंभवादिष्टसाधनत्वविशिष्टब
लवदनिष्टाननुबंधित्वे वा विनिगमनाविरहेण विधिशक्तिकल्पनामपेक्ष्य नाद्यवत बलवदनिष्टान
नुबंधित्वेष्टसाधनान्वे च विधेः शक्तिद्वयमेव कल्प्यतेन न चैवमपि कृतिसाध्यताज्ञानकाले प्रव
त्त्यापत्तिरिति वाच्यम्० तथा विधापत्ते भावितयानुपदर्शितशक्यतावच्छेदककोटौ कृतिसाध्यत्वानिवे
ति गौरवात तदपेक्षया तत्रापि स्वातंत्र्येणैव विधिशक्तिकल्पनात०ः अथवा साध्यतासंबंधेन कृतिप्रका
ज्ञानमेव प्रवर्तकम्० उक्तयुक्त्या तत्र कृतिसाध्यताज्ञानं तथा तस्य तथात्वे प्रवृत्तिकारणतावच्छेदककोटौ
कृतिसाध्यत्वस्यापि संभवत्त्विवेशे गौरवात तथाचारव्यातस्य कृतिसामान्यशक्त्यैव निर्वाहेन विधेः कृ

ई० का०

तिसाध्यत्वे स्वातंत्र्येण शक्तिकल्पनमित्याहुः ० श्रुतेरित्यस्य व्याख्यानमाह ० केवलं च वेदेपि परमेश्वर
गोचरः स्वार्थद्वारैव तात्पर्यं तस्य स्वर्गादिद्विधोयं कृत्स्नो वेदः याज्ञेन यज्ञमयजंत देवा इत्यादि याज्ञो वै विष्णुः
पश्यात्य चक्षुरित्यादि एतस्य राक्षवस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत इत्यादि रूपः स्वार्थद्वा
रा स्वार्थप्रतिपादनेन परमेश्वरगोचरः परमेश्वरप्रतिपादकः ० ननु तादृशवाक्यानामर्थवादत्वान्न प्रा
७९ माण्यमित्याद्यर्थात स्वर्गनरकादिवाक्यानां तत्तद्विधिनामकार्थबोधे तात्पर्यमिति तत्प्रामाण्यं तस्यपुर
दर्शितवेदसमूहस्य विधेरीश्वरमुपासीतेति विधिना सहैकार्थबोधे तात्पर्यमिति प्रामाण्यमित्यर्थः ० सं
ख्याविशेषादित्यस्य व्याख्यानांतरमाह ० स्यामनुभविष्यामीत्यादिसंख्या च बहुगा समाख्या वाच्या स
वे स्वतंत्रो ज्ञाररचिता ईश्वर एवेति ईश्वरसिद्धिरिति कारिकापूर्वार्द्धार्थः ० संख्या पदार्थमत्य साहसमा
७८ ख्यापीत्यादि ईश्वरोच्चारणं विना शाखानां काठकादिसंज्ञापि न संभवति द्वितीयार्द्धार्थः अयं भावः ० शाखा

नां काठकादिसंज्ञाश्चायं ते ताश्च नाध्ययननिबंधना अध्येतॄणा मनन्यात किंतु सर्गादौ अस्मदाद्यदृष्टया
काष्ठकठादिशरीरपरिग्रहेण या शाखा उक्ता सा काठकादिसंज्ञया व्यवह्रियत इत्येव वाच्यं० तथा च काठका
दिसंज्ञान्यथानुपपत्त्या ईश्वरसिद्धिरिति भावः० एवं न संख्याविशेषादित्यत्र संख्यायते कथ्यते संख्याव
द्वेयु वप्रत्ययः संख्याशब्दार्थः० काठकादिसंज्ञेण त्येव गंतव्यम्० इति सिद्धमीश्वरज्ञानमोक्षहेतुः०
यस्यां ईश्वरेन विश्वासः तं प्रत्याह० इत्येवं प्रकृति नीति सं प्रवजले भूयोभियाख्याति स्तेषां नास्यदमादधा
ति हृदये ते शैलसाराशयाः० किंतु प्रस्तुतविप्रतीयविषयोपक्षे भावचिंतकाः काले दारुणकः इयैवकूप
याते भावनीया नराः० अत्र इति शब्दस्वरूपार्थकः० एवं शब्दः प्रकारार्थकः शैलसावष्टब्धानां मोहार्थिनः
प्रस्तुतप्रतीयविधमः प्रस्तुते ईश्वरो विपरीतधियः प्रतिकृतप्रकारा इति यावत्० उद्वैरतिशान्तकाले
फलदशायां कारुणिकोति संबोधने भावनीयाः कार्याः० अन्यत्सर्वं स्पष्टम्० ननु पुष्पार्कं कार्यानैमित्ते

॥ २ ॥ अथवा कर्णनिसर्गसुंदरचिरा द्वैतोनिसर्गदिव्यीत्यर्थः आनंद [illegible] तथापि तवलं नाथ्यादि [illegible]
नां त्वचित्तं विवेहि करुणां येन त्वदेकात्मतां यातेचेतसि नापक्रयाम श्रांतशोच्यान्यापुनर्यातना
निसर्गसुंदरेति संबोधनं सामाध्यपरिबहितार्थ केंद्रि दीर्घतदिव कालं व्याप्येत्यर्थः ० [illegible] समस्तं [illegible]
पातिइत्यत्रत्वच्छिः फलेच्छाविच्छेदः तथाच फलेच्छाभावनानभवतीत्यर्थः ० त्वदेकात्मतां त्वन्मात्रगोच
र साक्षात्कारजनकतां यातेप्राप्ते आक्रयासेति क्रियापदम् ० इत्यञ्जनातिः कुसुमांजलिरुदनं [illegible]
दपि बदक्षिणकोटौ तोवा ततः किमवमवेशगुरौ गुरुत्वप्रीतौ स्त्वनेन पदपीठ समर्पितेन श [illegible] सम
प्रेमातति न्यायः वासयेदनुरंजयेत ० दक्षिणवाम [illegible] सुजलबद्धनौ ० यदि कुतर्क वासितं [illegible] वासयि
तीत्युच्यते तत्राह ० नोचेति बद्धत्ता तानुरंजनस्य शक्यत्वान्नोदृश्यं किंतु स्वमेव [illegible] इदं तं नद्दु [illegible] त्याति [illegible]
गतस्यापि गुरुः परमेश्वरः अनेन पादपीठः समर्पितेन प्रीणात्वित्यर्थः ॥ ११ ॥ इति महामहोपाध्या
रघुदेवभट्टाचार्यविरचितं कुसुमांजलिटीकासमाप्तं